THE

KAVYA KALAPA,

NUMBER FIRST.

PUBLISHED BY

HARIDAS HIRACHAND.

काव्यकलापः

अंकः प्रथम स्तत्र

महाकविकालिदासादीनांकृताःरसिकाःग्रंथाः

सप्तत्रिंशत्

हरिदासेन तात हीराचंद सकाशात्

शोधयित्वा,

प्रथमावृत्तिः

गणपतकृष्णाजीकस्यमुद्रालयेअंकीकारिता.

संवत् १९२० - शक १७८५

Registered under act XX of 1847.

BOMBAY.

PRINTED AT GANPAT KRISHNAJI'S PRESS.

1864.

Digitized by Google

Digitized by Google

KAVYA KALAPA,

NUMBER FIRST.

A

SANSCRIT ANTHOLOGY

BEING

A COLLECTION OF THE BEST 37 SMALLER POEMS,

IN THE

SANSCRIT LANGUAGE

PUBLISHED BY

HARIDAS HIRACHAND.

FIRST EDITION.

Registered under act XX of 1847.

BOMBAY.

PRINTED AT GANPAT KRISHNAJI'S PRESS.

1864.

Digitized by Google

Ind. 534.2

Ind 534.2

HARVARD COLLEGE LIBRARY
FROM THE BEQUEST OF
CHARLES ROSWELL LANMAN
MARCH 15, 1941

काव्यकलापः

अंकः प्रथम स्तत्र

महाकविकालिदासादीनांकृताःरसिकाःग्रंथाः

सप्तत्रिंशत्

हरिदासेन तात हीराचंद सकाशात्

शोधयित्वा,

प्रथमावृत्तिः

मुंबय्यां

गणपतकृष्णाजीकस्थमुद्रायंत्रालये

स्फुटमंकीकारिता.

संवत् १९२० - शक १७८५

सन १८६४

Digitized by Google

PREFACE.

Mostly Sanscrit Shlokas (metres) have the power of creating sublime thoughts in our mind, and are qualified to animate our soul. They relax the burden of labour, mental as well as bodily, and gladden our heart. We find much difficulty in collecting Sanscrit Poems which contain such valuable Shlokas; owing to the great expense we are obliged to undergo in getting them copied.

In this little work will be found very interesting thirty-seven Sanscrit Poems, which cannot be procured without much trouble. It promises to be very useful to the learned and learners of the Sanscrit language.

I am greatly obliged to *Dr. Bhau Dajee,* (patronizer to the learned) for his lending me a copy of the poems contained in this work, as also to my dear father Kavi Hirachand Kanji, for rendering me every assistance in getting this published.

I expect due patronage from Government and from the worthies of Bombay & other places; which will enable me to publish several numbers of the *Kavya Kalapa.*

In conclusion I request that the public will forgive for some slight errors which might have crept, in and further beg to add that I would consider myself amply rewarded if this work meets with due reception.

Bombay
15th. February
1864.

HARIDAS HIRACHAND.

Digitized by Google

પ્રસ્તાવના.

કોઈ કારણ ઉપર કોઈને મ્હોંડેથી એક શ્લોક સાંભલતાં મનને ઘણોજ ઉત્સાહ થાયછે; અને તે પ્હેલાં તેવા કામમાં ઘણીજ ચિંતા થતી હોય, તે સર્વ દુર થઈને, તેનો ઉપાય પણ એ શ્લોક સાંભલતાંજ મલી આવેછે. એવો ચમત્કાર જે કવિયોના એકેક શ્લોકમાં રહ્યો છે, તેવા શ્લોકોના ગ્રંથો કોઈક ઠેકાણેજ હોય છે, પણ તે લખાવવા સારૂ મલતા નથી, અને મલે તો લખાવી લેતાં દ્રવ્યનો અરચ ઘણો થાયછે. એ બે કારણસર ગ્રંથોનો સંગ્રહ કરવો મુશ્કેલ પડેછે.

આ કાવ્યકલાપમાં મ્હારે ઘણા અંકો સટીક તથા મૂલ ગ્રંથોના છપાવી પ્રગટ કરવાછે, તે મધ્યે આપ્હેલા અંકમાં મેં ઘણી રસિક તથા અપ્રસિદ્ધ ૩૭ કાવ્યો દાખલ કરીછે. મને નિશ્ચય છે જે આ ગ્રંથ સંસ્કૃતભાષાના વિદ્વાનોને તથા વિદ્યાર્થીયો ઘણોજ ઉપયોગી થઈ પડસે.

વિદ્વજ્જનાશ્રય પ્રખ્યાત **ડાક્ટર ભાઉદાજી**એ કૃપા કરીને આ અંકમા જે કાવ્યો છે તેની મૂલ પ્રતનું બંગાલામાં ૧૭ વર્ષ પ્હેલાં છપાયલું પુસ્તક મને આપ્યું, તેથી હું તેઓનો ઘણો ઉપકાર માનુંછું

મને આશા છે કે આ ગ્રંથ વિષે સરકાર તથા દેશી સદ્‌ગૃહસ્થો તરફથી યોગ્ય આશ્રય મલવાથી બીજા અંકો છપાવતાં મને ઘણો આનંદ થસે.

સેવટે મારી સર્વેને વિનંતિ છે કે આ ગ્રંથમાં કોઈ ભુલચુક રહી ગઈ હોય તો તે માટે મને માફ કરવું, અને જો આ ગ્રંથને સર્વ સજ્જનો તરફથી યોગ્ય માન મલશે તો હું મ્હારી મુરાદને પ્હોંચ્યો એમ સમઝીશ.

હરિદાસ વિ. હીરાચંદ.

Digitized by Google

अनुक्रमणिका.

ग्रंथांक.	श्लोकांक.	ग्रंथनामनि	ग्रंथकर्तृनामनि	पृष्ठांक
१	९	नवरत्नं		१
२	८	अष्टरत्नं		३
३	७	सप्तरत्नं		४
४	६	षड्रत्नं		५
५	५	पंचरत्नं		६
६	१३	गुणरत्नं	भवभूति	७
७	१४	नीतिरत्नं	वररुचि	८
८	२१ ~~१२~~	नीतिसारं	घटकर्पर	१०
९	१६	नीतिप्रदीपः	वेतालभट्ट	१२
१०	१००	दृष्टांतशतकं	कुसुमदेव	१४
११	१०७	शांतिशतकं	शिल्हन	२१
१२	१४२	हंसदूतः	रूपगोस्वामि	३५
१३	४६	पदांकदूतः	कृष्णसार्वभौम	५३
१४	१४१	उद्धवदूतः	माधवकवींद्र	५९
१५	३८	रामकृष्णविलोमका	सूर्यकवि	७८
१६	५१	वृंदावनयमककाव्यं	मानांक	८३
१७	८	पूर्वचातकाष्टकं		८८
१८	८	उत्तरचातकाष्टकं		८९
१९	८	भ्रमराष्टकं		९०
२०	८	वानर्यष्टकं		९१
२१	८	वानराष्टकं		९२
२२	९	गंगाष्टकं	सम्यज्ञानानंद.	९३
२३	८	शृंगाररसाष्टक	कालिदास	९४

Digitized by Google

ग्रंथांक.	श्लोकांक.	ग्रंथनाम	ग्रंथकर्तृनाम	पृष्ठांक
२४	२१	शृंगारतिलकं	कालिदास .. .	९६
२५	२२	घटकर्पर	घटकर्पर	९८
२६	४९	चौरपंचाशिका . ..	सुंदरकवि	१००
२७	१९	धर्मविवेक	हलायुध	१०६
२८	२२	मुकुंदमाला	कुलशेखरराजा	१०८
२९	२०	व्रजविहारः	श्रीधर	११०
३०	११	वेदसारशिवस्तव ..	श्रीशंकराचार्य .	११३
३१	७	महापद्यं	कालिदास . .	११४
३२	१८	पद्यसंग्रहः	कविभट्ट . . .	११५
३३	९	पांडुरंगाष्टकं	श्रीशंकराचार्य .	११८
३४	९	गोविंदाष्टकं	श्रीशंकराचार्य .	११९
३५	४८	श्रुतबोधः	कालिदास . .	१२०
३६	६	दुर्घटकाव्य	कालिदास . ..	१३६
३७	२१	विद्वद्विनोदकाव्य ..	कालिदास . .	१३८

शुद्धिपत्रं.

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
रद्दसत्तस्य	रसद्दत्तस्य	२	१३
द्दष्टु.	दृष्ट्वा	१६	११
मात्माम	मात्मानं	१८	१
मायःश्वासादपन्यंतः	मायःश्मासादयन्यंतः	१८	१८
सश्वसन्निवकेवलं	सशश्वन्निकषेकषः	१८	१८

Digitized by Google

परमात्मनेनमः

काव्यकलापः

अंक १

नवरत्नानि.

धन्वंतरिक्षपणकामरसिंहशंकु ॥
वेतालभट्टघटकर्परकालिदासाः ॥
ख्यातोवराहमिहिरोनृपतेःसभायां ॥
रत्नानिवैवररुचिर्नवविक्रमस्य ॥१॥

नवरत्नं

मित्रममर्थीतथानीतिर्धर्मकार्पण्यमूर्खकाः ॥
स्त्रीणांविद्वांस्तथेतूत्तातानूनवरत्नमिदंक्रमात् ॥ १ ॥

मित्रंस्वच्छतयारिपुंनयबलैर्लुब्धंधनैरीश्वरं । कार्य्येण द्विजमादरेणयुवतींप्रेम्णासमैर्बोधवान् ॥ अन्युग्रंस्तुतिभिर्गुरुं प्रणतिभिर्मूर्खंकथाभिर्बुधं। विद्याभीरसिकंरसेनसकलंशीलेन कुर्याद्वशं॥१॥अर्थीलाघवमुच्छ्रितोनिपतनंकामातुरोलांछनं। लुब्धोऽकीर्तिमसंगरःपरिभवंदुष्टोऽन्यदोषैरतिं ॥ निःस्वोवंचनमुन्मनाविकलतांशोकाकुलःसंशयं । दुर्वागप्रियतांदुरोदरवशःप्रामोतिकष्टंमुहुः ॥ २ ॥ नीतिर्भूमिभुजांनतिर्गुणवतांह्रीरंगनानांधृतिः। दैपन्योःशिशवोगृहस्यकविताबुद्धेःप्रसादोगिरां ॥ लावण्यंवपुषःस्मृतिःसुमनसांशांतिर्द्विजस्यक्षमा। स

क्तस्यद्रविणंगृहाश्रमवतांस्वास्थ्यंसतांमंडनं ॥ ३॥ धर्मःप्रागे वंचित्यःसचिवमतिगतिर्भावनीयासदैव । क्षेयंलोकानुवृत्तंवर चरनयनैर्मंडलंवीक्षणीयं॥मच्छाद्यौरागरोषौमृदुपरुषगुणौयो जनोयौचकाले । आत्मायत्नेनरक्ष्योरणशिरसिपुनःसोपि नापेक्षणीयः ॥ ४ ॥कार्पण्येनयशःक्षुधागुणचयोदंभेनसत्यं क्षुधा । मर्यादाव्यसनैर्धनानिविपदास्थैर्यंमदैर्द्विजः ॥ पै शुन्येनकुलंमदेनविनयोदुश्चेष्टयापौरुषं । दारिद्र्येणजनादरो ममतयाचात्मप्रकाशोहतः ॥ ५ ॥ मूर्खोऽशांतस्तपस्वीक्षिति पतिरलसोमत्सरोधर्मशीलो । दुःस्थोमानीगृहस्थःप्रभुरतिकृ पणःशास्त्रविद्धर्महीनः ॥ आज्ञाहीनोनरेंद्रःशुचिरपिसततंयः परान्नोपभोगी । वृद्धोरोगीदरिद्रःसचयुवतिपतिर्धिग्विडंबप्र कारम् ॥ ६ ॥ स्त्रीणांयौवनमर्थिनामनुगमोराज्ञांप्रतापःसतां । सत्यंस्वल्पधनस्यसंचितिरहसत्तस्यवाग्डंबरः ॥ साचारस्य मनोदमःपरिणतैर्विद्याकुलस्यैकता । सेवायाधनमुन्नतेर्गुणच यःशांतेर्विवेकोबलं ॥७ ॥ विद्वान्संसदिपाक्षिकःपरवशोमानी दरिद्रोगृही।वित्ताढ्यःकृपणःसुखीपरवशोवृद्धोनतीर्थाश्रितः॥ राजादुःसचिवप्रियःकुलभवोमूर्खःपुमांस्त्रीजितो । वेदांतीहत सत्क्रियःकिमपरंहास्यास्पदंभूतले ॥ ८ ॥ उन्मत्तान्मतिरो पयन्कुसुमितांश्चिन्वन्शिशून्वर्द्धयन्। मोत्तुंगान्नमयन्लतान्स मुदयन्विश्लेषयन्संहतान् ॥ तीव्रान्कंटकिनोवहिर्नियमय न्ग्लानान्मुहुःसेचयन् । मालाकारइवप्रयोगनिपुणोराजा चिरंनंदतु ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥

॥ इतिनवरत्नंसमाप्तं ॥ १ ॥

Digitized by Google

अष्टरत्नं

अर्थोंऽयोमतथानित्यंब्रह्मामागेशशिन्यपि ॥
शशीनिःस्वश्वविद्रोयमष्टरत्नमिदंक्रमात् ॥ १ ॥

अर्थागमोनित्यमरोगिताच । प्रियाचभार्याप्रियवादिनीच ॥ वश्यश्चपुत्रोऽर्थकरीचविद्या । षड्जीवलोकेषुसुखानितात ॥ १॥ व्योमैकांतविहारिणोपिविहगाःसंप्रामुवंत्याप दं । वध्यंतेनिपुणैरगाधसलिलान्मत्स्याःसमुद्रादपि ॥ दुर्नीते हिविधौकुतःसुचरितंकःस्थानलाभेगुणः । कालोहिव्यसन प्रसारितकरोगृण्हातिदूरादपि ॥ २ ॥ नित्यंछेदस्तृणानांक्षि तिनखलिखनंपादयोरल्पपूजा ।दंतानामल्पशौचंवसनमलिन तारूक्षतामूर्द्धजानां ॥ द्वेसंध्येचापिनिद्राविवसनशयनंग्रास हासातिरेकः । स्वांगेपीडेचवाचंहरतिधनपतेःकेशवस्यापिल क्ष्मीं ॥ ३ ॥ ब्रह्मायेनकुलालवन्नियमितोब्रह्मांडभांडोदरे । विष्णुर्येनदशावतारगहनेन्यस्तोमहासंकटे ॥ रुद्रोयेनकपा लपाणिपुटकेभिक्षाटनंकारितः । सूर्योभ्राम्यतिनित्यमेवगगने तस्मैनमःकर्मणे ॥ ४ ॥ भोगेरोगभयंकुलेच्युतिभयंवित्तेनृ पालाद्भयं । मानेदैन्यभयंबलेरिपुभयंरूपेतरुण्याभयं ॥ शा स्त्रेवादभयंगुणेखलभयंकायेकृतांताद्भयं । सर्ववस्तुभयान्वितं भुविनृणांवैराग्यमेवाभयं ॥ ५ ॥ शशिनिखलुकलंकःकंटकं पद्मनाले । युवतिकुचनिपातःपंकजाकेशजाले ॥ जलधिज लमपेयंपंडितेनिर्धनत्वं । वयसिधनविवेकोनिर्विवेकोविधाता ॥ ६ ॥ शशीदिवसधूसरोगलितयौवनाकामिनी । सरोवि

गतवारिजंमुखमनक्षरंस्वाकृतेः ॥ प्रभुर्धनपरायणःसततदुर्ग तःसज्जनो । नृपांगणगतःखलोमनसिसप्तशल्यानिमे ॥ ७ ॥ निःस्वोवष्टिशतंशतीदशशतंलक्षंसहस्राधिपो । लक्षेशःक्षि तिपालतांक्षितिपतिश्चक्रेशतांवांछति ॥ चक्रेशःपुनरिंद्रतांसुर पतिर्ब्रह्मपदंवांछति । ब्रह्माशैवपदंशिवोहरिपदंआशावधि कोगतः ॥ ८ ॥ ॥ ॥ ॥ ॥

॥ इत्यष्टरत्नंसमाप्तं ॥ २ ॥

समरत्नं

वांछाराजातथाछेदो ।। वृसंवित्तेनकिंतथा ।।
स्वर्गोधनेनकिंक्षेयं ।। समरत्नमिदंक्रमात् ।।१।।

वांछासज्जनसंगमेपरगुणेप्रीतिर्गुरौनम्रता । विद्यायांव्य सनंस्वयोषितिरतिर्लोकापवादाद्भयम् ॥ भक्तिश्चक्रिणिशक्ति राम्मदमनेसंसर्गमुक्तिःखले । एतेयत्रवसंतिनिर्मलगुणास्ते म्योनेरम्योनमः ॥ १ ॥ राजाधर्मविनाद्विजःशुचिविनाज्ञा नंविनायोगिनः । कांतासत्यविनाहयोगतिविनाभूषाचज्यो तिर्विना ॥ योद्धाशूरविनातपोव्रतविनाछंदोविनागीयते । भ्रातास्नेहविनानरोहरिविनामुंचंतिशीघ्रंबुधाः ॥ २ ॥ छेद श्चंदनचूतचंपकवनेरक्षास्तिसाकोटके । हिंसाहंसमयूरको किलकुलेकाकेषुनित्यादरः ॥ मातंगेनखरक्रयःसमतुलाकर्पू रकार्पासयोः । एषायत्रविचारणागुणिगणेदेशायतस्मैनमः ॥ ३ ॥ वृक्षंक्षीणफलंत्यजंतिविहगाःशुष्कंसरःसारसाः । पुष्पं पर्युषितंत्यजंतिमधुपादिग्धंवनांतंमृगाः ॥ निर्द्रव्यंपुरुषंत्यजंति

गणिकाभ्रष्टश्रियंमंत्रिणः । सर्वैःकार्यवशाज्जनोभिरमतेक स्यास्तिकोवल्लभः ॥ ४ ॥ वित्तेनकिंवितरणंयदिनास्तिदीने । किंसेवयायदिपरोपकृतौनयत्नः ॥ किंसंगमेनतनयोयदिने क्षणीयः । किंयौवनेनविरहोयदिवल्लभायाः ॥ ५ ॥ स्वर्गः कियदिवल्लभानिजवधूः किंवाविभूषाविधिः । लावण्यंयदि किंसुधाकरकरैःशृंगारगर्भागिरः ॥ मृत्युःकियदिदुर्जनेष्ववन तिःकिंधिक्यदिमार्थना । मामेष्टःकरिकेतनोयदिभवेत्किंक ल्पभूमीरुहैः ॥ ६ ॥ धनेनकिंयोनददातियाचके । बलेनकि यश्चरिपून्नबाधते ॥ श्रुतेनकिंयोनचधर्ममाचरेत् । किमात्म नायोनजितेंद्रियोभवेत् ॥ ७ ॥ ॥ ॥

॥ इतिसप्तरत्नंसमाप्तं ॥ ३ ॥

षड्रत्नं

शास्त्रंकोर्थोस्तथामूर्खो ॥ दानंदुर्मंत्रिणंतथा ॥
लोभोप्यस्तीतिविज्ञेयं ॥ क्रमात्षड्रत्नमीरितं ॥ १ ॥

शास्त्रंसुचिंतितमथोपरिचिंतनीयं । आराधितोपिनृपतिःप रिशंकनीयः । अंकेस्थितापियुवतिःपरिरक्षणीया । शास्त्रेनृपेच युवतौचकुतोवशित्वं ॥ १ ॥ कोर्थान्प्राप्यनगर्वितोविषयिणः कस्यापदोनागताः । स्त्रीभिःकस्यनखंडितंभुविमनःकोनाम राज्ञांप्रियः ॥ कःकालस्यनगोचरांतरगतःकोर्थागतोगौरवं । को वादुर्जनवाग्यसेमपतितःक्षेमेणयातःपुमान् ॥ २ ॥ मूर्खोद्विजा तिःस्थविरोगृहस्थः । कामीदरिद्रोधनवान्तपस्वी ॥ वेश्याकुरू पानृपतिःकदर्यो ॥ लोकेषडेतानिविडंबितानि ॥ ३ ॥ दानंदरि

द्रस्यप्रभोश्चशांति । यूनांतपोज्ञानवतांचमौनं ॥ इच्छानिवृ
त्तिश्चसुखाश्रितानां । दयाचभूतेषुदिवंनयंति ॥४॥ दुर्मंत्रिणं
कमुपयांतिननीतिदोषाः । संतापयंतिकमपथ्यभुजंनरोगाः ॥
कंश्रीर्नदर्पयतिकंननिहंतिमृत्युः । कंस्त्रीकृतानविषयाननु
तापयंति ॥ ५ ॥ लोभोऽस्तिगुणेनकिंपिशुनतायद्यस्तिकिं
पातकैः । सौजन्यंयदिकिंपरैःसुमहिमायद्यस्तिकिंमंडनैः ॥
सत्यंचेत्तपसाचकिंशुचिमनोयद्यस्तितीर्थेनकिं ॥ सद्विद्याय
दिकिंधनैरपयशोयद्यस्तिकिंमृत्युना ॥ ६ ॥ ॥ ॥
॥ इतिषड्रत्नसमाप्तं ॥ ४ ॥

पंचरत्नं

नागःपोतस्तथायेयं ॥ ख्यातिःशक्र्यंधाकमं ॥
पंचरत्नामिदंप्रोक्तं । विदुषामपिदुर्लभं ॥ १ ॥

नागोभातिमदेनकंजलरुहैःपूर्णेदुनाशर्वरी । शीलेनप्रम
दाजवेनतुरगोनिन्योत्सवैर्मंदिरं ॥वाणीव्याकरणेनहंसमिथुनै
र्नद्यःसभापंडितैः। सत्पुत्रेणकुलंनृपेणवसुधालोकत्रयंविष्णुना
॥ १ ॥ पोतोदुस्तरवारिराशितरणेदीपोंऽधकारागमे । निर्वाते
व्यजनंमदांधकरिणांदर्पोपशांत्यैशृणिः ॥ इत्थंतद्भुविनास्ति
यस्यविधिनानोपायर्चिताकृता । मन्येदुर्जनचित्तवृत्तिहरणे
धातास्तिमग्रोद्यमः ॥२॥ वैद्यंपानरतंनटंकुपठितंस्वाध्यायहो
नंद्विजं । युद्धेकापुरुषंहयंगतरयंमूर्खंपरिव्राजकं ॥ राजानं
चकुमंत्रिभिःपरिवृतंदेशंषसोपद्रवं । भार्यायौवनगर्वितांपरर
तांपुंचंतुशीघ्रंबुधाः ॥ ३ ॥ क्षांतिश्चेत्कवचेनकिंकिमरिभिः

क्रोधोस्तिचेद्देहिनां । ज्ञातिश्चेदनलेनकिंयदिसुहृद्दिव्यौष धैःकिंफलं ॥ किंसर्पैर्यदिदुर्जनःकिमुधनैर्विद्यानवद्यामदि । व्रीडाचेत्किमुभूषणेनकवितायद्यस्तिराज्येनकिं ॥४॥ शक्यं वारयितुंजलेनहुतभूक्छत्रेणसूर्यातपः । नागेंद्रोनिशितांकुशेनसमदोदंडेनगोगर्दभौ ॥व्याधिर्वैद्यकभेषजैरनुदिनंमंत्रप्रभावाद्विषं । सर्वस्यौषधमस्तिशास्त्रविहितंमूर्खस्यनास्त्यौषधं ॥५॥

॥ इतिपंचरत्नंसमाप्तं ॥ ५ ॥

गुणरत्नं

सानंदंनंदिहस्ताहतमुरजरवाहूतकौमारबर्हि । त्रासान्नासाग्रर्धविशतिफणिपतीभोगसंकोचभाजि॥ गंडोद्दीनालिमालामुखरितककुभस्तांडवेशूलपाणेर्वैनायक्यश्रियंवोवदनविधुतयःपांतुचिन्कारवन्यः ॥ १ ॥ यत्कंठेगरलंविराजतिसदामौलौच मंदाकिनी । यस्यांकेगिरिजाननंकटितटेशार्दूलचर्मांबरं ॥ यन्मायाहिरुणद्धिविश्वमखिलंपायान्सवःशंकरः । जंबूवज्जलबिंदुवज्जलजवज्जंबालवज्जालवत् ॥२॥ विद्यानामनरस्यरूपमधिकंप्रच्छन्नगुप्तंधनं । विद्याभोगकरीयशःशुभकरीविद्यागुरूणांगुरुः ॥ विद्याबंधुजनोविदेशगमनेविद्यापरंदैवतं । विद्याराजसुपूजितानहिधनंविद्याविहीनःपशुः ॥ ३ ॥ गुणीगुणं वेत्तिनवेत्तिनिर्गुणो । बलीबलंवेत्तिनवेत्तिनिर्बलः ॥ पिकोवसंतस्यगुणंनवायसः ॥ करीचसिंहस्यबलंनमूषिकः ॥ ४ ॥ गुणागुणज्ञेषुगुणाभवंति । तेनिर्गुणंप्राप्यभवंतिदोषाः ॥ सुस्वादुतोयाःप्रभवंतिनद्यः । समुद्रमासाद्यभवंत्यपेयाः ॥ ५॥

गुणायंतेदोषाःसुजनवदनेदुर्जनमुखे । गुणादोषायंतेकिमिति जगतांविस्मयपदं ॥ यथाजीमूतोयंलवणजलधेर्वारिमधुरं । फणीपीत्वाक्षीरंवमतिगरलंदुःसहतरं ॥ ६ ॥ विद्याविवादायधनंमदाय । शक्तिःपरेषांपरिपीडनाय ॥ खलस्यसाधोर्विपरीतमेतत् । ज्ञानायदानायचरक्षणाय ॥ ७ ॥ मतिरेवबलाद्वरीयसी । तदभावेकरिणामियन्दशा ॥ इतिघोषयतीवडिंडिमः । करिणोहस्तिपकाहतःक्वणन् ॥ ८ ॥ वरंगर्भस्रावोवरमपिचनैवाभिगमनं । वरंजातःप्रेतोवरमपिचकन्याभिजननं ॥ वरंवंध्याभार्यावरमपिचगर्भेषुवसति । नचाविद्वानूरूपद्रविणगुणयुक्तोपितनयः ॥ ९ ॥ याराकाशशिशोभनागतघनासायामिनीयामिनी।यासौंदर्यगुणान्वितापतिरतासाकामिनीकामिनी॥यागोविंदरसप्रमोदमधुरासामाधुरीमाधुरी । यालोकद्वयसाधनीतनुभृतांसाचातुरीचातुरी॥१०।ज्ञातिभिर्लुठ्यतेनैव । चौरेणापिननीयते ॥ दानेनैवक्षयंयाति । विद्यारत्नंमहाधनं ॥ ११ ॥ अजरामरवत्प्राज्ञो । विद्यामर्थंचचिंतयेत् ॥ गृहीतइवकेशेषु । मृत्युनाधर्ममाचरेत् ॥ १२ ॥ गुणेनस्पृहणीयःस्यात् । नरूपेणयतोजनः ॥ सौगंध्यवर्ज्यनादेयं पुष्पंकांतमपिकचित् ॥ १३ ॥ ॥ ॥ ॥ ॥

॥ इतिश्रीमहाकविभवभूतिविरचितं
गुणरत्नंकाव्यंसमाप्तं ॥ ६ ॥

नीतिरत्नं

चतुर्मुखमुखांभोजशृंगाटकविहारिणी । नित्यमगल्भ

वाचालामुपनिष्ठसरस्वतीं ॥१॥ इतरपापफलानियथेच्छया ।
वितरतानिसहेचतुरानन ॥ अरसिकेषुकवित्वनिवेदनं ।
शिरसिमालिखमालिखमालिख ॥ २ ॥ संसारविषवृक्षस्य ।
द्वेफलेअमृतोपमे ॥ काव्यामृतरसास्वाद । आलापःसज्जनैःस
ह ॥ ३ ॥ पंडितेषुगुणाःसर्वे।मूर्खेदोषाश्चकेवलाः ॥ तस्मान्मू
र्खसहस्रेभ्यः । माज्ञएकोविशिष्यते ॥ ४ ॥ पुरोरेवापारेगि
रिरतिदुरारोहशिखरे । धनुर्बाणैःपश्चाच्छबरकवरोधावतिमृ
गं ॥ सरःसख्येऽसख्येदवदहनदाहव्यतिकरो । नगंतुंनस्था
तुंहरिणशिशुरेवंविलपति ॥ ५ ॥ भिनत्तिभीमंकरिराजकुं
भं । बिभर्तिवेगंपवनादतीव ॥ करोतिवासंगिरिगव्हरेषु । त
थापिसहःपशुरेवनान्यः ॥६॥ काकस्यचंचुर्यदिस्वर्णयुक्ता।
माणिक्ययुक्तौचरणौचतस्य ॥ एकैकपक्षेगजराजमुक्ता ।
तथापिकाकोनचराजहंसः ॥ ७॥ दिव्यंचूतरसंपीत्वा।नगर्वं
यातिकोकिलः ॥ पीत्वाकर्दमपानीयं । भेकोमकमकायते॥
॥ ८ ॥ अगाधजलसंचारी । नगर्वंयातिरोहितः ॥ अंगुष्ठोद
कमात्रेण । शफरीफर्फरायते ॥ ९ ॥ भद्रंकृतंकृतंमौनं ।
कोकिलैर्जलदागमे ॥ दर्दुरायत्रवक्तार । स्तत्रमौनंहिशोभ
नं ॥ १० ॥ मणिर्लुठतिपादाग्रे । काचःशिरसिधार्यते ॥ य
थैवास्तेतथैवास्तां । काचःकाचोमणिर्मणिः ॥ ११ ॥ का
कैःकृष्णःपिकःकृष्ण । स्त्वभेदःपिककाकयोः ॥ वसंतेसमु
पायाते । काकःकाकःपिकःपिकः ॥१२॥ वरंवनंव्याघ्रगजें
द्रसेवितं । द्रुमालयंपत्रफलांबुभोजनं ॥ तृणानिशय्यावसनं
चवल्कलं । नबंधुमध्येधनहीनजीवनं ॥ १३ ॥ साध्वीस्त्री

Digitized by Google

णांदयितविरहेमानिनांमानभंगे । सल्लोकानामपिजनरवेनिग्रहेपंडितानां ॥ अन्योद्वेकेकुटिलमनसांनिर्गुणानांविदेशे । भृत्याभावेभवतिमरणंकिंतुसंभावितानां ॥ १४ ॥

॥ इतिश्रीमहाकविवररुचिविरचितं नीतिरत्नंसंपूर्णं ॥ ७ ॥

नीतिसारं

गिरौकलापीगगनेपयोदा। लक्षांतरेऽर्कश्चजलेषुपद्माः ॥ इंदुर्द्विलक्षंकुमुदस्यबंधुर्योयस्यमित्रंनहितस्यदूरं ॥ १॥ माता निंदतिनाभिनंदतिपिताभ्रातानसंभाषते । भृत्यःकुप्यतिनानुगच्छतिसुतःकांताचनालिंगते ॥ अर्थमार्थनशंकयानकुरुतेऽप्यालापमात्रंसुहृत् । तस्मादर्थमुपार्जयस्वचसखेस्वार्थस्यसर्वेवशाः ॥ २ ॥ धनैर्निष्कुलीनाःकुलीनाभवंति । धनैरापदंमानवानिस्तरंति॥धनेभ्यःपरोबांधवोनास्तिलोके । धनान्यर्जयध्वंधनान्यर्जयध्वं ॥ ३ ॥ अर्थस्यपुरुषोदासो। दासस्त्वर्थोनकस्यचित् ॥ इतिसत्यंमहाराज । बद्धोस्म्यर्थेनकौरवैः ॥ ४ ॥ त्रिविक्रमोऽभूदपिवामनोऽसौ । सशूकरश्चेतिसवैनृसिंहः॥नीचैरनीचैरतिनीचनीचैः । सर्वैरुपायैःफलमेवसाध्यं ॥५॥ चलच्चित्तंचलद्वित्तं।चलज्जीवनयौवनं॥चलाचलमिदंसर्वं कीर्त्तिर्यस्यसजीवति ॥ ६ ॥ सजीवतियशोयस्य । कीर्त्तिर्यस्यसजीवति॥अयशोऽकीर्त्तिसंयुक्तो।जीवन्नपिमृतोपमः॥७। वृद्धस्यवचनंग्राह्यं । मापत्कालेह्युपस्थिते ॥ सर्वत्रैवविचारेण । नाहारेनचमैथुनं ॥ ८ ॥ क्वचिद्रुष्टःक्वचित्तुष्टो । रुष्टस्तु

ष्टःक्षणेक्षणे ॥ अव्यवस्थितचित्तस्यप्रसादोपिभयंकरः॥ ९ ॥
निमित्तमुद्दिश्यहियःप्रकुप्यति । ध्रुवंसतस्यापगमेप्रसीदति ॥
अकारणद्वेषिमनस्तुयस्य । कथंजनस्तंपरितोषयिष्यति ॥
॥ १० ॥ दशव्याघ्राजिताःपूर्वं । सप्तसिंहास्त्रयोगजाः ॥ प
श्चंतुदेवताःसर्वाअद्ययुद्धंत्वयामया ॥ ११ ॥ सिंहउवाच ।
गच्छशूकरभद्रंतेब्रूहिसिंहोमयाजितः । पंडिताएवजानंति
सिंहशूकरयोर्बलं ॥ १२ ॥ उद्योगिनंपुरुषसिंहमुपैतिलक्ष्मी ।
दैवेनदेयमितिकापुरुषावदंति ॥ दैवंनिहत्यकुरुपौरुषमात्मश
क्त्या । यत्नेकृतेयदिनसिध्यतिकोऽत्रदोषः ॥ १३ ॥एकाभा
र्यापकृतिमुखराचंचलाचद्वितीया । पुत्रस्त्वेकोभुवनविजयीम
न्मथोर्दुर्निवारः ॥ शेषःशय्याशयनमुदधौवाहनंपन्नगारिः ।
स्मारंस्मारंस्वगृहचरितंदारुभूतोमुरारिः ॥ १४ ॥ अतिदूरप
थश्रांता । श्छायायांयांतिचशीतलां॥ शीतलाश्चपुनर्यांति । का
कस्यपरिदेवना ॥ १५ ॥ अपमानंपुरस्कृत्य । मानंकृत्वाच
पृष्ठके ॥ स्वकार्यमुद्धरेत्प्राज्ञः । कार्यध्वंसोहिमूर्खता ॥१६॥
एकोहिदोषोगुणसन्निपाते । निमज्जतीन्दोरितियोबभाषे ॥
नूनंनदृष्टंकविनापितेन । दारिद्र्यदोषोगुणराशिनाशी ॥१७॥
कृतस्यकरणंनास्ति । मृतस्यमरणंतथा ॥ गतस्यशोचनामा
स्ति । ह्येतद्वेदविदांमतं ॥ १८ ॥ नाकालेम्रियतेजंतु । र्विद्धः
शरशतैरपि ॥ कुशकंटकविद्धोपि । सप्रकालोनजीवति ॥
॥ १९ ॥ निमग्नस्यपयोराशौ । पर्वतात्पतितस्यच ॥ तक्षके
नापिदष्टस्य । आयुर्मंत्राणिरक्षति ॥ २० ॥ करोतुनामनीति
ज्ञो । व्यवसायमितस्ततः ॥ फलंपुनस्तद्देवस्याद्बुद्धिर्धर्मनस्रि

पूर्वक २ उवाच

दृष्टः / °द्य

Digitized by Google

स्थितं ॥१२॥ ॥ इतिश्रीमहाकविघटकर्परविरचितं नीतिसारंसमाप्तं ॥ ८ ॥

नीतिप्रदीपः

रत्नाकरःकिंकुरुतेस्वरत्नै । विंध्याचलःकिंकरिभिःकरोति ॥ श्रीखंडखंडैर्मलयाचलःकिं । परोपकारायसतांविभूतिः॥१॥ दानार्थिनोमधुकरायदिकर्णतालै । दूरीकृताःकरिवरेणमदांधबुद्ध्या ॥ तस्यैवगंडयुगमंडनहानिरेषा । भृंगाःपुनर्विकचपद्मवनेचरंति ॥ २ ॥ येनाकारिमृणालपत्रमशनंक्रीडाकरिण्यासह । स्वच्छंदंभ्रमणंचकंदरगणेपीतंपयोनिर्झरं ॥ सोयंवन्यकरीनरेषुपतितःपुण्यातिदेहंतृणै । र्यद्दैवेनललाटपत्रलिखितंतन्मोज्झितुंकःक्षमः ॥ ३ ॥ शशिदिवाकरयोर्ग्रहपीडनं । गजभुजंगमयोरपिबंधनं ॥ मतिमतांचविलोक्यदरिद्रतां । विधिरहोबलवानितिमेमतिः ॥ ४ ॥ व्योमैकांतविहारिणोपिविहगाःसंग्रामुवन्त्यापदं । वध्यंतेनिपुणैरगाधसलिलान्मत्स्याःसमुद्रादपि ॥ दुर्नीतेहिविधौकिमस्तिचरितंकःस्थानलाभेगुणः । कालोहिव्यसनंमसारितकरोगृण्हातिदूरादपि ॥ ५ ॥ अपिदलन्मुकुलेबकुलेयया । पदमधायिकदापिनतृष्णया ॥ अहहसासहसाविधुरेविधौ । मधुकरीबदरीमनुवर्त्तते ॥ ६ ॥गतोस्मितीरंजलधेःपिपासया । सचापिशुष्कश्चुलकीकृतोमया ॥ नदृश्यतेदोषलवोपितोयधे । र्ममैवतत्कर्मफलंविजृंभते॥ ७ ॥ सिंहक्षुण्णकरींद्रकुंभगलितं रक्ताक्तमुक्ताफलं । कांतारेबदरीधियाद्रुतमगाद्भिल्लस्यपत्नी

मुदा ॥ पाणिभ्यामुपगुह्यशुष्ककठिनंतद्वीक्ष्यदूरेजहा । वस्था
नेपततामतीवमहतामेतादृशीस्याद्गतिः ॥ ८ ॥ किंतेनम्रत
याकिमुन्नततयाकिंतेघनच्छायया । किंतेपल्लवलीलयाकिम
नयाचाशोकपुष्पश्रिया ॥ यत्त्वन्मूलनिषण्णखिन्नपथिकस्तो
यैः स्तुवन्नन्वगा । नस्वादूनिमृदूनिखादतिफलान्युत्कंठमुत्कं
ठितं ॥ ९ ॥ दूरेमार्गान्निवससिपुनःकंटकैरावृतोसि । छाया
शून्यःफलमपिचतेवानरैरप्यभक्ष्यं ॥ निर्गंधस्त्वंमधुपरहितः
शाल्मलेसारशून्यः । सेवास्माकंभवतिविफलातिष्ठनिःश्व
स्ययामः ॥ १० ॥ हंसाःपद्मवनाशयामधुलिहःसौरभ्यलाभा
शया । पान्थाःस्वादुफलाशयाबलिभुजोगृध्राश्चमांसाशया॥
दूरादुन्नतपुष्परागनिकरैर्निःसारमिथ्योन्नतै । रेरेशाल्मलि
पादपप्रतिदिनंकेनत्वमावंचितः ॥ ११ ॥ किंतेनहेमगिरिणा
रजताद्रिणावा । यत्रस्थिताहितरवस्तरवस्तएव ॥ वंदामहे
मलयमेवयदाश्रयेण । शाकोटनिंबकुटजान्यपिचंदनानि ॥
॥१२॥ निर्वाणदीपेकिमुतैलदानं । चौरेगतेवाकिमुसावधानं॥
वयोगतेकिंवनिताविलासः ।पयोगतेकिंखलुसेतुबंधः॥१३॥शी
तेतीतेवसनमशनंवासरांतेनिशांते । क्रीडारंभःकुवलयदृशां
यौवनांतेविवाहः ॥ सेतोर्बंधःपयसिगलितेप्रस्थितेतल्प्रचिंता ।
सर्वंचैतद्भवतिविफलंस्वस्वकालेव्यतीते ॥ १४ ॥ नववस्त्रंनव
च्छत्रंनव्यास्त्रीनूतनंगृहं । सर्वत्रनूतनंशस्तंसेवकान्नेपुरातने॥
॥ १५ ॥ समायातिषदालक्ष्मी । र्नारिकेलफलांबुवत् ॥ विनि
र्यातिषदालक्ष्मी । र्गजभुक्तकपित्थवत् ॥ १६ ॥ ॥इतिश्री
महाकविवेतालभट्टविरचितंनीतिप्रदीपकाव्यंसमाप्तं ॥ ९ ॥

दृष्टांतशतकं

शिवस्मरणमेवैकं । संसारांतकनाशनं ॥ घनौघोघोर दावाग्नि । निर्वापणपटुर्भवेत् ॥ १ ॥ साधुरेवप्रवीणःस्यात् । सद्गुणामृतवर्णने ॥ नवचूतांकुरास्वाद । कुशलःकोकिलः किल ॥ २ ॥ दुर्जनोदूषयत्येव । सतांगुणगणंक्षणात् ॥ म लिनीकुरुतेधूमः । सर्वथाविमलांबरं ॥ ३॥ यथादोषोविभा त्यस्य । जनस्यनतथागुणः ॥ प्रायःकलंकएवेंदोः । प्रस्फु टोनप्रसन्नता ॥ ४ ॥ विवेकएवव्यसनं । पुंसांक्षपयितुंक्षमः॥ अपहर्तुसमर्थोसौ । रविरेवनिशातमः ॥ ५ ॥ प्रायःसंत्युप देशार्हा । धीमंतोनजडाशयाः ॥ तिलाःकुसुमसौगंध्य । वा हिनोनयवाःक्वचित् ॥ ६ ॥ चिंत्यतेनयएवादावमंदंसमुपे प्सुभिः ॥ विनम्यपूर्वंसिंहोपि । हंतिहस्तिनमोजसा ॥ ७ ॥ संस्थितस्यगुणोत्कर्षः । प्रायःप्रस्फुरतिस्फुटं ॥ दग्धस्यागुरु खंडस्यस्फारीभवतिसौरभं ॥ ८ ॥ मनस्वित्वंदयंधत्ते । रोषे णैवप्रसन्नतां ॥ भस्मनाज्वलदंगारः । प्रसादंलभतेतरां ॥९ ॥ उत्तमःक्लेशविक्षोभं । क्षमःसोढुंनहीतरः ॥ मणिरेवमहाशा ण । घर्षणंनतुमृत्कणः ॥ १० ॥ स्वजातीयविनावैरो । न जयःस्यात्कदाचन ॥ विनावज्रमणिंमुक्ता । मणिर्भेद्यःकथं भवेत् ॥ ११ ॥ सज्जनाएवसाधूनां । मथयंतिगुणोत्करं ॥ पु ष्पाणांसौरभंप्राय ।स्तनुतेदिक्षुमारुतः ॥१२ ॥उपकर्तुंयथास्व ल्पः । समर्थोनतथामहान् ॥ प्रायःकूपस्तृषांहंति । सततंन तुवारिधिः ॥ १ ३ ॥ सतिशीलेगुणाभांति । पुंसांशौर्यादयो

यथा ॥ यौवनेसदलंकाराः । शोभांबिभ्रतिसुभ्रुवः ॥ १४ ॥ जडःप्रभवतिप्रायो । दुःखंबिभ्रतिसाधवः । शीतांशावुदितेप द्माः । संकोचंयांतिवारिणि ॥ १ ५ ॥ गुणेनस्पृहणीयःस्या न्नरूपेणयुतोनरः । सौगंध्यहीनंनादेयं । पुष्पंकांतमपिक्वचि त् ॥ १६ ॥ कश्चित्कस्यचिदेवस्या । त्सुदृद्विघ्नंभभाजनं । पद्मंविकासयत्यर्कः । संकोचयतिकैरवं ॥ १ ७ ॥ ईश्वराः पिशुनान्शश्च । द्विषंतीतिकिमद्भुतं । प्रायोनिधयएवाहिन्। द्विजिव्हांदधतेतरां ॥ १८ ॥ संपद्यास्तेपरैःसाकं । विपदि स्वजनैर्जडः । जृंभत्यंभोरुहंभृंगः । शुष्यत्युदकशैवलैः ॥१९॥ नीचावमानमलिनां । प्रभुक्तेसंपदंपुमान् ॥ लशुनाक्तांसकर्पू रचर्चांवितनुतेतनौ ॥ २० ॥ व्यसनानंतरंसौख्यं । स्वल्पम प्यधिकंभवेत् ॥ काषायरसमास्वाद्य । स्वाद्वतीवांबुविंदते ॥ २१ ॥ गुणानामंतरंप्राय । स्तज्ज्ञोजानातिनेतरः ॥ माल तीमल्लिकामोदं । घ्राणंवेत्तिनलोचनं ॥ २२ ॥ प्रभूतवयशः पुंसोधियःपाकःप्रवर्त्तते ॥ जीर्णस्यचंदनतरो । रामोदउपजा यते ॥ २३ ॥ कामायस्पृहयन्त्यात्मा।संयतोपिमनीषिणः ॥ वीथीनियमितोप्युक्षा । शष्यमासाद्यधावति ॥ २४ ॥ धना गमेधिकंपुंसां । लोभमभ्येतिमानसं ॥ निदाघकालेमालेयः। प्रायःशैत्यंवहत्यलं ॥ २५ ॥ सहजोपिगुणःपुंसां । साधुवादे नवर्धते ॥ कामंसुरसलेपेन । कांतिवहतिकांचनं ॥ २६ ॥ निंदांयःकुरुतेसाधो । स्तथास्वंदूषयत्यसौ ॥ खे भूतिंयस्त्य जेदुच्चै । र्मूर्ध्नितस्यैवसापतेत् ॥ २७ ॥ स्वभावंनैवमुंचंति । संतःसंसर्गतोऽसतां ॥ नत्यजंतिरुतंमंजु । काकसंपर्कतःपि

Digitized by Google

कः ॥ २८ ॥ संपत्तौकर्कशंचित्तं । खलस्यापदिकोमलं॥ शीतलंकठिनंमाय । स्तप्तंमृदुभवेत्पयः ॥ २९ ॥ प्रायःप्र कुप्यतितरां । प्रीत्यैवप्रखलोजनः ॥ नयनंस्नेहसंपर्का । त्कालुष्यंसमुपेत्यलं ॥ ३०॥ शुभवाप्यशुभंकर्म । फलकालम पेक्षते ॥ शरद्येवफलत्याशु । शालिर्नसुरभौक्वचित् ॥ ३१ ॥ भोगेच्छानोपभोगेन । भोगिनांजातुशाम्यति ॥ लवणेनांत रालन । तृष्णाप्रत्युतजायते ॥ ३२ ॥ दुर्लभोप्युत्तमप्रायः । स्वजातीयेनलभ्यते ॥ कर्णकोटरगंवारि । वारिणैवावक्ष ष्यते ॥ ३३ ॥ जंतोर्निरुपभोगस्य । दश्यतेभुविरूक्षता ॥ वा ताशिनोद्विजिव्हत्वं । विहितंपश्यवेधसा ॥ ३४ ॥ ऊर्जितं सज्जनंदृष्ट्वा । द्वेष्टिनीचःपुनःपुनः ॥ कवलीकुरुतेखस्थं । वि धुंदिविविधुंतुदः ॥ ३५ ॥ नलभंतेविनोद्योगं । जंतवःसंपदां पदं ॥ सुराःक्षीरोदविक्षोभ । मनुभूयामृतंपपुः ॥ ३६ ॥ सं पत्तौकोमलंवित्तं । साधोरापदिकर्कशं ॥ सुकुमारंमधौपत्रं।त रोःस्यात्कठिनंशुचौ ॥ ३७ ॥ आकरःकारणंजंतो । र्दौर्ज न्यस्यनजायते ॥ कालकूटःसुधासिंधोः । प्राणिनांप्राण हारकः ॥ ३८ ॥ गुणदोषाववाप्येते । पुंसांसंशीलनाद्बुधैः ॥ लेभेपीयूषगरले । मंथनादंबुधेःसुरैः ॥ ३९ ॥ स्वभावंनजहा त्येव । साधुरापद्गतोपिसन् ॥ कर्पूरःपावकस्पृष्टः । सौरभं लभतेतरां ॥४०॥ नव्याग्निरेषागुणिनो । गुणवान्जायतेध्रुवं ॥ चंदनोऽनलसंदग्धो ॥ नभस्मसुरभिक्वचित् ॥ ४१ ॥ अप्या पत्समयःसाधोः । प्रयातिश्लाघनीयतां ॥ विधोर्विधुंतुदास्कं द । विपत्कालोपिसुंदरः ॥ ४२ ॥विनापरीक्षांनोतत्वं । प्रसि

द्धंज्ञायतेसतः ॥ स्ववर्मबन्धान्नोशुद्धि । र्ज्ञायतेकर्षणंविना ॥ ॥ ४३ ॥ प्राप्यवित्तंजडास्तूर्णं । निवृत्तियांतिनान्यथा ॥ तो यमासाद्यगर्जति । नरिक्तास्तनयित्नवः ॥ ४४ ॥ कार्यापे क्षीजनप्रायः । प्रीतिमाविष्करोत्यलं॥लोभार्थीशौंडिकःशष्पै। र्मेषंपुष्णातिपेशलैः ॥ ४५ ॥ दुर्जनोजीर्यतेयुक्तया । निग्रहे णनधीमता ॥ निपात्यतेमहावृक्ष।स्तत्समीपक्षितिक्षयात् ॥ ॥ ४६ ॥ सुखदुःखेसमेस्यातां । जंतूनांक्लेशहेतुके ॥ मूर्ध्नि स्थितानांकेशानां । भवेतांस्नेहछेदने ॥ ४७ ॥ दुष्टदुर्जन दौरात्म्यैः । सज्जनेरज्यतेजनः ॥ आरुह्यपर्वतंपान्थः । सा नौनिर्वृतिमेत्यलं ॥ ४७ ॥ स्वभावसुंदरंवस्तु । नसंस्कारम पेक्षते ॥ मुक्तारत्नस्यशाणाश्मा । घर्षणंनोपयुज्यते ॥ ४९॥ शोभतेविदुषांमध्येनैवनिर्गुणमानसः ॥ अंतरेतमसांदीपः । शोभतेनार्कतेजसा ॥ ५० ॥ युक्तयापरोक्षंबाधेत । विपक्षक्ष पणक्षमः ॥ शोषयत्यचिरेणैव । प्रांतरस्थमलंपयः ॥ ५१ ॥ दुर्गदेशप्रविष्टोपि । शूरोभ्येतिपराभवं ॥ गाढपंकनिमग्नां गो । मातंगोप्यवसीदति ॥ ५२ ॥ नयेनांकुरितंशौर्यं । ज यायनतुकेवलं ॥ अत्ययुक्तंविषंभुक्तंपथ्यंस्यादन्यथामृतिः॥ ॥ ५३ ॥ मृदुभिर्बहुभिःशूरःपुंभिरेकोनबाध्यते ॥ कपोतपो तकैरेकः । श्येनोजातुनबाध्यते ॥ ५४ ॥ येनात्मापण्यतांनी तः । सएवान्विष्यतेजनैः ॥ हस्तीहेमसहस्रेण । क्रियतेनमृ गाधिपः ॥ ५५ ॥ गुणोगुणांतरापेक्षी । स्वरूपख्यातिहेतवे॥ स्वभावबाल्यंलावण्यं । तारुण्येनमनोहरं ॥ ५६ ॥ सुलभं वस्तुसर्वस्य । नयान्यादरणीयतां ॥ स्वदारपरिहारेण ।

Digitized by Google

परदारार्थिनोजनाः ॥ ५७ ॥ विक्रीतंनिजमात्मामं । वस्त्रैः संस्कुरुतेजडः ॥ परेभ्यःस्वशरीरस्य । केवाभूषांवितन्वते ॥ ॥ ५८ ॥ क्षणक्षयिणिसापाये । भोगेरज्यंतिनोत्तमाः ॥ संन्यज्यांभोजकिंजल्कं । नमार्थयतिशैवलं ॥ ५९ ॥ असंभव गुणस्तुत्या । जायतेस्वात्मनस्त्रपा ॥ कर्णिकारंसुगंधीति । वदकेनोपहास्यते ॥ ६० ॥ धनाशयाखलीकारः । कस्यनामनजायते ॥ दूरादामिषलोभेन । बध्यतेखेचरःखगः ॥ ६१॥ तटस्थैःख्यापिताश्चेतो । विशंतिगुणिनांगुणाः ॥ उत्कोचिताना मांपद्मानां।गंधोवायुभिराहृतः ॥६२॥ निजाशयवदाभाति।पुंसांचित्तेपराशयः ॥ मतिमामुखचंद्राभे । कृपाणेयातिदीर्घतां ॥ ६३ ॥ अधमंबाधतेभूयो । दुःखवेगोनतूत्तमं ॥ पादद्वयंत्र जन्याशु।शीतस्पर्शोनचक्षुषी ॥ ६४ ॥ गुणवान्सुचिरस्थायी। देवोपिनाभिजायते ॥ तिष्ठत्येकांनिशांचंद्रः । श्रीमान्संपूर्णमंडलः ॥ ६५ ॥ यतएवागतोदोष । स्ततएवनिवर्तते ॥ अग्निदग्धस्यविस्फोट । शांतिःस्यादग्निनाध्रुवं ॥ ६६ ॥ स्वधियोनिश्चयोनास्ति । यस्यसभ्रमतेस्वयं ॥ भवातवालपत्रस्थः । पटस्तत्रनिदर्शनं ॥ ६७ ॥ कथाप्रबंधेवंश्येपि । कश्चिदेवानुरज्यते॥ प्रायःश्वासादपत्यंतः । सश्वसन्निवकेवलं ॥ ६८ ॥ बुद्धिमत्वाभिमानःको । भवेन्माज्ञोपजीविनां ॥ अन्यदेयैरलंकारै। नाहंकारोविभूषणे ॥ ६९ ॥ उत्तमोप्यधमस्यस्या । ज्ञांश्चानन्त्रकरःक्वचित्॥ कौस्तुभादीनिरत्नानि । ययाचेहरिरंबुधिं ॥ ७० ॥ प्रयत्नेसमकेकेचि । देवस्युःफलभागिनः ॥ क्षीरोदमथनादेवै।रमृतंप्राप्तिनासुरैः॥७१॥गुणैःपूजाभवेत्पुंसां।

Digitized by Google

नैकस्माज्जायतेकुलात् ॥ चूडारत्नंशशीशंभो । र्यानमुच्चैः श्रवाहरेः ॥७२॥ भोगःपरोपतापेन । पुंसांदुःखायनस्थिरः ॥ पानमप्यसृजःक्षिप्रं । स्वपीडायैजलौकसां ॥ ७३ ॥ नोप भोगपरानर्थान् । कोपिसंचिनुतेचिरं ॥ आखवःकिमलंका रा । नात्मन्यादृत्यकुर्वते ॥ ७४ ॥ विवर्णवच्चनैर्मन्यु । गूंढो प्यंतःप्रकाशते ॥ इंधनान्तरसंस्थैश्च । ज्वलत्यग्निःपयःक णैः ॥ ७५ ॥ निकटस्थंगरीयांस । मपिलोकोनमन्यते ॥ प वित्रामपियन्मर्त्या । ननमर्स्यतिजान्हवीं ॥ ७६ ॥ स्वजनः स्वान्मवज्ज्ञंतुर्ज्ञायतेगुणवान्परैः ॥गोपैर्गोपवदाज्ञायि । हरिर्दै वैर्जगत्पतिः ॥ ७६ ॥ उत्तमस्तोषमायाति । तदंगंपोष्यतेय दि ॥ वृक्षःमसीदतिमायः । पादाभ्यंगेननस्वयं ॥ ७७ ॥ स र्वत्रगुणवानेव । चकास्तिमथितेनरे ॥ मणिर्मूर्ध्नगलेबाहौ । पादपीठेपिशोभते ॥७८॥ उत्तमंसुचिरंनैव । विपदोभिभवंत्य लं॥राहुग्रसनसंभूता।क्षणोविच्छादयेद्विधुं॥७९॥प्रायःस्वभावंमु चंति । संतःसंसर्गतोऽसतां ॥ चंडाश्चंडातपात्पादा । हिमांशो रमृतसृजः ॥ ८० ॥ तुल्यंपरोपतापित्वं । क्रुद्धयोःसाधुनी चयोः ॥ नदाहेज्वलतोर्भिन्नं । चंदनेंधनयोःक्वचित् ॥ ॥ ८१ ॥ नभातिवांछावैजात्ये । नदेवाभांतिवादिनि ॥ अं जनंदूषणंवक्त्रे।भूषणंकिललोचने ॥ ८२ ॥ दुर्भगःस्यात्मकु ल्यायो । विभूत्यापिसतादृशः ॥ गोमयंश्रीनिवासेस्ति । नत थापिमनोहरं ॥ ८३ ॥ गुणानर्चंतिजंतूनां । नजातिंकेवलां क्वचित् ॥ स्फाटिकंभाजनंभग्नं । काकिण्यापिनगृह्यते ॥ ८४ ॥ आगच्छदुत्सवोभाति । यथैवनतथागतः॥हिमांशोरुद्

यःसायं । चकास्तिनेतथोषसि ॥ ८५ ॥ मनस्विनोनमन्यं
ते । परतःप्राप्यजीवनं॥ बलिभुगुभ्योनकाकेभ्यः ।स्पृहयंति
हिकोकिलाः ॥ ८६ ॥ संतोषक्षतयेपुंसा । माकस्मिकधना
गमः ॥ सरसांसेतुभेदाय । वर्षौघःसचनस्थितः ॥ ८७ ॥
जीर्यतेभूगतोप्यात्मा । कालेनात्मापिस्वर्गतः ॥ भवेत्श्मशान
मुद्यान । मुद्यानंचश्मशानभं ॥ ८९ ॥ उच्चशेखरगंवस्तु ।
शुभंस्यात्सुखकारणं ॥ उपशामयतेबाधं । यथैवामृतसंस्कृ
तं ॥ ९० ॥ संतुष्यत्युत्तमःस्तुत्या । धनेनमहताधमः ॥ म
सीदंतिजयैर्देवा । बलिभिर्भूतविग्रहाः ॥ ९१ ॥ स्वजातीय
विघाताय । माहात्म्यंदृश्यतेनृणां ॥ श्येनोविहंगमानेव ।
हिनस्तिनभुजंगमान् ॥ ९२ ॥ गुरुप्रयोजनोद्देशा । दर्चयं
तिनभक्तितः ॥ दुग्धदात्रीतिगौर्गेहे । पोष्यतेनतुधर्मतः ॥
॥ ९३ ॥ महतांतादृशंतेजो । यत्रशाम्यंत्यनोजसः ॥ अस्तं
यांतिप्रकाशेन।तारकाहिविवस्वतः ॥ ९४ ॥ दातादानस्यांत
रास्यान्पृथिव्यां।गेहेगेहेयाचकानांसमूहः॥ चिंतारंतस्यास्ति
सत्वेविवादो ॥ मार्गेमार्गेरेणवःसंत्यसंख्याः ॥ ९५ ॥ चारु
तआपवशेनपदार्थे । धैर्यैणतदनुवादिगुणत्वात् ॥ वेणुगोभ
वतिमंजुरसोयत् । यंत्रगोहिसुखदःकृतशब्दः ॥९६ ॥ नराःसं
स्कारार्हाजगतिकिलकेचिन्सुकृतिनः । समानायांजात्या
मपिवयसिसख्यांपरधियः ॥ अयंदृष्टांतोत्रस्फुटकरणतोप्य
भ्यसनतः । शुकःश्लोकान्वक्तुंप्रभवतिनकाकःक्वचिदपि ॥
॥ ९७ ॥ धनमपिपरदत्तंदुःखमौचित्यभाजां । भवतिहृदित
देवानंदकारीतरेषां ॥ मलयजरसबिंदुर्वर्धतेनप्रसन्नं । नयति

चरसवाहादिवमन्यंतमत्र ॥ ९८ ॥ कालक्रमेणपरिणामवशा दनव्या । भावाभवंतिखलुपूर्वमतीवतुच्छाः ॥ मुक्तामणि र्जलदतोयकणोप्यणीयान् । संपद्यतेचचिरकीचकरंध्रमध्ये॥ ॥ ९९ ॥ इयंकुसुमदेवेन ॥ कविनैकेननिर्मिता ॥ दृष्टांतक लिकानाम । जृंभतांकविमानसे ॥ १०० ॥ ॥ ॥

॥ इतिश्रीकुसुमदेवरचितंदृष्टांतशतकंसमाप्तं ॥ १० ॥

शांतिशतकं

अथपरितापोपशमःपरिच्छेदः १

नमस्यामोदेवान्ननुहतविधेस्तेपिवशगा । विधिर्वंद्यःसो पिप्रतिनियतकर्मैकफलदः ॥ फलंकर्मायत्तंकिममरगणैःकिं चविधिना । नमस्तत्कर्मभ्योविधिरपिनयेभ्यःप्रभवति॥१॥ यदिशांतौमनोदेयं । यदामुक्तिपदेरतिः ॥ तदाशिल्हनमिश्र स्य । पदमारभ्यतांधिया ॥ २ ॥ संतोषसंततिकरंविदुषांक वीनां । सांसारिकाप्रतिमदुःखविनाशबीजं । यत्नेनशांतिश तकंविदधेविवेकी । श्रीशिल्हनःप्रकृतिसुंदरशुद्धबुद्धिः ॥ ३॥ आत्मज्ञानविवेकंनिर्मलधियःकुर्वंत्यहोदुष्करं । यन्मुंचंत्युप भोगभाज्यपिधनाम्येकांततोनिस्पृहाः ॥ नप्रामानिपुरानसं प्रतिनचप्रार्थादृढप्रत्यया । वांछामात्रपरिग्रहाण्यपिवयंन्युक्तं नतानिक्षमाः ॥ ४ ॥ धन्यानांगिरिकंदरोदरभुविज्योतिःपरं

ध्यायताम् । आनंदाश्रुजलंपिबंतिशकुनानिःशंकमंकेस्थिताः ॥ अस्माकंतुमनोरथोपरचितप्रासादवापीतट । क्रीडाकाननकेलिमंडपजुषामायुःपरंक्षीयते ॥ ५ ॥ विशीर्णःप्रारब्धोवपुरपिजराव्याधिविधुरं । गतंदूरेविप्रस्वजनमरणंवांछितमपि ॥ इदानींव्यामोहादहहविपरीतेहतविधौ । विधेयंयत्तत्वंस्फुरतिममनाद्यापिहृदये ॥ ६ ॥ बीभत्साःप्रतिभांतिकिंनविषयाःकिंतुस्पृहायुष्मती । देहस्यापचयोमतौनिविशतेगाढोगृहेषुग्रहः ॥ ब्रह्मोपास्यमितिस्फुरत्यपिहृदिव्यावर्त्तिकावासना। कानामेषमतक्रयंहेतुगहनादैवीसतांयातना॥७॥ अजानन्दाहार्तिंविशतिशलभोदीपदहनं । नमीनोपिज्ञान्वादृतबडिशमश्नातिपिशितं ॥ विजानंतोप्येतान्वयमिहविपज्जालजटिला । न्नमुंचामःकामानहहगहनोमोहमहिमा ॥ ८ ॥ क्षांतंनक्षमयागृहोचितसुखंत्यक्तंनसंतोषतः । सोढादुःसहशीतवाततपनक्लेशानतप्तंतपः ॥ ध्यातंवित्तमहर्निशंनचपुनर्विष्णोःपदंशाश्वतं । तत्तत्कर्मकृतंयदेवमुनिभिस्तैस्तैःफलैर्वंचितं ॥ ९ ॥ कृत्वाशस्त्रविभीषिकांकतिपयग्रामेषुदीनाःप्रजा । मथ्नंतोविटजल्पितैरुपहताःक्षोणीभुजस्तेकिल॥विद्वांसोपिवयंकिलत्रिजगतीसर्गस्थितिव्यापदा । मोशस्तत्परिचर्ययानगणितोयैरेषनारायणः ॥१०॥ नार्थेश्रीपुरुषोत्तमेत्रिजगतामेकाधिपेचेतसा । सेव्येस्वस्यपदस्यदातरिसुरेनारायणेतिष्ठति ॥ यंकंचिन्पुरुषाधमंकतिपयग्रामेशमल्पार्थदं । सेवायैमृगयामहेनरमहोमूढावराकावयं ॥ ११ ॥ जन्मेदंवंध्यतांनीतं । भवभोगोपलिप्सया ॥ काचमूल्येनविक्रीतो । हंतचिंतामणिर्म

या ॥ १२ ॥ यांश्चाशून्यमयन्नलभ्यमशनंवायुःकृतोवेधसा।
व्यालानांपृषतास्तृणांकुरभुजःस्वस्थाःस्थलीशायिनः ॥ सं
सारार्णवलंघनक्षमधियांवृत्तिःकृतासानृणां । यामन्वेषयतां
प्रयांतिसततंसर्वेसमाप्तिंगुणाः ॥ १३ ॥ यद्वक्रंमुहुरीक्षसेन
धनिनांब्रूषेनचाटुंमृषा ॥ नैषांगर्वगिरःशृणोषिनपुनःप्रत्याश
याधावसि ॥ कालेबालतृणानिखादसिसुखंनिद्रासिनिद्राग
मे । तन्मेब्रूहिकुरंगकुत्रभवतालब्धंतपः ॥ १४ ॥ का
मंवनेषुहरिणा । स्तृणेनजीवंत्ययन्नसुलभेन ॥विद्धतिधनि
षुनदैन्यं । तेखलुपशवोवयंसुधियः ॥ १५ ॥ आस्वाद्यस्व
यमेववच्मिमहतीर्मर्मच्छिदोवेदना । माभूत्कस्यचिदप्ययंप
रिभवोयांचितसंसारिणः ॥ पश्यभ्रातरियंह्रियौवनजराधि
क्कारकेलिस्थली । मालम्लानमसीगुणव्यतिकरमागलभ्य
गर्वच्युतिः ॥ १६ ॥ क्वगंतासिभ्रातःकृतवसतयोयत्रध
निनः । किमर्थंप्राणानांस्थितिमनुविधातुंकथमपि ॥ धनैर्या
श्चालब्धैर्ननुपरिभवोऽभ्यर्थनफलं । निकारोग्रेपश्चाद्धनम
हहभोस्तद्धिनिधनं ॥ १७ ॥ प्राणानांबतकिंब्रुवेकठिनतां
तैरेवमाविष्कृता । निष्कामंतिकथंचिदेवहिनयेयाश्चावचो
भिःसमं ॥ आत्मानंपुनराक्षिपामिविदितस्थैर्योपियेषामहो ।
मिथ्याशंकिततद्वियोगविधुरोयत्मार्थयेसर्वशः ॥ ॥ १८ ॥
अमीषांप्राणानांतुलितबिसिनीपत्रपयसां । कृतेकिंनास्मा
भिर्विगलितविवेकैर्व्यवसितं ॥ यदीशानामग्रेद्रविणकणमो
हांधमनसां ।कृतंवीतव्रीडैर्निजगुणकथापातकमपि ॥ १९ ॥
बीभत्सविषयाजुगुप्सिततमःकायोवियोगत्वरं । सर्वैर्बंधुभि

रध्वनीवपथिकैर्योगेवियोगावहः ॥ हातव्यायमसारएषवि
वशःसंसारइत्यादिकं । सर्वस्यैवहिवाचितेसतिपुनःकस्यापि
पुण्यात्मनः ॥ २० ॥ तडिन्मालालोलंमतिविरतिदत्तांधतमसं।
भवेत्सौख्यंहित्वाशमसुखमुपादेयमनघं ॥ इतिव्यक्तोद्गारंच
टुलवचसःशून्यमनसो । वयंवीतव्रीडाःशुकइवपठामःपरममो
॥ २१ ॥ यदासौदुर्वारःप्रसरतिमदश्चित्तकरिण । स्तदातस्यो
द्दामप्रसररसरूढैर्ध्यवसितैः ॥ क्वतद्धैर्याम्लानंक्वचनिजकुला
चारनिगडः । क्वसालज्जारज्जुःक्वविनयकठोरांकुशमपि ॥२२
भिक्षाशनंभवनमायतनैकदेशः । शय्याभुवःपरिजनोनिज
देहभावः ॥ वासश्चजीर्णपटखंडनिबद्धकंथा । हाहातथापि
विषयान्नजहातिचेतः ॥ २३॥ त्वामुदरसाधुमन्ये । शाकैरपि
यदसिलब्धपरितोषं ॥ हतत्वदयंह्यधिकाधिक । वांछाशत
दुर्भरंनपुनः ॥ २४ ॥ शुचांपात्रंधात्रीपरिणतिरमेध्यप्रचयभू।
रयंभूतावासोविसृशकियतीयातिनदशां ॥ तदस्मिन्धीराणांक्ष
णमपिकिमास्थातुमुचितं । खलीकारःकोयंयदहमहमेवेतिर
भसः ॥ २५ ॥ रेतःशोणितयोरियंपरिणतिर्यद्धर्मतच्चाभवन् ।
मृत्योरास्पदमाश्रयोगुरुशुचांरोगस्यविश्रामभूः । जानन्प्यव
शीवयेकविरहान्मज्जन्विद्यांबुधौ।शृंगारीयतिपुत्रकाम्यतिव
तक्षेत्रीयतिस्त्रीयति ॥ २६ ॥ कैतद्वक्त्रारविंदंकतदधरमधुक्का
यतास्तेकटाक्षाः । कालापाःकोमलास्तेकचमदनधनुर्भंगुरो
भ्रूविलासः ॥ इत्थंखट्वांगकोटौमकटितदशनंमंजुगुंजत्समीरं।
रागांधानामिवोच्चैरुपहसतिमहामोहजालंकपालं ॥२७॥ शृणु
त्वदयरहस्यंयत्प्रशस्तंमुनीनां । नखलुनखलुयोपिन्सन्निधिः

संविधेयः ॥ हरतिहिहरिणाक्षीक्षिप्तमक्षिक्षुरम । महतशमत
नुत्रंचित्तमप्युत्तमानां ॥ २८ ॥ समाश्लिष्यन्त्युच्चैर्घनपिशित
पिंडस्तनधिया। मुखंलालाक्लिन्नंपिबतिचषकंसासवमिव॥अ
मेध्यक्लेदार्द्रेपथिचरमतेस्पर्शरसिको ।महामोहांधानांकिमपि
रमणीयंनभवति ॥ २९ ॥ इतिशांतिशतकेपरितापोपशमोना
मप्रथमःपरिच्छेदः ॥

अथविवेकोदयःपरिच्छेदः २

अयमविचारितचारुतया । संसारोभातिरमणीयः ॥ अ
त्रपुनःपरमार्थदृशा । नकिमपिसारमणीयः ॥ १ ॥ केनाप्य
नर्थरुचिनाकपटंप्रयुक्तं । एतन्मुग्धजनयबंधुमयंविचित्रं ॥ क
स्यात्रकःपरिजनःस्वजनोजनोवा । स्वर्मेद्रजालसदृशःखलु
जीवलोकः ॥ २ ॥ आरंभःसंशयानामविनयभवनंपत्तनंसा
हसानां । दोषाणांसन्निधानंकपटशतमयंक्षेत्रमप्रत्ययानां ॥
दुस्त्याज्यंयन्महद्भिःसुरनरवृषभैःसर्वमायाकरंडं । स्त्रीरूपंके
नलोकेविषमसृतमयंधर्मनाशायसृष्टं ॥ ३ ॥ यदाप्रकृत्यैवज
नस्यरागिणो । भृशंप्रदीप्तोद्दिमन्मथानलः ॥ तदात्रभूयः
किमनर्थपंडितैः । कुकाव्यहव्याहुतयोनिवेशिताः ॥ ४ ॥
दधतितावदमीविषयाःसुखं । स्फुरतियावदियंन्मदिमूढता ॥म
नसितत्वविदांतुविवेचकेकविषयाःकसुखंकपरिग्रहः ॥५॥ य
दापूर्वनासीदुपरिचतथानैवभविता ॥ तदामध्यावस्थाक्षणप
रिचयोभूतनिचयः ॥ अतःसंयोगेऽस्मिन्परिणतिवियोगेचस
हजे । किमाधारमेमाःकिमधिकरणाःसंतुचशुचः ॥ ६ ॥ इंद्र
स्याशुचिशूकरस्यचसुखेदुःखेचनास्त्यंतरं । स्वेच्छाकल्पन

यातयोःखलुसुधाविष्टाचकाम्याशनं ॥ रंभाचाशुचिशूकरीच परमप्रेमास्पदंमृत्युतः । संत्रासोपिसमःस्वकर्ममतिभिश्चान्यो न्यभावःसमः ॥ ७ ॥ कृमिकुलचितंलालाकीर्णेविगंधिजुगुप्सितं । निरुपमरसप्रीत्याखादन्नरास्थिनिरामिषं ॥ सुरपति मिवपार्श्वस्थंश्वासशंकितमीक्षते । गणयतिनहिक्षुद्रोलोकः परिग्रहफल्गुतां ॥ ८ ॥ अमीषांजंतूनांकतिपयनिमेषस्थिति जुषां । वियोगेधीराणांकइहपरितापस्यविषयः ॥ क्षणादुत्प द्यंतेविलयमपियांतिक्षणममी । नकेपिस्थातारःसुरगिरिपयो धिमरुतयः ॥ ९ ॥ पुत्रःस्यादितिदुःखितःसतिसुतेतस्यामयेदुः खित । स्तद्दुःखादिकमार्जनेतदनयेतन्मूर्खतादुःखितः ॥ जात श्चेत्सगुणोऽथतन्मृतिभयंतस्मिन्मृतेदुःखितः । पुत्रव्याजमुपा गतोरिपुरयंमाकस्यचिज्जायतां ॥ १० ॥ स्थिरापायःकायः श्रणयिषुसुखंस्थैर्यविमुखं । महाभोगारोगाःकुवलयदृशःसर्प सदृशः ॥ महावेशःक्लेशःप्रकृतिचपलाश्रीरपितथा । यशः स्मैरीवैरीतदपिनहितंकर्मविहितं ॥ ११ ॥ अर्थमाणविनाश संशयकरींप्राप्यापदंदुस्तरां । मन्यासन्नभयंनवेत्तिविभवंस्वे जीवितंकांक्षति ॥ उत्तीर्णस्तुततोधनार्थमपरांभूयोविशन्यापद । प्राणानांचधनस्यचाधमधियामन्योन्यभावःपणः ॥१२॥ विमलमतिभिःकैरप्येतज्जगज्जनितंपुरा । विधृतमपरैर्दत्तंचा न्यैर्विजित्यतृणंयथा ॥ इहहिभुवनान्यन्येवीराश्चतुर्दशभुंजते। कतिपयपुरस्वाम्येपुंसांकएषमदज्वरः ॥ १३ ॥ रम्यंहर्म्यतलं नकिंवसतयेश्राव्यंनगीतादिकं । किंवाप्राणसमासमागमसुखं नैवाधिकमीतये ॥ किंतुप्रांतपतत्पतंगपवनव्यालोलदीपांकुरा।

छायाचंचलमाकलय्यसकलंसंतोवनांतंगताः ॥ १४ ॥ आ
स्तामकंटकमिदंवसुधाधिपत्यं । त्रैलोक्यराज्यमपितच्चतृणा
यमन्ये ॥ निःशंकसुमहरिणीकुलसंकुलासु । चेतःपरंवलित
शैलवनस्थलीषु ॥ १५॥ हरिणचरणक्षुण्णोपांताःसशाद्वलनि
र्झराः । कुसुमशबलैर्विश्वग्वातैस्तरंगितपादपाः ॥ विविधवि
हगश्रेणीचित्रध्वनिमतिनादिता । मनसिनमुदःकेषांदध्युःशि
वावनभूमयः ॥ १६ ॥ तेतीक्ष्णदुर्ज्जननिकारशरैरभिन्ना ।
धीरास्तएवशमसौख्यभुजस्तएव ॥ सीमंतिनीभुजलतागहनं
व्युदस्य । येऽवस्थिताःशमफलेषुतपोवनेषु ॥ १७ ॥ कुरंगाः
कल्याणंमतिविटपमारोग्यमटवि । श्रयंतिक्षेमंतेपुलिनकुश
लंभद्रमुपलाः ॥ निशांतादस्वंतान्कथमपिविनिष्क्रांतमधुना ।
मनोऽल्पाकंदीर्घामभिलषतियुष्मत्परिचितिं ॥ १८ ॥ वासो
वल्कलमास्तरःकिशलयाभ्योकस्तरूणांतलं । मूलानिक्षतये
क्षुधांगिरिनदीतोयंतृषाशांतये ॥ क्रीडामुग्धमृगैर्वयांसिसुहृ
दोनक्तंमदीपःशशी । स्वाधीनेविभवेतथापिकृपणायाचंतइ
त्यद्भुतं ॥ १९ ॥ शय्याशाद्वलमासनंशुचिशिलासद्मद्रुमाणा
मधः । शीतंनिर्झरवारिपानमशनंकंदःसहायामृगाः ॥ इत्य
र्थितसर्वलभ्यविभवेदोषोऽयमेकोवने । दुष्प्रापार्थिनियत्प
रार्थघटनायत्नैर्विनास्थीयते ॥२० ॥ पुरयित्वार्थिनामाशां ।
भियंकृत्वाद्विषामपि ॥ पारंगत्वाश्रुतौघस्य । धन्यावनमुपास
ते ॥ २१ ॥ आहारःफलमूलमात्मरचितंशय्यामहीवल्कलं ।
संवीतायपरिच्छदःकुशसमित्पुष्पाणिपुत्राभृगाः ॥ वस्त्रान्ना
श्रयदानभोगविभवानिर्यत्रणाशाखिनी । मित्राणीत्यधिकंगृ

हेषुगृहिणांकिनामदुःखादते ॥ २२ ॥ विवेकःकिसोपिस्वर सजनितायत्रनरुपा । सकियोगोयस्मिन्नभवतिपरानुग्रहर सः ॥ सकिधर्मोयत्रस्फुरतिनपरद्रोहविरतिः । श्रुतंकिंतद्वा स्यादुपशमफलंयन्नभवति ॥ २३ ॥ अथैकस्यचिदस्तिकंचि दभितःकेनापिपृष्ठेकृतः । संसारःशिशुभावयौवनजराभारावतारादयं । बालस्तंबहुमन्यतामसुलभंप्राप्तंयुवासेवतां । वृद्धस्तंविषयाद्वहिष्कृतइवव्यावृत्त्यकिंपश्यति ॥ २४ ॥ पुत्रदारादिसंसारः । पुंसांसंमूढचेतसां ॥ विदुषांशास्त्रसंसारः । सयोगाभ्यासविघ्नकृत् ॥ २५ ॥ सार्वभौमभवनंवनवासो । निःस्वभावभवभावनयाते ॥ बालिशोहिविषयैंद्रियचौरै । र्मुच्यते स्वभवनेचवनेच ॥ २६ ॥ स्थूलमावरणोतिपूर्वंकथकःकाशाश्रुलालाविलो । भग्नोरःकटिपृष्ठजानुदशनोमुग्धोऽतिथीन्वारयन् ॥ शृण्वन्धृष्टवधूवचांसिधनुषासंत्रासयन्वायसान् । आशापाशनिबद्धजीवविभवोवृद्धोगृहेग्लायति ॥ २७ ॥ वनेषुदोषाःप्रभवंतिरागिणां । गृहेषुपंचेंद्रियनिग्रहस्तपः ॥ अकुत्सितेकर्मणियःप्रवर्त्तते । निवृत्तरागस्यगृहंतपोवनं ॥ २८॥ इतिशांतिशतकेविवेकोदयोनामद्वितीयःपरिच्छेदः ॥ २ ॥

अथकर्त्तव्यतोपदेशपरिच्छेदः ॥ ३ ॥

महतापुण्यपण्येन । क्रीतेयंकायनौस्वया ॥ पारंदुःखोदधेर्गंतुं । त्वरयायन्नभिद्यते ॥ १ ॥ दिवसरजनीकूलच्छेदैःपतद्भिरनारतं । वहतिनिकटेकालःस्रोतःसमस्तभयावहं ॥ इह हिपततांनास्त्यालंबोनचापिनिवर्त्तनं । तदिहमहतांकोयमो

होयदेषमदाविलः ॥ २ ॥ अवश्यंयातारश्चिरतरमुषित्वापिविषया । वियोगेकोभेदस्त्यजतिनजनोयंस्वयमिमान् ॥ व्रजंतःस्वातंत्र्यात्परमपरितापायमनसः । स्वयंमुक्तास्तेशमसुखमनंतंविदधति ॥ ३ ॥ भवारण्यंभीमंतनुगृहमिदंछिद्रबहुलं । बलीकालश्चौरोनियतमसितामोहरजनी ॥ गृहीत्वाज्ञानासिं विरतिफलकंशीलकवचं । समाधानंकृत्वास्थिरतरदृशोजागृतजनाः ॥ ४ ॥ गृहेपर्यंकस्थेद्रविणकणमेषंश्रुतवता । स्ववेश्मान्यारक्षाक्रियतइतिमार्गोऽयमुचितः ॥ नरान्गेहाद्गेहात्मतिदिवसमाकृष्यनयतः । कृतांताश्चिंशंकानहिभवतिरेजागृतजनाः ॥ ५ ॥ केयूयंनोवयमितिचवःकेभवामोभवाब्धौ । कर्मोर्मीणांविषमवलनैःफेनवत्पुंजिताःस्मः ॥ तत्क्षेपीयःक्षयिणिविषयेचित्तमाधायपुत्राः । सर्वारंभैर्लगतजगतामंतरात्मन्यनंते ॥ ६ ॥ सूक्तिकर्णसुधांव्यनक्तुसुजनस्तस्मिन्नमोदामहे । ब्रूतांवाचमसूयकोविषमुचंतस्मिन्नखिद्यामहे ॥ यायस्यप्रकृतिःसतांवितनुतांकिंनस्तयाजायते । कुर्मस्तत्खलुकर्मजन्मनिगडच्छेदाययज्जायते ॥ ७ ॥ मेनिंदयायदिजनःपरितोषमेति । नन्वप्रयत्नसुलभोऽयमनुग्रहोमे ॥ श्रेयोर्थिनोहिपुरुषाःपरतुष्टिहेतो । दुःखार्जितान्यपिधनानिपरित्यजंति ॥ ८ ॥ स्वधर्मपीडामपहाययोऽयं । मत्पापशुद्ध्यर्थमिहप्रवृत्तः ॥ न चेत्क्षमामप्यहमस्यकुर्यां । मत्तःकृतघ्नोवदकीदृशोऽन्यः ॥९॥ कश्चिन्पुमांक्षिपतिमांप्रतिरुक्षवाक्यैः । सोऽहंक्षमाभवनमेत्यमुदंप्रयामि ॥ शोकंव्रजामिपुनरेवमयंतपस्वी । चारित्रतःस्खलितवानितिमन्निमित्तं ॥ १० ॥ आत्मान्मन्यवधीयतांगृहव

शाद्वैराग्यमाधीयतां । बंधुभ्योऽप्यवधीयतांसुरसरित्तीरेसदा स्थीयतां ॥ भिक्षार्थंव्यवसीयतांप्रतिदिनंसत्कर्मसंचीयतां । कोपश्चेतसिहीयतांपरतरंब्रह्मानुसंधीयतां ॥ ११ ॥ यत्क्षांतिः समयेश्रुतिःशिवशिवेत्युक्तौमनोनिर्वृति । भैक्षेचाभिरुचिर्धने षुविरतिःशश्वत्समाधौरतिः ॥ एकांतेवसतिर्गुरौप्रतिनतिःस द्भिःसमंसंगतिः। सत्वेमीतिरनंगनिर्जितरसौसन्मुक्तिमार्गेस्थि तिः ॥ १२ ॥ संभोगाद्विषयामिषस्यपरितस्तैमित्यमस्ताखि ल । ज्ञानोन्मेषतयाकथंतवभवेदाम्मास्पदंदेहिनः ॥ साध्यं तद्धितदेवसाधनमितोव्यावृत्तिरेवामिषात् । तस्यांज्योतिरुपै ष्यतिधनमिदंदोषत्रयंधक्ष्यति ॥ १३॥ बुद्धेरगोचरतयानगिरां प्रचारो । दूरेगुरुप्रथितवस्तुकथावतारः ॥ तत्त्वंक्रमेणविदुषां करुणावदाते । श्रद्धावतांन्दिदिपदंस्वयमादधाति ॥ १४ ॥ दुःखांगारकतीव्रः । संसारोऽयंमहानसोगहनः ॥ इहविषया मिषलालसं । मानसमार्जारमानिपत ॥ १५ ॥ अरेचेतोमीन भ्रमणमधुनायौवनजले । त्यजत्वंस्वच्छंदंयुवतिजलधौपश्य सिनकिं ॥ तनूजालीजालंस्तनयुगलतुंबीफलयुतं । मनोभूः कैवर्त्तःक्षिपतिपरितस्त्वांप्रतिमुहुः ॥ १६ ॥ विषयविषधराणां दोषदंष्ट्रोत्कराणां । विषयविषविमर्दव्यक्तदुश्चेष्टितानां ॥ वि रमविरमचेतःसन्निधानादमीषां । सुखकणमपिनाहोसाहसं मास्मकार्षीः ॥१७ ॥ एकीभूयस्फुटमिवकिमप्याचरद्भिःमली नै । रेभिर्भूतैःस्मरकृतिकृतास्वांततेविप्रलंभाः ॥ तस्मादेषांन्य जपरिचयांचितयस्वव्यवस्थाम् । आभाषस्तेकिमुनविदितः खंडितःपंडितःस्यात् ॥ १८ ॥ धूर्त्तैरिंद्रियनामभिःमणयितामा

पादयद्भिःस्वयं । संभोक्तुंविषयानयंकिलपुमान्सौख्याशया वंचितः ॥ तैःशेषेकृतकृत्यतामुपगतैरौदास्यमालंबितं । संभ न्येषविधेर्नियोगवशगःकर्मातरैर्बध्यते ॥ १९ ॥ दैवेसमर्प्यचि रसंचितमोहजालं । सुस्थाःसुखंवसतकिंपरयाचनाभिः ॥ मेरुं मदक्षिणयतोऽपिदिवाकरस्य । नेतस्यसप्ततुरगानकदाचिदृष्टौ ॥ २० ॥ आकाशमुत्पततुगच्छतुवादिगंतं । अंभोनिधिंविश तुतिष्ठतुवायथेष्टं ॥ जन्मांतरार्जितशुभाशुभकर्म्मराणां । छाये वनन्यजतिकर्मफलानुबंधः ॥ २१ ॥ उपशमफलाद्विद्याबी जात्फलांतरमिच्छतां । भवतिविफलोयन्प्रारंभस्तदत्रकिमद्भु तं ॥ नियतविषयाह्येतेभावानयांतिविपर्ययं । जनयतियतः शालेर्बीजंनजातुयवांकुरं ॥ २२ ॥ येदेतेसाधूनामुपरिविमुखाः संतिधनिनो । नचैषावज्ञैषामपितुनिजवित्तव्ययभयं ॥ अतः खेदोनास्मिन्नरममनुकंप्यैवभवति । स्वमांसत्रस्तेभ्यःकइहह रिणेभ्यःपरिभवः ॥ २३ ॥ तस्मादनंतमजरंपरमंविकाशि । तद्ब्रह्मवांछतबुधायदिचेतनास्ति । यस्यानुशंगतइमेभुवनाधि पत्य । भोगादयःक्षयिणएवसतांविभांति ॥ २४ ॥ इतिशांति शतकेकर्त्तव्यतोपदेशोनामतृतीयःपरिच्छेद. ॥ ॥ ३ ॥

अथब्रह्मप्राप्तिपरिच्छेदः ॥ ४ ॥

लक्ष्मीर्निर्वृतिमेतिहीनचरितैर्यैरेवतच्छिक्षया ॥ किंना यैवकरोमितामनुचरींरामांसकामामिव ॥ ब्रह्मांडेनिपतन्त्यपि स्खलतिनप्रायेणयेषांमन । स्तेषामार्यमनस्विनामनुपदंगंता स्मिनाहंयदि ॥१॥ लब्धाश्रियःसकलकामदुघास्ततःकिंसंत

पिताःप्रणयिनोविभवैस्ततःकिंन्यस्तंपदंशिरसिविद्विषतांततः किं ।कल्पस्थितंतनुभृतांतनुभिस्ततःकि॥२॥निष्कंदाःकिमुकंदरोदरभुवःक्षीणास्तरूणांम्वचः।किंशुष्काःसरितःस्फुरद्विरिगुरुग्रावस्खलद्वीचयः ॥ मन्युत्थानमितस्ततःप्रतिदिनंकुर्वद्भिरुद्वीविभि । र्यद्द्वारापितदृष्टिभिःक्षितिभुजांविद्वद्भिरध्यास्यते॥ ॥ ३ ॥ कामंजीर्णपलाशसंहतिकृतांकंथांवसानोवने । कुर्यांबुभिरप्ययाचितसुखैःप्राणानुबंधस्थितिं ॥ सांगग्लानिसवेपितंसचकितंस्वांतंनिदाघज्वरं । वक्तुंनत्वहमुत्सहेसकृपणंदेहीतिदीनंवचः ॥ ४ ॥ सभ्यंवक्तुमशेषमस्तिसुलभावाणीमनोहारिणी । दातुंदानवरंशरण्यमभयंस्वच्छंपितृभ्योजलं ॥ पूजार्थंपरमेश्वरस्यविमलःस्वाध्याययज्ञःपरं । क्षुब्धाधेःफलमूलमस्तिशमनंक्लेशान्मकैःकिंधनैः ॥ ५ ॥ संतिस्वादुफलावनेषुतरवःस्वच्छंपयोनिर्झरं । वासोवल्कलमाश्रयोगिरिगुहाशय्यालतावल्लरी ॥ आलोकायनिशासुचंद्रकिरणाःसख्यंकुरंगैःसह । स्वाधीनेविभवेप्यहोनरपतिंसेवंतइत्यद्भुतं ॥ ६ ॥ पाणिःपात्रंपवित्रंभ्रमणपरिगतंभैक्षमक्षय्यमन्नं । वस्त्रंविस्तीर्णमाशादशकममलिनंतल्पमस्वल्पमुर्वी ॥ येषांनिःसंगतांगीकरणपरिचितिःस्वांतसंतोषणस्ते । धन्याःसन्यस्तदैन्यव्यतिकरनिकराःकर्मनिर्मूलयंति ॥ ७ ॥ महाशय्याभूमिर्मसृणमुपधानंभुजलता । वितानंचाकाशंव्यजनमनुकूलोऽयमनिलः ॥ स्फुरच्चंद्रोदीपःस्वधृतिवनितासंगमुदितः । सुखंशांतःशेतेविगततवभीतिर्नृपइव ॥८॥ धैर्यंयस्यपिताक्षमाचजननीशांतिश्चिरंगेहिनी । सत्यंसूनुरयंदयाचभगिनीभ्रातामनःसंय

मः ॥ शय्याभूमितलंदिशोपिवसनंज्ञानामृतंभोजनंयस्यैतेहि कुटुंबिनोवदसखेकस्माद्भयंयोगिनः ॥ ९ ॥ धिग्धिक्कामान्कमिनीविशेषवपुषःस्फूर्जन्महासिद्धयो । निष्पंदीकृतशांतयोपिचतमःकारागृहेष्वासते ॥ तंविद्मोसमिहस्तुमःकरपुटीभिक्षान्नशाकेपिवा । बालावच्चसरोजिनीमधुनिवायस्याविशेषोवशः ॥ १० ॥ मातर्लक्ष्मिमभजस्वकिंचिदपरंमत्कांक्षिणीमास्मभूः । भोगेभ्यःस्पृहयालवस्तववशाःकानिस्पृहानामसि ॥ सद्यःस्यूतपलाशपत्रपुटिकापात्रेपवित्रीकृते । भिक्षाशक्तुभिरेवसंप्रतिवयंवृत्तिंसमीहामहे ॥ ११ ॥ जिह्मेलोचननासिकेश्रवणहेत्वक्षापिनोवार्यसे ।सर्वेभ्यस्तुनमस्कृतांजलिरहंसंप्रश्रयंप्रार्थये ॥ युष्माकंयदिसम्मतंतदधुनानात्मानमिच्छाम्यहं । होतुंभूमिभुजांनिकारदहनज्वालाकरालेगृहे ॥ १२॥ गतःकालोयत्रप्रणयिनिमयिप्रेमकुटिलः । कटाक्षःकालिंदीलघुलहरिवृत्तिःप्रभवति । इदानीमस्माकंजठरकमठीपृष्ठकठिना ॥ मनोवृत्तिस्तांकिंव्यसनिविमुखैवक्षपयसि ॥ १३ ॥ यदासीदज्ञानंस्मरतिमिरसंस्कारजनितं । तदाज्ञातंतारामयमिदमशेषंजगदपि ॥ इदानीमस्माकंपटुतरविवेकांजनजुषां । समीभूतादृष्टिस्त्रिभुवनमपिब्रह्ममनुते ॥ १४ ॥ गतःकालोयत्रद्विचरणपशूनांक्षितिभुजां । पुरःस्वस्तीत्युक्तौविषयसुखमास्वादितमभूत् ॥ इदानीमस्माकंतृणमिवसमस्तंकलयतां । अपेक्षाभिक्षायामपिकिमपिचेतल्लघयति ॥ १५ ॥ पूर्वंतावत्कुवलयदृशांलोललोलैरपांगै । राकर्षद्भिःकिमपिहृदयंपूजितायौवनश्रीः ॥ संप्रत्यंतर्निहितसदसद्भावलब्धप्रबोध । मन्याहारैर्वि

षदन्हदयेवर्ततेकोपिभावः ॥ १६ ॥ गंगातीरेहिमगिरिशिला बद्धपद्मासनस्य । ब्रह्मज्ञानाभ्यसनविधिनायोगनिद्रांगतस्य॥ किंतैर्भाव्यंममसुदिवसैर्यत्रतेनिर्विशंकाः । संभाप्स्यंतेजठरहरिणागात्रकंडूविनोदं ॥ १७ ॥ कदाभिक्षाभक्तैःकरकलितगंगांबुतरलैः । शरीरंमेस्थास्यत्युपरतसमस्तेंद्रियसुखं ॥ कदाब्रह्माभ्यासस्थिरतनुतयारण्यविहगाः । पतिष्यंतिस्थाणुभ्रमहतधियःस्कंधशिरसि ॥ १८ ॥ रथ्यांतश्चरतस्तथाधृतजरत्कंथांचलस्याश्वगैः । सत्रासंचसकौतुकंचसकृपंदृष्टस्यतैर्नागरैः ॥ निर्व्याजीकृतचिन्मुधारसमुदानिद्रायमाणस्यमे । निःशंकःकरटःकदाकरपुटीभिक्षांविलुंठिष्यति ॥ १९ ॥ एणाक्षीस्पृहयालुतानकथमप्यास्तेविवेकोदया । न्लिंग्यंमच्युतिशंकयाक्षणमपिस्वर्गेनमोदामहे ॥ अप्यन्येषुविनाशिवस्तुविषयाभोगेषु तृष्णानमे । स्वर्णद्याःपुलिनेपरंहरिपदध्यानंमनोवांछति ॥ ॥ २० ॥ अयिबोधांबुधौभावः । स्वच्छोयंविश्वबुद्बुदः ॥ विनीतउदितोवेतिविकल्पपटलंमनः ॥ २१ ॥ अहंकारःकापिन्न जवृजिनहेमान्वमिहभू ।रभूमिर्दर्पाणामहमपसरत्वंपिशुनहे ॥ अरेक्रोधस्थानांतरमनुसरानन्यमनसां । त्रिलोकीनाथोनोन्दिवसतुदेवोहरिरसो ॥ २२ ॥ मातर्मायेभगिनिकुमतेहेपितर्मोहजाल । व्यावर्तध्वंभवतुभवतामेषदीर्घोवियोगः ॥ सद्यो लक्ष्मीरमणचरणभ्रष्टगंगाप्रवाह । व्यामिश्रायांदृषदिपरमब्रह्म दृष्टिर्भवामि ॥ २३ ॥ आदित्यस्यगतागतैरहरहःसंक्षीयतेजीवितं । व्यापारैर्बहुकार्यकारणशतैःकालोपिनज्ञायते ॥ दृष्ट्वा जन्मजरावियोगमरणंत्रासश्चनोत्पद्यते । पीत्वामोहमयींम

मोदमदिरामुन्मत्तभूतंजगत् ॥ २४ ॥ मातर्मेदिनितातमारुतस खेज्योतिःसुबंधोजल । भ्रातर्व्योमनिबद्धएषभवतामस्तुप्रणा मांजलिः ॥ युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मला ज्ञा नापास्तसमस्तमोहमहिमालीयेपरेब्रह्मणि ॥२५॥ आशानाम नदीमनोरथजलातृष्णातरंगाकुला । रागग्राहवतीवितर्कविह गाधैर्यद्रुमध्वंसिनी ॥ मोहावर्त्तसुदुस्तराप्रकटितमोत्तुंगचिंता तटी । तस्याःपारगताविशुद्धमनसोनंदंतियोगीश्वराः ॥ २६॥ इतिशांतिशतकेब्रह्मप्राप्तिर्नामचतुर्थःपरिच्छेदः ॥ ४ ॥ ॥

॥ इतिश्रीशिल्हनकविकृतशांतिशतकंसमाप्तं ॥ ११ ॥

हंसदूतः

दुकूलंबिभ्राणोदलितहरितालद्युतिहरं । जपापुष्पश्रेणी रुचिरुचिरपादांबुजतलः ॥ तमालश्यामांगोदरहसितलीलां चितमुखः । परानंदाभोगःस्फुरतिहृदिमेकोपिपुरुषः ॥ १ ॥ यदायातोगोपीहृदयमदनोनंदसदनान् । मुकुंदोगांदिन्यास्त नयमनुविंदन्मधुपुरीं ॥ तदामांक्षीच्चितासरितिघनघूर्णापरि चयै । रगाधायांबाधामयपयसिराधाविरहिणी ॥ २ ॥ क दाचित्खेदाग्निविघटयितुमंतर्गतमसौ । सहालीभिर्लेभेतरलि तमनायामुनतटी ॥ चिरादस्याश्चित्तंपरिचितकुटीरावकलना । दवस्थांतस्तारस्फुटमथसुषुमेःप्रियसखीं ॥ ३ ॥ तदानिष्पं दांगीकलितनलिनीपल्लवकुलैः । परीणाह्याम्भेम्णामकुशलश ताशंकिहृदयैः॥ दृगंभोगंभीरीकृतमिहिरपुत्रीलहरिभिर्विली नाधूलीनामुपरिपरिवेत्रेपरिजनैः ॥ ४ ॥ ततस्तांन्यस्तांगीमुर

षदन्हृदयेवर्ततेकोपिभावः ॥ १६ ॥ गंगातीरेहिमगिरिशिला बद्धपद्मासनस्य । ब्रह्मज्ञानाभ्यसनविधिनायोगनिद्रांगतस्य॥ किंतैर्भाव्यंममसुदिवसैर्यत्रतेनिर्विशंकाः । संप्राप्स्यंतेजठरहरिणागात्रकंडूविनोदं ॥ १७ ॥ कदाभिक्षाभक्तैःकरकलितगंगांबुतरलैः । शरीरंमेस्थास्यत्युपरतसमस्तेंद्रियसुखं ॥ कदाब्रह्माभ्यासस्थिरतनुतयारण्यविहगाः । पतिष्यंतिस्थाणुभ्रमहतधियःस्कंधशिरसि ॥ १८ ॥ रथ्यांतश्चरतस्तथाधृतजरत्कंथांचलस्याध्वगैः । सत्रासंचसकौतुकंचसकृपंदृष्टस्यतैर्नागरैः ॥ निर्व्याजीकृतचिन्मुधारसमुदानिद्रायमाणस्यमे । निःशंकःकरटःकदाकरपुटीभिक्षांविलुंठिष्यति ॥ १९ ॥ एणाक्षीस्पृहयालुतानकथमप्यास्तेविवेकोदया । न्लिष्यंमच्युतिशंकयाक्षणमपिस्वर्गेनमोदामहे ॥ अप्यन्येषुविनाशिवस्तुविषयाभोगेषुतृष्णानमे । स्वर्णद्याःपुलिनेपरंहरिपदध्यानंमनोवांछति ॥ ॥ २० ॥ अयिबोधांबुधौभावः । स्वच्छोयंविश्वबुद्बुदः ॥ विनीतउदितोवेतिविकल्पपटलंमनः ॥ २१ ॥ अहंकारःक्वापिन्नजवृजिनहेमात्वमिहभू ।रभूमिर्दर्पाणामहमपसरत्वंपिशुनहे ॥ अरेक्रोधस्थानांतरमनुसरानन्यमनसां । त्रिलोकीनाथोनोन्दिवसतुदेवोहरिरसो ॥ २२ ॥ मातर्मायेभगिनिकुमतेहेपितर्मोहजाल । व्यावर्तध्वंभवतुभवतामेषदीर्घोवियोगः ॥ सद्यो लक्ष्मीरमणचरणभ्रष्टगंगामवाह । व्यामिश्रायांदृषदिपरमब्रह्म दृष्टिर्भवामि ॥ २३ ॥ आदित्यस्यगतागतैरहरहःसंक्षीयतेजीवितं । व्यापारैर्बहुकार्यकारणशतैःकालोपिनज्ञायते ॥ दृष्ट्वा जन्मजरावियोगमरणंत्रासश्चनोत्पद्यते । पीत्वामोहमयींम

मोदमदिरामुन्मत्तभूतंजगत् ॥ २४ ॥ मातर्मेदिनितातमारुतस खेज्योतिःसुबंधोजल । भ्रातर्व्योमनिबद्धएषभवतामस्तुप्रणा मांजलिः ॥ युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मल। ज्ञा नापास्तसमस्तमोहमहिमालीयेपरेब्रह्मणि ॥२५॥ आशानाम नदीमनोरथजलातृष्णातरंगाकुला । रागग्राहवतीवितर्कविह गाधैर्यद्रुमध्वंसिनी ॥ मोहावर्त्तसुदुस्तराप्रकटितप्रोत्तुंगचिंता तटी । तस्याःपारगताविशुद्धमनसोनंदंतियोगीश्वराः ॥ २६॥ इतिशांतिशतकेब्रह्मप्राप्तिर्नामचतुर्थःपरिच्छेदः ॥ ४ ॥ ॥

॥ इतिश्रीशिल्हनकविकृतशांतिशतकंसमाप्तं ॥ ११ ॥

हंसदूतः

दुकूलंबिभ्राणोदलितहरितालद्युतिहरं । जपापुष्पश्रेणी रुचिरुचिरपादांबुजतलः ॥ तमालश्यामांगोदरहसितलीलां चितमुखः । परानंदाभोगःस्फुरतिहृदिमेकोपिपुरुषः ॥ १ ॥ यदायातोगोपीहृदयमदनोनंदसदनान् । मुकुंदोगांदिन्यास्त नयमनुविंदन्मधुपुरीं ॥ तदामांक्षीच्चितासरितिघनघूर्णापरि चये । रगाधायांबाधामयपयसिराधाविरहिणी ॥ २ ॥ क दाचित्खेदाग्निविघटयितुमंतर्गतमसौ । सहालीभिर्लेभेतरलि तमनायामुनतटी ॥ चिरादस्याश्चित्तंपरिचितकुटीरावकलना । दवस्थांतस्तारस्फुटमथमुषुभेःप्रियसखीं ॥ ३ ॥ तदानिष्पं दांगीकलितनलिनीपल्लवकुलैः । परीणाहाम्भेम्णामकुशलश ताशंकिहृदयैः॥ दृगंभोगंभीरीकृतमिहिरपुत्रीलहरिभि।र्विली नाधूलीनामुपरिपरिवत्रेपरिजनैः ॥ ४ ॥ ततस्तांन्यस्तांगीमुर

सिललितायाःकमलिनी । पलाशैःकालिंदीसलिलशिशिरै । र्वीजिततनुं ॥ परावृत्तश्वासांकुरचलितकंठीकलयतां । सखी संदोहानां श्रमदभरशालीध्वनिरभूत् ॥ ५ ॥ निधायांकेपंके रुहदलविटंकस्यललिता । ततोराधांनीराहरणशरणीन्यस्त-चरणा ॥ मिलंतंकालिंदीपुलिनभुविखेलांचितगतिं । ददर्शा ग्रेकंचिन्मधुरविरुतंश्वेतगरुतं ॥ ६ ॥ तदालोकस्तोकोच्छ्वसि-तद्धदयासादरमसौ । श्रणामंसंशंतीलघुलघुसमासाद्यसविधं ॥ धृतोत्कंठासद्योहरिसदसिसंदेशहरणे । वरंदूतंमेनेतमतिललि तंहंतललिता ॥ ७ ॥ अमर्षांत्मेमेर्ष्यांसपदिदधतीकंसमथने । श्रवृत्ताहंसायस्त्वमभिलषितंशंसितुमसौ ॥ नतस्याऽदोषोयंय दिहविहगंप्रार्थितवती । नकस्मिन्विस्रंभंदिशतिहरिभक्तिश्र णयिता ॥ ८ ॥ पवित्रेषुप्रायोविरचयसितोयेषुवसति । श्रमो दंनालीकेवहसिविषदान्मास्वयमसि ॥ अतोहंदुःखार्त्तांशरण मबलान्वांगतवती । नभिक्षासत्पक्षेव्रजतिहिकदाचिद्विफल तां ॥ ९ ॥ चिरंविस्मृत्यास्मान्चिरहदहनज्वालविकलाः । कलावान्सानंदंवसतिमथुरायांमधुरिपुः ॥ तदेतंसंदेशंस्वमन सिसमाधायनिखिल । भवान्क्षिप्रंतस्यश्रवणपदवींसंगमय तु ॥ १० ॥ निरस्तश्रम्यूहंभवतुभवतोवर्त्मनिशिवं । समुत्तिष्ठ क्षिप्रंमनसिमुदमाधायसदयं ॥ अधस्ताद्धावंतोलघुलघुसमु त्तानयनै । र्भवंतंवीक्षंतांकुतकतरलागोपशिशवः ॥ ११ ॥ किशोरोत्तंशोसौकठिनमतिनादानपतिना । ययानिन्येतूर्णंप शुपयुवतीजीवितपतिः ॥ तयागंतव्यातेनिखिलजगदेकश्रथि तया । पदव्याभव्यानांतिलककिलदाशार्हनगरी ॥ १२ ॥ ग

लद्बाष्पासारप्लुतधवलगंडाभृगदृशो । विदूयंतेयत्रप्रबलमद
नावेशविवशाः ॥ त्वयाविज्ञातव्याहरिचरणसंगप्रणयिनो ।
ध्रुवंसाचक्रांगीरतिसखशतांगस्यपदवी ॥१३॥ पिबन्जंबुश्या
मंमिहिरदुहितुर्वारिमधुरं । मृणालीर्भुंजानोहिमकरकलाको
मलरुचः ॥ क्षणंन्दृष्टस्तिष्ठन्निविडविटपेशाखिनिसखे । सुखे
नप्रस्थानंरचयतुभवान्वृष्णिनगरे ॥ १५ ॥ बलादाक्रंदंतीरथ
पथिकमक्रूरमिलितं । विदूरादाभीरीततिरनुययौयेनरमणं ॥
तमादौपंथानंरचयचरितार्थोभवतुते । विराजंतीसर्वोपरिपर
महंसस्थितिरियं ॥ १५ ॥ अकस्मादस्माकंहरिरपहरन्नंशुक
चयं । यमारुढोगूढप्रणयलहरीकंदलयितुं ॥ तवश्रांतस्यांतः
स्थगितरविबिंबःकिशलयैः । कदंबःकादंबन्वरितमवलंबःस
भविता ॥ १६ ॥ किरंतीलावण्यंदिशिदिशिशिखंडस्तबकिनी
दधानासाधीयःकनकविमलद्योतिवसनं ॥ तमालश्यामांगीस
रलमुरलीचुंबितमुखी । जगौचित्रंयत्रप्रकटपरमानंदलहरी ॥
॥ १७ ॥ तयाभूयःक्रीडारभसविकसद्वल्लववधू । वपुर्वल्लीभ्र
श्यन्मृगमदकणश्यामलिकया ॥ विधातव्योहल्लीसकदलितम
ल्लीलतिकया । समंतादुल्लासस्तवमनसिरासस्थलिकया ॥
॥ १८ ॥ तदंतेवासंतीविरचितमनंगोत्सवकला । चतुःशालं
शौरेःस्फुरतिनदशौतत्रविकिरैः ॥ तदालोकोद्भेदप्रमदभरवि
स्मारितगति । क्रियेजानेतावत्त्वयिबतहतागोपवनिता ॥
॥ १९ ॥ ममस्यादर्थानांक्षतिरिहविलंबाद्यदपिते । विलोके
थाःसर्वंतदपिहरिकेलिस्थलमिदं ॥ तवेयंनव्यर्थाभवतुशुचि
ताकःसहिसखे । गुणोयश्चाणूरद्विषमतिनिवेशायनभवेत् ॥

॥ २० ॥ सकृद्वंशीनादश्रवणमिलिताभीरवनिता । रहःक्रीडा साक्षीप्रतिपदलतासद्मसुभगः ॥ सधेनूनांबंधुर्मधुमथनखट्वायि तशिलः । करिष्यत्यानंदंसपदितवगोवर्द्धनगिरिः ॥ २१ ॥ त मेवाद्रिंचक्रांकितकरपरिष्वंगरसिकं । महीचक्रेशंकेमहिशि खरिणांशेखरतया ॥ अरातिज्ञातीनांननुहरिहयंयःपरिभवन्॥ यथार्थस्त्वंनामव्यधितभुविगोवर्द्धनइति ॥ २२ ॥ तमालस्या लोकाद्गिरिपरिसरेसंतिचपलाः । पुलिंदोगोपिंवदस्मरणरभसो त्तप्तवपुषः ॥ शनैस्तापंतासांक्षणमपनयन्यास्यतिभवा । नवश्यंकालिंदीसलिलशिशिरैःपक्षपवनैः ॥ २३ ॥ तदंतेश्री कांतस्मरसमरधाटीपुटकिता । कदंबानांवाटीरसिकपरिपाटीं स्फुटयति ॥ त्वमासीनस्तस्यांनयदिपरितोनंदसिततो । बभूव व्यर्थांतेघनरसनिवेशव्यसनिता ॥ २४ ॥ शरन्मेघश्रेणीप्रति भटमरिष्टासुरशिर । श्रियंशुष्कंवृंदावनपरिसरेद्रक्ष्यतिभवान्॥ यदारोढुंदूरान्मिलतिकिलकैलासशिखरि । श्रमाक्रांतस्त्वांतो गिरिशमुन्मदः किंकरगणः ॥ २५॥ रुवन्याहिस्वैरंचरमदश याचुंबितरुचो । नितंबिन्योवृंदावनभुविसखेसंतिबहवः ॥ प रावर्त्तिष्यंतेतुलितमुरजिन्नूपुररवा । त्तवध्वानात्तासांबहिर पिगताःक्षिप्रमसवः ॥ २६ ॥ त्वमासीनःशाखांतरमिलितचंड त्विषिसुखं । दधीथाभांडीरेक्षणमपिघनश्यामलरुचौ ॥ ततोहं साबिभ्रन्निखिलनभसश्चिक्रमिषया । सर्वाद्विष्णुंविष्णुंकलित दरचक्रंतुलयिता ॥ २७ ॥ त्वमष्टाभिर्नेत्रैर्विगलदमलप्रेमसलि लै । मुहुःसिक्तस्तंभांचतुरचतुरास्यस्तुतिभुवं ॥ जिहीथावि ख्यातांस्फुटमिहभवद्बांधवरथं । मविष्टंमंस्यंतेविधिमटविदेव्य

Digitized by Google

स्त्वयिगते ॥ २८ ॥ उदंछन्नेत्रांभःप्रसरलहरीपिच्छिलपथो स्खलत्पादन्यासप्रणिहितविलंबाकुलधियः ॥ हरौयस्मिन्म ग्नेत्वरितयमुनाकूलगमन । स्पृहाक्षिप्तागोप्योयययुरनुपदंकाम पिदृशां ॥ २९ ॥ मुहुर्लास्यक्रीडाश्रमदमिलदाहोपुरुषिका । विकाशेनभ्रष्टैःफणिमणिकुलेर्धूमलरुचौ ॥ पुरस्तस्मिन्नीपद्रु मकुसुमकिंजल्कसुरभौ । त्वयापुण्येपेयंमधुरमुदकंकालिय ह्रदे ॥ ३० ॥ तृणावर्तारातेर्विरहदवसंतापिततनोः । सदाभी रीवृंदप्रणयबहुमानोन्नतिविदः ॥ प्रणेतव्योनव्यस्तबकभरसं वर्द्धितशुच । स्त्वयावृंदादेव्याःपरमविनयाद्वंदनविधिः ॥ ॥ ३१ ॥ इतिक्रांत्वाकेकारुतविरुतिमेकादशवनीं । घनीभू तंचूतैर्व्रजमनुवनंद्वादशमिदं ॥ पुरीयस्मिन्नास्तेयदुकुलभुवां निर्मलयशो । भराणांधाराभिर्धवलितधरित्रीपरिसरा ॥३२॥ निकेतैराकीर्णागिरिशगिरिडिंभप्रतिभटै । रवष्टंभस्तंभावलि विलसितैःपुष्पितवना ॥ निविष्टाकालिंदीतटभुवितवाधास्य तिसखे । समंतादानंदंमधुरजनवृंदामधुपुरी ॥ ३३ ॥ वृषःशं भोर्यस्यांदशतिनवमेकत्रयवसं । विरिंचेरन्यस्मिन्गिलतिकल हंसोमिशलतां ॥ क्वचिल्लौचारातेःकवलयतिकेकीविषधरं । विलीढेशल्लक्याबलरिपुकरीपल्लवमितः ॥ ३४ ॥ अवीधिष्टाः कासान्हिविघटितांश्छदपटीं । विमुक्तामन्नासीःपथिपथि नमुक्तावलिमपि ॥ अयिश्रीगोविंदस्मरणमदिरामत्तहृदये । सतीतिख्यातिंतेहसतिकुलटानांकुलमिदं ॥ ३५ ॥ असव्यंबि भ्राणापदमधृतलाक्षारसमसौ । प्रयाताहंमुग्धेविरममभवेषैः किमधुना ॥ अमंदादाशंकेसखिपुरपुरंध्रीकलकला । दलिंदा

Digitized by Google

मेवृंदावनकुसुमधन्वाविजयते ॥ ३६ ॥ अयंलीलापांगस्त्पि
तपुरवीथीपरिसरो । नवाशोकोत्तंसश्चलतिपुरतःकंसविजयी
॥ किमस्मानेतस्मान्मनिभवनपृष्टाद्विनुदती । त्वमेकास्तब्धा
क्षीस्थगयसिगवाक्षावलिमपि ॥ ३७ ॥ मुहुःशून्यांदृष्टिंवह
सिरहसिध्यायसिसदा । शृणोषिमन्यक्षंनपरिजनविज्ञापनश
तं ॥ अतःशंकेपंकेरुहमुखिययौश्यामलरुचिः । सयूनामुत्तंस
स्तवनयनवीथीपथिकतां ॥ ३८ ॥ विलज्जंमारोदीरिहसखि
पुनर्यास्यतिहरि । स्तवापांगक्रीडानिविडपरिचर्यांग्रहिलतां॥
इतिस्वैरंयस्यांपथिपथिमुरारेरभिनव । भवेशेनारीणांरतिरभ
सजल्पाववनिरे ॥३९॥पंचभिःकुलकं ॥ सखेसाक्षाद्दामोदरव
दनचंद्रावकलन । स्फुरन्प्रेमानंदप्रकरलहरीचुंबितधियः ॥ मु
हुस्तत्राभीरीसमुदयशिरोन्यस्तविपद । स्तवाक्ष्णोरानंदंविद
धतिपुरापौरवनिताः ॥ ४० ॥ अथक्रामंक्रामंक्रमघटनया
संकटतरा । न्विवासान्वृष्णीनामनुसरपुरीमध्यविशिखान् ॥
मुरारातेर्यत्रस्थगितगगनाभिर्विजयते । पताकाभिःसंतर्पितभु
वनमंतःपुरवरं ॥ ४१ ॥ यदुत्संगेतुंगस्फटिकरचिताःसंतिपरि
तो । मरालामाणिक्यप्रकरघटितत्रोटिचरणाः ॥ मुहुर्दुह्यां
हंसाःकलितमधुरस्यांबुजभुव :। समर्यादायेषांसपदिपरिचर्यां
विदधति ॥ ४२ ॥ चिरान्मृग्यंतीनांपशुपरमणीनामपिकुलै ।
रलब्धंकालिंदीपुलिनविपिनेलीनमभितः ॥ मदालोकोल्लासि
स्मितपरिचितास्यंप्रियसखी । स्फुरंतंवीक्षिष्येपुनरपिकिमग्रे
मुरभिदं ॥ ४३ ॥ विषादंमाकार्षीद्भुतमवितथव्यात्ततिरसौ ।
समागंतारार्धेधृतनवशिखंडस्तवसखा ॥ इतिब्रूतेयस्यांशुकमि

थुनर्मिद्रानुजकृते । यदाभीरीवृंदैरुपतृतमभूदुद्धवकरो॥ ४४ ॥ युग्मकं॥घनश्यामाभ्राभ्यन्युपरिहरिहर्म्यस्यशिखिभिः । कृत स्तोत्रामुग्धैरगुरुजनिताधूमलतिका ॥ तदालोकाद्धीरस्फुरति तवचेष्मानसरुचि । जितंतांहस्वैरंजनसहनिवासप्रियतया ॥ ॥ ४५ ॥ ततोमध्येकक्षंप्रतिनवगवाक्षस्तवकितं । चलन्मुक्ता लंबस्फुरितममलस्तंभनिवहं ॥ भवांदृष्ट्वाहेमोल्लिखितदशम स्कंधचरितै । र्लसच्चित्तिप्रांतंमुरविजयिनःकेलिनिलयं ॥ ॥ ४६ ॥ अलिंदेयस्यास्तेमरकतमयीयष्टिरमला । शयालुर्यो रात्रौमदकलकलापोकलयति ॥ निरातंकंतस्याःशिखरमधिरु ह्यश्रमनुदं । प्रतीक्षेथाभ्रातर्वरमवसरंयादवपतेः ॥ ४७ ॥ नि विष्टःपर्यंकेमृदुलतरतूलोधवलिते । त्रिलोकीलक्ष्मीणांककुदि दरसाचीकृततनुः ॥ अमंदंपूर्णेंदुप्रतिममुपधानंप्रमुदितो । नि धायाग्रेतस्मिन्नुपहितकपोलिद्वयभरः ॥ ४८ ॥ उदंचन्कालिं दीसलिलसुभगंभावुकरुचिः । कपोलांतेमेंखन्मणिमकरमुद्रा मधुरिमा ॥ वसानःकौषेयंजितकनकलक्ष्मीपरिमलं । मुकुंद स्तेसाक्षान्मदसुधयासेक्ष्यतिदृशौ ॥ ४९ ॥ विकट्टःपौराणी रखिलकुलवृद्धोयदुपते । रदूरादासीनोमधुरभणितिर्गास्यति तदा ॥ पुरस्तादाभीरीगणभयदनामासकठिनो । मणिस्तंभा लंबीकुरुकुलकथांसंकलयिता ॥ ५० ॥ शिलीमुत्तंसःसकि लकृतवर्माप्युभयतः । प्रणेष्येतेवालव्यजनयुगलांदोलनविधि ॥ सजानुभ्यामष्टापदभुवमवष्टभ्यभविता । गुरोःशिष्योनूनं पदकमलसंवाहनरतः ॥ ५१ ॥ विहंगेंद्रोयुग्मीकृतकरसरो जोभुविपुरः । कृताशंकोभावीव्रजवनिनिदेशेऽर्पितमनाः ॥

छदद्वंद्वेयस्यध्वनतिमथुरावासिवटवो । व्युदस्यंतेसामस्वरक
लितमन्योन्यकलहं ॥ ५२ ॥ ननिर्वक्तुंदामोदरपदकनिष्ठांगु
लिनख । द्युतीनांलावण्यंभवतिचतुरास्योपिचतुरः ॥ तथापि
स्त्रीमज्ञासुलभतरलत्वादहमसौ । मवृत्तात्तन्मूर्त्तिस्तवरतिमहा
साहसरसे ॥ ५३ ॥ विराजंतेयस्यव्रजशिशुकुलस्तेयविकल ।
स्वयंभूचूडाग्रैर्लुलितशिखराःपादनखराः ॥ क्षणंयानालोक्य
प्रकटपरमानंदविरसः । सदेवर्षिर्मुक्तानपितनुभृतःशोचतिभृशं
॥ ५४ ॥ सरोजानांव्यूहःश्रियमभिलसन्यस्यपदयो । र्ययौ
रागाढ्यानांविधुरमुदवासव्रतविधिं ॥ हिमंवंदेनीचैरनुचित
विधानव्यसनिनां । यदेषांप्राणांतंदमनमनुवर्षप्रणयति ॥
॥ ५५ ॥ रुचीनामुल्लासैर्मरकतमयस्थूलकदली । कदंबाहं
कारंकवलयतियस्योरुयुगलं ॥ यदालानस्तंभद्युतिमवललं
बेवलभृतां । मदादुद्दामानांपशुपरमणीचित्तकरिणां ॥ ५६ ॥
सखेयस्याभीरीनयनसफरीजीवनविधौ । निदानंगांभीर्यप्र
सरकलितानाभिसरसि ॥ यतःकल्पस्यादौसनकजनकोत्प
त्तिवडभी । गभीरांतःकक्षाधृतभुवनमंभोरुहमभूत् ॥ ५७ ॥
द्युतिधत्तेयस्यत्रिवलिलतिकासंकटतरं । सखेदामश्रेणीक्षण
परिचयाभिज्ञमुदरं ॥ यशोदायस्यांतःसुरनरभुजंगैःपरिवृतं
। मुखद्वारावारद्वयमवलुलोकेत्रिभुवनं ॥ ५८ ॥ उरोयस्य
स्फारंस्फुरतिवनमालावलयितं । वितन्वानंतन्वीजनमनसिस
द्योमनसिजं ॥ मरीचीभिर्यस्मिन्नूरविनिवहतुल्योपिवहते ।
सदाखद्योताभांभुवनमधुरःकौस्तुभमणिः ॥ ५९ ॥ समंतादु
न्मीलद्बलभिदुपलस्तंभयुगल । प्रभाजैत्रंकेशिद्विजकुलितके

यूरललितं ॥ स्मरल्काम्यद्रोपीपटलहृठकंठग्रहपरं । भुजद्वंद्वं यस्यस्फुटसुरभिगंधंविजयते ॥ ६० ॥ जिहीतेसाम्राज्यंजगतिनवलावण्यलहरी । परीपाकस्यांतर्मुदितमदनावेशमधुरं ॥ नटभ्रूवल्लीकंस्मितनवसुधाकेलिसदनं । स्फुरन्मुक्तापंक्तिम्तिमरदनंयस्यवदनं ॥ ६१ ॥ किमेभिर्व्याहारैःकलयकथयामिस्फुटमहं । सखेनिःसंदेहंपरिचयपदंकेवलमिदं ॥ परानंदोयस्मिन्नयनपदवीभाजिभविता । त्वयाविज्ञातव्योमधुररवसोऽयंमधुरिपुः ॥ ६२ ॥ विलोकेथाःकृष्णंमदकलमराली रतिकला । विदग्धव्यामुग्धयंदिपुरवधूविभ्रमभरैः ॥ तदानास्मान्ग्राम्याःश्रवणपदवींतस्यगमये । सुधापूर्णेचेतःकथमपिनतक्रंमृगयते ॥ ६३ ॥ यदावृंदारण्यस्मरणलहरीहेतुरमलं । पिकानांबिंबोष्टिप्रतिहरितमुच्चैर्मुकुरुतं ॥ वहंतेवावाताःस्फुरितगिरिमल्लीपरिमला । स्तदैवास्माकीनांगिरमुपहरेथामुरभिदि ॥ ६४ ॥ पुरातिष्ठन्गोष्ठेनिखिलरमणीभ्यःप्रियतया। भवान्यस्यांगोपीरमणविदधेगौरवभरं ॥ सखीतस्याविज्ञापयतिललिताधीरललित । प्रणम्यश्रीपादांबुजकनकपीठीपरिसरे ॥ ६५ ॥ प्रयत्नादाबाल्यंनवकमलिनीपल्लवकुलै । स्त्वयाभूयोयस्याःकृतमहहसंवर्द्धनमभूत् ॥ चिरादूधोभारस्फुरणगरिमाक्रांतजघना । बभूवमष्टौहीमुरमथनसेयंकपिलिका ॥ ६६ ॥ समीपेनीपानांत्रिचतुरदलाहंतगमिता । त्वयामाकंदस्यप्रियसहचरीभावनियतिं ॥ इयंसावासंतीगलदमलमाध्वीकपटली । मिषादग्रेगोपीरमणरुदतीरोदयतिनः ॥ ६७ ॥ प्रसूतोदेवक्यामुरमथनयःकोपिपुरुषः । सजातोगोपालीभ्यु

दयपरमामंदवसतिः ॥ धृतोयोगांदिन्याकठिनजठरेसंप्रतिततः । समंतादेवास्तंशिवशिवगतागोकुलकथा ॥ ६८ ॥ अरिष्टेनाहूताःपशुपसदृशोयांतिविपदं । तृणावर्त्ताक्रांत्यारचयतिभयंचत्वरचयः ॥ अमीव्योमीभूताव्रजवसतिभूमीपरिसरा। वहंतेनस्तापंमुरहरविदूरंत्वयिगते ॥ ६९ ॥ त्वयानागंतव्यंकथमिहहरेगोष्ठमधुना । लताश्रेणीवृंदावनभुवियतोऽभूद्विषमयी ॥ प्रसूनानांगंधंकथमितरथावातनिहितं । भजन्सद्योमूर्छां बहतिनिवहोगोपसुदृशां ॥७० ॥ कथंसंगोस्माभिःसहसमुचितःसंप्रतिहरे । वयंग्राम्यानार्यस्त्वमसिनृपकन्यार्चितपदः ॥ गतःकालोयस्मिन्पशुपरमणीसंगमकृते । भवान्व्ययस्तस्थौनमसिगृहवाटीविटपिनि ॥ ७१ ॥ वयंन्यक्काःस्वामिन्यदिहतवकिंदूषणमिदं । निसर्गःश्यामानामयमतितरांदुष्परिहरः ॥ कुहूकंठैरंडावधिसहनिवासान्परिचिता ।विसृज्यंतेसद्यःकलितनवपक्षैर्बलिभुजः ॥७२ ॥ अयंपूर्वोरंगःकिलविरचितोयस्यतरसा । रसादाख्यातव्यंपरिकलयतन्नाटकमिदं॥मयाप्रष्टव्योसिप्रथममितिवृंदावनपते । किमाहोराधेतिस्मरसिरुपणंवर्णयुगलं ॥७३ ॥ अयेकुंजद्रोणीकुहरगृहमेधिन्किमधुना । परोक्षंवक्ष्यंतेपशुपरमणीदुर्नियतयः ॥ प्रवीणागोपीनांतवचरणपद्मेर्पितमना । ययौराधासाधारणसमुचितमश्रपदवीं ॥७४॥ त्वयागोष्ठंगोष्ठीतिलककिलचेद्विस्मृतमिदं ।नतूर्णंधूमोर्णापतिरपिविधत्तेयदिरुपां ॥ अहर्वृंदंवृंदावनकुसुमपालीपरिमलै । र्दुरालोकंशोकास्पदमथककथंनेष्यतिसखी ॥७५॥ तरंगैःकुर्वाणाशमनभगिनीलाघवमसौ । नदीकांचिद्रोष्टेनयनजलपूरैरजनयन्

इतीवास्याद्वेषादभिमतदशाप्रार्थनमयी । मुरारेर्विज्ञप्तिर्निशम्य यतिमानीनशमनः ॥ ७६ ॥ कृताकृष्टिक्रीडंकिमपितवरूपंमम सखी । सकृद्दृष्टादूरादहितहितबोधोज्झितमतिः ॥ हताशेयं मेमानलमनुविशंतीसरभसं । पतंगीवात्मानंमुरहरमुहुर्दाहिव वती ॥ ७७ ॥ मयावाच्यःकिंवान्वमिहनिजदोषात्परमसौ । ययौमंदावृंदावनकुमुदबंधोर्विधुरतां ॥ यदर्थंदुःखाग्निर्दहति नतमद्यापिन्दृदया । न्नयस्माद्धुर्मेधालवमपिभवंतंदवयति ॥ ॥ ७८ ॥ त्रिवक्राहोधन्यान्दयमिवतेस्वंवपुरियं । समाक्रम्य स्वैरंयदिहविलसंतीनिवसति ॥ ध्रुवंपुण्यभ्रंशादजनिसरलेयं ममसखी । भवेशस्तत्रासीत्क्षणमपियदस्यानसुलभः ॥ ७९ ॥ किमाविष्टाभूतैःसपदियदिवाक्रूरफणिना । क्षतापस्मारेण च्युतमतिरकस्मान्किमपतत् ॥ इतिव्यग्रैरस्यांगुरुभिरभितो वेणुनिनद । श्रवाद्विभ्रष्टायांमुरहरविकल्पाविदधिरे ॥ ८० ॥ नवीनेयंसंप्रत्यकुशलपरीपाकलहरी । नरीनर्तिस्मेरंममसह चरीचित्तकुहरे ॥ जगन्नेत्रश्रेणीमधुरमथुरायांनिवसत । श्रि रादार्त्तावार्त्तांमपितवयदेषानलभते ॥ ८१ ॥ जनान्सिद्धादे शान्मतिभजतेमांत्रिकगणा । न्विधत्तेशुश्रूषामधिकविनये नौषधिविदां ॥ त्वदीक्षादीक्षायैपरिचरतिभक्तयागिरिसुतां । मनीषाहिव्यग्राकिमपिसुखहेतुंनमनुते ॥ ८२ ॥ पशूनांपाता रंभुजगरिपुपत्रप्रणयिनं । स्मरोद्भार्द्धिक्रीडंनिविडघनसारद्युति हरं ॥ सदाभ्यर्णेनंदीश्वरगिरिभुवोरंगरसिकं । भवंतंकंसारे भजतिभवदाप्तैममसखी ॥ ८३ ॥ भवंतंसंतप्ताविदलिततमा लांकुररसै । र्विलिख्यभ्रूभंगीकृतमदनकोदंडकदनं ॥ निधा

स्यंतीकंठेतवनिजभुजावल्लरिममौ । धरण्यामुन्मीलज्जडिमनि विडांगीविलुठति ॥ ८४ ॥ कदाचिन्मूढेयंनिविडभवदीयस्मृति मदा । दमंदादात्मानंकलयतिभवंतंममसखी ॥ तथास्याराधा या विरहदहनाकल्पितधियो । मुरारेदुःसाधाक्षणमपिनराधा विरमति ॥ ८५ ॥ त्वयासंतापानामुपरिपरिमुक्तापिरभसा । दिदानीमापेदेतदपितवचेष्टांप्रियसखी ॥ यदेषाकंसारेभिदुर त्दयंत्वामवयती । सतीनांमूर्द्धन्याभिदुरत्दयास्भूदनुदिनं ॥ ८६ ॥ समक्षंसर्वेषांनिवससिसमाधिप्रणयिना । मितिश्रु त्वानूनंगुरुतरसमाधिंकलयति ॥ सदाकंसारातेभजसियमिनां नेत्रपदवी । मितिव्यक्तंसज्जीभवतियममालंबितुमपि ॥ ८७ ॥ मुरारेकालिंदीसलिलचलदिंदीवररुचे । मुकुंदश्रीवृंदावनमद नवृंदारकमणे ॥ व्रजानंदिन्नंदीश्वरदयितनंदात्मजहरे । स देतिक्रंदंतीपरिजनशुचंकंदलयति ॥ ८८ ॥ समंतादुत्तप्तस्तव विरहदावाग्निशिखया । कृतोद्वेगःपंचाशुगमृगयुवेधव्यतिक रैः ॥ तनूभूतंसद्यस्तनुवनमिदंहास्यतिहरे । हठादद्याःश्वोवा ममसहचरीप्राणहरिणः ॥ ८९ ॥ पयोराशिस्फीतत्विषिहि मकरोत्तंसमधुरे । दधानेदृग्भंग्यास्मरविजयिरूपंममसखी ॥ हरेदत्तस्वांताभवतितदिमांकिंप्रभवति । स्मरोहंतुंकितुव्यथय तिभवानेवकुतुकी ॥ ९० ॥ विजानीषेभावंपशुपरमणीनां यदुपते । नजानीमःकस्मात्तदपिबतमायांरचयसि ॥ समंताद ध्यात्मंयदिहपवनव्याधिरलप । द्बलादस्यास्तेनव्यसनकुल मेवद्विगुणितं ॥ ९१ ॥ गुरोरंतेवासीसभजतियदूनांसचिवतां । सखीकालिंदीयंकिलभवतिकालस्यभगिनी ॥ भवेदन्यः

कोवानरपतिपुरेमन्परिचितो । दशामस्याःशंसन्यदुतिलकं यस्त्वामनुनयेत् ॥ ९२ ॥ विशीर्णांगीमंतर्व्रणविलुठनादुत्कलिकया । परीतांभूयस्यासततमपरागव्यतिकरां ॥ परिष्वस्तामोदांविरमितसमस्तालिकुतुकां । विधोपादस्पर्शादपिसुखयराधाकुमुदिनीं ॥ ९३ ॥ विपत्तिभ्यःप्राणान्कथमपिभवत्संगमसुख । स्पृहाधीनाशैरेममसहचरीरक्षितवती ॥ अतिक्रांतेसंप्रत्यवधिदिवसेजीवनविधौ । हताशानिःशंकंवितरतिदशौचूतमुकुले ॥ ९४ ॥ मतीकारारंभश्लथमतिभिरुद्यत्परिणते । विमुक्तायाव्यक्तस्मरकदनभाजःपरिजनैः ॥ अमुंचंतीसंगंकुवलयदशःकेवलमसौ । बलाद्यप्राणानवतिभवदाशासहचरी ॥९५॥ अयेरासक्रीडारसिकममसख्यांनवनवा। पुराबद्धायेनप्रणयलहरीहंतगहना ॥ सचेन्मुक्तापेक्षस्त्वमसिधिगिमांतूलशकलं । यदेतस्यानासानिहितमिदमद्यापिचलति ॥ ९६ ॥ मुकुंदभ्रांताक्षीकिमपियदसंकल्पितशतं । विधत्तेत द्वक्तुंजगतिमनुजःकःप्रभवति ॥ कदाचित्कल्याणीविलपति यदुत्कंठितमति । स्तदाख्यामिस्वामिन्गमयमकरोत्तंससविधं ॥ ९७ ॥ अभूत्कोपिप्रेमामयिमुररिपोर्यःसखिपुरा । पराद्धर्मापेक्षामपितदवलंबादलघयं ॥ तथेदानींहाधिक्समजनितटस्थःस्फुटमहं । भजेलज्जांयेनक्षणमिहपुनर्जीवितुमपि ॥ ॥ ९८ ॥ अमीकुंजाःपूर्वंममनदधिरेकामपिमुदं । द्रुमालीयं चेतःसखिनकतिशोनंदितवती ॥ इदानींपश्यैतेयुगपदुपतापं विदधते । प्रभौमुक्तापेक्षेभजतिनहिकोवाविमुखतां ॥ ९९ ॥ गरीयान्मेप्रेमात्वयिपरमितिस्नेहलघुता । नजीविष्यामीति

मणयगरिमाख्यापनविधिः ॥ कथंनायासीतिस्मरणपरिपाटीमकटनं । हरौसंदेशायप्रियसखिनमेवागवसरः ॥ १०० ॥ ययौकालःकल्पान्यवकलितकेलीपरिमलां । विलासार्थोय स्मिन्नचलकुहरेलीनवपुषीं ॥ समांधृत्वाधूतःकृतकपटरोषां सखिहठा । दकार्षीदाकर्षन्नुरसिशशिलेखाशतवृतां ॥१०१॥ कदाप्रेमोन्मीलन्मदनमदिराक्षीसमुदयं । बलादाकर्षंतंमधुर मुरलीकाकलिकया ॥ मुहुर्भ्राम्यच्चिल्लीचुलुकितकुलस्त्रीव्रत महं । विलोकिष्येलीलामदमिलदपांगीमुरभिदं ॥ १०२ ॥ र णद्भंगश्रेणीमुन्मदिसरदारंभमधुरे । वनांतेचांद्रीभिःकिरणल हरीभिर्धवलिते ॥ कदाप्रेमोद्दंडस्मरकलहवैतंडिकमहं । क रिष्येगोविंदंनिबिडभुजबंधप्रणयिनं ॥ १०३ ॥ मनोमेहाक ष्टंज्वलतिकिमहंहंतकरवै । नपारंनावारंकिमुषिकलयाम्य स्यजलधेः ॥ इयंवंदेमूर्ध्नासपदितमुपायंकथयमे । पराभृष्ये यस्माद्धृतिकलिकयापिक्षणिकया ॥ १०४ ॥ प्रयातोमांहि त्वायदिविबुधचूडामणिरसौ । प्रयातुस्वच्छंदंममसमयधर्मः किलगतिः ॥ इदंसोढुंकावाप्रभवतियतःस्वमकपटा । दिहाया तोवृंदावनभुविबलान्मांरमयति ॥ १०५ ॥ अनौचित्यंतस्य व्यथयतिमनोहंतमथुरां । त्वमासाद्यस्वैरंचपलन्दयंधावयह रिं ॥ सखिस्वमारंभेपुनरपियथाविभ्रममदा । दिहायातोधू र्तःक्षपयतिनमेकिंकरिगुणं ॥ १०६ ॥ अयिस्वमोदूरेनिवस तुसमक्षंशृणुहठा । दविश्वस्तामाभूरिहसखिमनोविभ्रमधिया॥ वयस्यस्तेगोवर्द्धनविपिनमासाद्यकुतुका । दकांडेयद्भूयःस्मर कलहपांडित्यमकरोत ॥ १०७ ॥ अमर्षाद्धावंतींगहनकुहरे

Digitized by Google

सूचितपथां । तुलाकोटिक्काणैश्चकितपदपातद्विगुणितैः ॥ दि
धीर्षन्मांहर्षोत्तरलनयनांतःसकुतुकी ।नवंशीमङ्गासीद्भुविकर
सरोजाद्विगलितां ॥ १०८ ॥ अशक्तांगंतव्येकलितनवचेलां
चलतया । लतालीभिःपुष्पस्मितशवलिताभिर्विरुधतीं ॥ प
रीहासारंभीमियसखिसमालंबितमुखी । प्रपेदेचुंबायस्फुरद
धरंबिंबस्तवसखा ॥ १०९ ॥ ततोहंधम्मिल्लेस्थगितमुरली
कासखिशनै । रलीकामर्षेणभ्रमदविरलभ्रूरुदचलं ॥ कचा
कृष्टिक्रीडाक्रमपरिचितेचौर्यचरिते । हरिर्लब्धोपाधिःप्रसभ
मनयन्मांगिरिदरीं ॥ ११० ॥ कदाचिद्वासंतीकुहरभुविधृष्टः
सरभसं । हसन्पृष्ठालंबीस्थगयतिकराभ्यांममदृशौ ॥ दि
धीर्षोजातेर्ष्यमयिसखितदीयांगुलिशिखां । नजानेकुत्रायंन्न
जतिकितवानांकुलगुरुः ॥ १११ ॥ अतीतेयंवार्तांविरमतुपुरः
पश्यसरले । वयस्यस्तेसोऽयंस्मितमधुरिमोन्मृष्टवदनः ॥ भु
जस्तंभोल्लासादभिमतपरीरंभरभसः । स्मरक्रीडार्सिधुःक्षि
पतिमयिबंधूककुसुमं ॥ ११२ तदुत्तिष्ठव्रीडावतिनिविडमुक्ता
लतिकया । वधानैनंधूर्त्तसखिमधुपुरीयातिनयथा ॥ इतिमे
मोन्मीलद्भवदनुभवारूढजडिमा । सखीनामाक्रंदंनकिलक
तिशःकंदलयति ॥ ११३ ॥ अहोकष्टंबाल्यादहमिहसखींदु
ष्टहृदया । मुहुर्मानग्रंथिसहजसरलांयाहितवती ॥ तदारंभा
द्रोपीगणरतिगुरोर्निर्भरमसौ । नलेभेलुब्धापिंव्वदमलभुजस्तं
भरभसं ॥ ११४ ॥ अलिंदेकालिंदीकमलमुरभौकुंजवसते ।
र्वसंतींवासंतीनवपरिमलोद्गारचिकुरां ॥ त्वदुत्संगेलीनांमद
मुकुलिताक्षींपुनरिमां । कदाहंसेविष्येकिसलयकलापव्यज

निनी ॥ ११५ ॥ धूतानंदांवृंदावनपरिसरेशारदनिशा । वि
लासोल्लासेनश्लथितकबरीस्फुल्लकुसुमां ॥ तवस्कंधोपांतेवि
निहितभुजावल्लरिमहं । कदाकुंजेलीनारहसिविहसिष्या
मिसुमुखीं ॥ ११६ ॥ विदूरादाहूतैकुसुममुपयामिन्वमधुना ।
पुरस्तीरेतीरेकलयतुलसीपल्लवमिदं ॥ इतिव्याजादेनांविदि
तभवदीयस्थितिरहं । कदाकुंजेगोपीरमणगमयिष्यामिसम
ये ॥ ११७ ॥ इतिश्रीकंसारेःपदकमलयोर्गोकुलकथां । निवे
द्यप्रत्येकंभजपरिजनेषुभणयितां ॥ निजांगेकादंबीसहचरवह
न्मंडनतया । सयात्युच्चैःप्रेमप्रवणमनुजग्राहभगवान् ॥११८
मिलद्भृंगीहंसीरमणवनमालांप्रथमतो । मुदाक्षेमंपृच्छन्निदमु
पहरेथाममवचः ॥ चिरंकंसारातेरुरसिसहवासभणयिनीं ।
किमेनामेणाक्षीगुणवतिविसस्मारभवति ॥ ११९ ॥ इदंकि
वाहंतस्मररसिरसिकेखंडनरुषा । परीतांगीगोवर्द्धनगिरिनितंबे
ममसखी ॥ भियासंभ्रांताक्षंयदिहविचकर्षत्वयिबला । ब्रूही
त्वाविभ्रश्यन्नवशिखिशिखंगोकुलपतिं ॥ १२० ॥ ततःसंभा
षेथाःश्रुतिमकरमुद्रामितिमुदा । भवत्यांकर्तव्यःकिमितिकुशल
प्रश्नजडिमा॥रुचिस्मेरायात्वंरचयसिबलाच्चुंबनकलां । अपांगे
नस्पृष्टासखिमुररिपोर्गंडकुहरे ॥१२१॥ निवासस्तेदेविश्रवण
लतिकायामितिधिया । मयत्नात्त्वामेवमणयत्तदयायामिश
रणं ॥ परोक्षंवृष्णीनांनिभृतनिभृतंकर्णकुहरे।हरेःकाकून्मिश्रां
कथयसखिराधाविधुरतां ॥ १२२ ॥ परीरंभंप्रेम्णाममस
विनयंकौस्तुभमणौ । ब्रुवाणःकुर्वीथाःपतगवरविज्ञापनमिदं॥
अगाधाराधायामपितवसखेविस्मृतिरभू । त्कथंवाकल्या

णंवहतितरलेहिमणयिता ॥ १२३ ॥ मुहुःकूजत्कांचीमणि वलयमंजीरमुरली । वरालंबीभ्राम्यद्युवतिकलगीतैःसुरमणे ॥ सकिंसाक्षाद्भावीपुनरपिहरेरस्तांडवरसै । रमंदःकालिंदीपु लिनभुवितौर्यत्रिकभरः ॥ १२४ ॥ नवीनस्त्वंकंबोपशुपरम णीभिःपरिचयं । नधत्सेराधायागुणगरिमगंधेपिनकृती ॥ तथापित्वांयाचेत्दयनिहितंदोहदमहं । वहंतेहिक्लांतेप्रणय मवदातप्रकृतयः ॥ १२५ ॥ गृहीत्वागोविंदंजलधित्दयानंद नसखे । सुखेनश्रीवृंदावनपरिसरेनंदतुभवान् ॥ कथंवातेगो ष्टंभवतुदयितंहंतबलवा । न्यदेतस्मिन्वेणोर्जयतिचिरसौभा ग्यमहिमा ॥ १२६ ॥ इतिप्रेमोद्गारप्रवणमनुनीयक्रमवशा । त्परीवारान्भ्रातॄंनशमयतिचाणूरमथने ॥ पुनःकोपोद्भिन्न प्रणयचटुलंतस्यनिकटे । कथामाचक्षीथादशभिरवतारैर्वि लसितां ॥ १२७ ॥ ग्रहीतुंत्वांप्रेमामिषपरिवृतंचित्तबडिशं । महामीनक्षिप्रंन्यधितरसपूरेममसखी ॥ विवेकाख्यंछित्वा गुणमथतद्ग्रासिभवता । हताशेयंकिंवाशिवशिवविधातुंप्र भवति ॥ १२८ ॥ वराकीयंदृष्ट्वासुभगवपुषोविभ्रमभरं । तवाभ्यर्णभेजेपरमकुतुकोल्लासितमतिः ॥ तिरोधायस्वांगं प्रकटयसियत्त्वंकठिनतां । तदैतत्किनस्यात्तवकमठमूर्त्तेःसमु चितं ॥ १२९ ॥ सदाकंसारातेस्फुरतिचिरमद्यापिभवतः । स्फुटंक्रोडाकारेवपुषिनिविडप्रेमलहरी ॥ यतःसासैरंध्रीमलय रुहपंकमणयिनी । त्वयाक्रोडीचक्रेपरमरभसादान्मदयिता ॥ १३० ॥ चिरादंतर्भूतानरहरिमयीमूर्त्तिरभित । स्तदीयो व्यापारस्तवहिनययौविस्मृतिपथं ॥ विनीतप्रल्हादस्त्वमिह

Digitized by Google

परमक्रूरचरित । मयुक्तोयद्भूयःपरदृदयभेदंजनयसि ॥१३१॥ यदात्मानंदपादगणितगुरुर्वामनमुदा । मनोवाचेनाट्यंत्वयिब लितयाकल्पितवती ॥ मपेदेतस्येदंफलमुचितमेवप्रियसखी । विदूरेयक्षिप्राव्यसनकुलपाशैर्निगडिता ॥ १३२ ॥ इयंनाथ क्रूराभ्रगुपतनमाकांक्षतितरां । यदस्यांकाठिन्यंतवसमुचितं तद्भृगुपतेः ॥ इयंतेदुर्बोधाकृतिरथभवद्विस्मृतिपथं । यतोया तःसाक्षाद्रुरुरपिसनंदीश्वरपतिः ॥ १३३ ॥ निरानंदागाव श्चिरमुपहतादूषणकुलैः । खरायंतेसद्योरघुतिलकगोवर्द्धनत टाः ॥ विराधध्वंधोषोव्रजतिभवदीयप्रवसना । दिदानींमारी चःस्फुटमिहनरीनर्तिपरितः ॥ १३४ ॥ मपन्नःकालोयंपुन रुदयितुरासभजनै । विलासिन्नद्यापिस्फुटमनपराधावयम पि ॥ वितन्वानःकांतिवपुषिशरदाकाशवनितां । कथंनत्वं सीरध्वजभजसिवृंदावनमिदं ॥ १३५ ॥ नरागंसर्वज्ञक्वचिद पिविधत्तेनरपतिं । मुहुर्द्वेष्टिद्रोहंकलयतिबलादिष्टविधये ॥ चिरंध्यानासक्तानिवसतिसदासौगतिरति । स्तथाप्यस्यां हंहोसदयन्दृदयस्त्वंनदयसे॥१३६ ॥ परिक्लेशम्लेच्छान्समद मधुपालीमधुरया । निकृंतन्नेत्रांतप्रणयरचनाखड्गलतया ॥ त्वमासन्नःकल्किन्निहचतुरगोपाहितरुचिः । स्वदेशंकुर्वी थाःप्रतिमुदितधीराधिकमिदं ॥ १३७ ॥ इतिप्रेमोद्गाढस्थ पुटितवचोभंगिरखिलं । त्वमावेद्यक्षुद्यन्मुखपरिसरोलोचन जलैः ॥ ततोगोविंदस्यप्रतिचरणमाध्वोकपदवी । मुपासीनो दृश्यांक्षणमवदधीथाःखगपतेः ॥ १३८ ॥ प्रणेतव्योदृष्टेरनुभ वप्रथंनंदतनयो । विधेयागोपीनांस्मरपतिवृतानामुपकृतिः ॥

Digitized by Google

इयंयामैर्गम्याचतुरमथुरापित्रिचतुरै । रितिद्वैधनांतःकलयक
लहंसीकुलपते ॥ १३९ ॥ अपूर्वायस्यांतर्विलसतिमुदासार
सरुचि । विवेक्तुंशक्येतेसपदिमिलितेयेनपयसी ॥ कथंकारं
युक्तोभवतुभवतस्तस्यकृतिनो । विलंबःकादंबीरमणमथुरासं
गमविधौ ॥ १४० ॥ प्रपन्नःप्रेमाणंभगवतिसदाभागवताग्र
क् । पराचीनोजन्मावधिभवरसाद्भक्तिमधुरः ॥ चिरंको
पिश्रीमान्जयतिविदितःसाकरतया। धुरीणोधीराणामधिधर
णिवैयासकिरिव ॥ १४१ ॥ रसानामाधारैरपरिचितदोषः
सद्दयै । मुरारातिक्रीडानिबिडघटनारूपसहितः ॥ प्रबंधो
यंबंधोरखिलजगतांतस्यसरसां । प्रभोरंतःसांद्रांप्रमदलहरीं
पल्लवयतु ॥ १४२ ॥ ॥ इतिश्रीरूपगोस्वामिविरचितंहंसदू
ताख्यंकाव्यंसमाप्तं ॥ १२ ॥

पदांकदूतः

गोपीभर्तुर्विरहविधुराकाचिदिंदीवराक्षी । उन्मत्तेवस्रस्त
लितकबरीनिःश्वसंतीविशाला ॥ अत्रैवास्तेमुररिपुरितिभ्रांति
दूतीसहाया । प्यक्कागेहंझटितियमुनामंजुकुंजंजगाम ॥ १ ॥
अभाप्यैवव्रजपतिसुतंतत्रकालंकियंतं । मूर्छाप्राणप्रियतमस
खीसंगतासंगमभ्या॥तस्योपांतेकुलिशकमलस्यंदनांगादियुक्तं।
पद्माकारंमुरहरपदश्चारुचिन्हंददर्श ॥ २ ॥ तस्मिन्नुच्चन्नवज
लधरध्वानमाकर्ण्यभूयः । कंदर्पेणव्यथितहृदयोन्मत्ततुल्याय
याचे ॥ प्रज्ञाहीनंवचनरहितंनिश्चलंश्रोत्रहीनं । दौत्यंकर्तुंमुर

हरपदोलक्ष्मणपक्ष्मलाक्षी ॥ ३ ॥ रम्यंयावन्मुरहरपदेशोभ
तेतावदेव । त्वय्यप्यास्तेकुलिशकमलस्यंदनांगांकुशादी ॥
गोपीदौत्यप्रकटनभियासन्निधौचक्रपाणे । र्योनेधीरप्रमुख
मुखरोनूपुरोनप्रहीतः ॥ ४ ॥ युक्तंचैतत्त्वयिमधुपुरींप्रस्थितेपु
ण्यशीलाः । कीलालोत्थैःसुरभिकुसुमैरर्च्चयंतोपिभक्त्या ॥
पश्यंतस्त्वांनयनसुभगंसाश्रुधाराक्षियुग्मं । यास्यंत्युच्चैःपुल
किततनुप्रेमधारामुदारां ॥ ५ ॥ चेतःप्रस्थापितमणुतयादौत्य
कर्मोपयुक्तं । तत्रैवास्तेमुरहरपदस्पर्शमासाद्यमुग्धं ॥ आकां
क्षेयंतनुगुरुतयानैवगंतुंसमर्था । कोऽन्योगच्छेद्वदमधुपुरीं
गोपिकानांहिताय ॥ ६ ॥ आगंतव्यंझटितिमथुरामंडलाद्गोप
कांते । शांतेतित्वंभवमधुरिपुःप्रस्थितःसोच्यचेदं ॥ वाक्यं
तच्चश्रवणमभवत्तेनमेनेक्रमांक । मायःसत्यंमतमिदमहोका
रणंकार्यमेव ॥ ७ ॥ तूर्णंतस्यांगमनमुचितंतेनमेतद्वियोग ।
व्याधेःशांतिस्तवचभवितातत्पुरीस्पर्शपुण्यं ॥ वृंदारण्याद्ध
वतुसुकृतंभूरितेनैवकिंस्या । न्नाकांक्षाकिंभवतिविपुलश्रीम
तोऽर्थांतरेषु ॥ ८ ॥ अक्रूरस्यव्रजकुलवधूमाणपानोद्यतस्य ।
प्रीतिर्भूयोभवतुभवतोदर्शनात्तेनकिंवा ॥ कार्यासिद्धिर्भवतिय
दहोमादृशांदुःखहेतु । नैवोन्नत्यंसकलभुवनप्रार्थनीयंरिपूणां
॥ ९ ॥ संत्येवास्मत्कलुषकरिणःकोटिशोवारणीया । स्तेप्य
स्माभिःस्मृतिकरवरेणांकुशंतेगृहीत्वा ॥ स्वच्छंदेनव्रजमधुपु
रींकोभवेद्वाविरोधी । गोपीभर्त्तुर्विरहजलधिगोपकन्यास्तरं
तु ॥ १० ॥ आस्तेनूनंयदुषुमथुरामंडलेचक्रपाणिः । कूजद्भृं
गैरमलकमलैराकुलेगोकुलेवा ॥ तस्माद्गच्छेरतिलघुपुरींतांच

जन्मावनीव । द्वालक्रीडांरचयतिमुहुर्यत्रतत्रानुरागः ॥ ११ ॥ आस्तांमध्येतरणितनयाभीषणाभूरिनक्रै । रावर्त्तांधैरधिनभ यद्वैस्तांतरिष्यस्यवश्यं ॥ संसाराब्धितरतिसहसायत्क्षणांचि तयित्वा । तस्यासाध्यंभवतिकिमहोपारयानंतटिन्याः॥१२॥ दृष्ट्वैवन्वांविदितमधुनापूर्ववत्पद्मनाभं । प्राप्यावश्यंविरहजल धेःपारमासादयिष्ये ॥ मोदिष्येचक्षणमपिहरेरास्यचंद्रामृते न । प्राप्तप्राणामुरभिकुसुमामोदितेमंजुकुंजे ॥ १३ ॥ संपर्का त्तेतरणितनयातीरसोपानवृंदं । राज्ञःपंथास्तलमपितरोराचितं पद्मरागैः ॥ शोभांयास्यत्यचिरमतुलांस्वीयकार्यानुरोधा । दुक्तैरेतैर्मुहुरपिसखेतत्रनस्थेयमेव ॥ १४ ॥ येवीक्षंतेसततम धुनाश्रीपतेरंघ्रिपद्मं । मंजीराद्यैःकनककलितैर्भूषणैर्भूषितंच ॥ तेषांचत्वंकिमुनभवितालोचनप्रीतिहेतु । व्यक्तैरेतैःकुलिशक मलस्यंदनांगादिचिन्हैः ॥ १५ ॥ यस्यासंगादलभततनुंमानु षींगौतमस्त्री । ध्यानेनैवप्रथितमहिमश्रीपतिंनारदादिः ॥ त स्माज्जातेत्वयिमधुरिपोरंघ्रिपद्माद्विचित्रः ॥ किंदीनानामुपरि करुणालिंगितोदृष्टिपातः ॥ १६ ॥ एकंचिन्हंहरिपदभवंपन्न गस्योत्तमांगे । तादृक्शोभामपिखगपतेर्नैभयम्वंचकार ॥ पिंडेनान्यत्तरणिरभवद्घोरसंसारसिंधौ । ध्यातंतादृक्कमपि महतांजन्मविश्वोपकृत्यै ॥ १७ ॥ उत्फुल्लानामतिसुरभयः सौरभैरंबुजाना । मंभोलेशैस्तरणिदुहितुःशीतलैःशीतलाश्च ॥ अद्यावश्यंसततगतयःस्वैरमाधूतबर्हा । वर्त्तिष्यंतेभवदभिम तप्रीतयेलोचनाग्ये ॥ १८ ॥ व्यक्तव्येयंचिरपरिचिताजन्मभू मीतिबुध्या । माखिद्यस्वत्रिभुवनजनत्राणहेतोःक्रमांक ॥

किंनन्याज्यंभवतिमहतांचेत्परस्योपकारो । वाराणस्यामुनि रपिगतोदक्षिणाशामगस्त्यः ॥ १९ ॥ कर्पूरादेःसलिलमभव द्वैतरण्यंबुतुल्यं। वाक्यागम्यंनदतिकठिनंकोकिलःषट्पदोपि॥ वृंदारण्येकिरतिगरलंदुःसहंशीतरश्मि । नैतद्वाच्यंसकृदपिसखे सन्निधौकेशवस्य ॥ २० ॥ प्रस्थानंतेकुलिशकलनान्श्चितं पंडिताग्रै । श्चित्तेऽस्माकंतदपिरमतेयाहियाहीतिवाणी ॥ अ स्मामाण्यंजनयतिसदानंदसूनोर्वियोगो । व्याप्यज्ञानाद्व्रजकु लभुवांव्यापकस्यापिसिद्धौ ॥ २१ ॥ उक्तप्रायंतरणितनया नागयोस्तत्कथाया । मास्तेकोवाजगतिभवतांभीतिहेतुःक मांक ॥ किंचस्वांतेक्षणमपिभवत्संगमेयातिदूरं । भीतिर्मृत्यो रपिकिमशनिंलोकरीत्यादधासि ॥ २२ ॥ येनारूढंविषधर शिरोभूरिवक्तव्यमन्य । त्किंवाकारिस्तनगिरिवरारोहणंचश्रु तंच ॥ उत्पन्नस्यप्रियतमपदातेनभीतिस्तवास्ते । कोवाब्रूया दितिहिसदृशंकारणेनैवकार्यं ॥ २३ ॥ ज्ञातंज्ञातंकुलिशसदृशं चिन्हमेतन्नवस्रं । नोचेदेवंजनयतिकथंलोचनप्रीतिधारां ॥ दूरस्थंचग्लपयतिमनोनिस्वनोयस्यतस्या । स्नेत्रप्रीतिप्रदमि तिवचोनश्रुतंकापिकेन ॥ २४ ॥ आस्तेचैवंनवजलधरोयंवि लोक्यप्रमोदा । न्नृत्यंत्युच्चैर्विषधरभुजोनिस्वनोप्यस्यभी मः ॥ मिथ्यैवायंयदवधिमयावीक्षितस्तादृशोयं । कंदर्पोमां तदवधिदहत्येवबाणैरसह्यैः ॥ २५ ॥ क्रोशस्यांतेचरणयुगलं क्षालयन्सूरजायां । यायाःकिंचक्षणमपितरोर्मूलमासाद्यतिष्ठेः ॥ उत्कृष्टंयज्जनयतिपदंसेवकानांजनानां । पभ्यांहीनंत दितिजगतांप्रत्ययःकूर्मलोम ॥ २६ ॥ आरुह्यात्मद्रुदयमथवा

गच्छतुंगंतुरंगं । सौरंतेजःसजलजलदच्छाययावारणीयं ॥ वृष्टिनैवत्वदुपरिकरिष्यत्ययंचंडरश्मिः । खेदाशंकीसरसिंज सखस्त्वद्धृतांभोरुहस्य ॥ २७ ॥ एतेनस्यान्मधुपुरगतिःकेन मेपंकिलोऽभूत् । पंथानंदव्रजकुलभुवांलोचनांभोभिरुच्चैः ॥ नोवाशुष्कोहरिविरहजोत्तापितोपींदुवक्त्रे । निर्व्योप्तेर्नयनपयसांवाक्यमेतन्निरस्तं ॥ २८ ॥ अद्भिस्ताभिस्तरणितनयापीनतांनैवलब्धा । गोपीभर्त्तुर्विरहदहनैःप्रत्युतक्षीणतांच॥ नोचेदेवंसलिलतरसागोकुलेमास्तुकिंतु । प्रस्थानंतेकिलमधुपुरेनिर्विरोधंक्रमांक ॥ २९ ॥ क्षीणैवास्तेतरणितनयावस्तुतस्त्वद्वियोगे । कावापीनाभवतिवचनंकस्यचिन्नेतियुक्तं ॥ गोपस्त्रीणांनयनसलिलैर्वर्द्धतेसाविशोर्णा । अन्येनंदव्रजपुरजनानूनमत्यर्थकंयत् ॥ ३० ॥ सामग्रीचेन्नफलविरहोव्याभिरेवेतितत्वं । तत्वंगोपीनयनसलिलेकेवलेप्यस्तिमैवं ॥ उत्कंठायांन्हृदिनकुरुतेकारणानांसहस्रं । लक्षंवापिक्षणमपियतःपीवरत्वंजनानां ॥ ३१ ॥ तस्मात्तस्याविरतिरथवाहेतुरन्यादृशोऽस्या । नस्यादेवक्वचिदपिफलंकारणासन्निधाने ॥ नष्टेहेतौप्रभवतिकुतःकार्यमित्यप्ययुक्तं । यागेऽपूर्वादिवजनकताद्वारतस्तस्यसिद्ध्या ॥ ३२ ॥ क्लेशोत्साकंमलयपवनैर्मूर्च्छयाचोपकार । स्तत्मात्सर्वंकिलविधिकृतंकारणंकारणानां ॥ अंभोजानामृतकिरणज्योतिषाम्लानरुच्चैरुग्रज्योतिःकिरणमिलनाज्जायतेचमकाशः ॥ ३३ ॥ स्त्रीभिःप्रेमप्रियतमकृतंनैवशक्यंविहातुं । यातेऽतस्त्वांकिलमधुपुरींचंक्रमायक्रमांक ॥ दग्धेनापिव्यथितन्हृदयापंचबाणेनबाणैः । क्रूरैरुच्चै

किंनन्याज्यंभवतिमहतांचेत्परस्योपकारो । वाराणस्यामुनि
रपिगतोदक्षिणाशामगस्त्यः ॥ १९ ॥ कर्पूरादेःसलिलमभव
द्वैतरण्यंबुतुल्यं। वाक्यागम्यंनदतिकठिनंकोकिलःषट्पदोपि॥
वृंदारण्येकिरतिगरलंदुःसहंशीतरश्मि । नैतद्वाच्यंसकृदपिसखे
सन्निधौकेशवस्य ॥ २० ॥ मस्थानंतेकुलिशकलनान्निश्चितं
पंडिताग्रै । श्चित्तेऽस्माकंतदपिरमतेयाहियाहीतिवाणी ॥ अ
नामाण्यंजनयतिसदानंदसूनोर्वियोगो । व्याप्यज्ञानाद्व्रजकु
लभुवांव्यापकस्यापिसिद्धौ ॥ २१ ॥ उक्तप्रायंतरणितनया
नागयोस्तत्कथाया । मास्तेकोवाजगतिभवतांभीतिहेतुःक्र
मांक ॥ किंचस्वांतेक्षणमपिभवत्संगमेयातिदूरं । भीतिर्मृत्यो
रपिकिमशनिर्लोकरीत्यादधासि ॥ २२ ॥ येनारूढंविषधर
शिरोभूरिवक्तव्यमन्य । त्किंवाकारिस्तनगिरिवरारोहणंचश्रु
तंच ॥ उत्पन्नस्यप्रियतमपदातेनभीतिस्तवास्ते । कोवाब्रूया
दितिहिसदृशंकारणेनैवकार्यं ॥ २३ ॥ ज्ञातंज्ञातंकुलिशसदृशं
चिन्हमेतन्नवञ्च । नोचेदेवंजनयतिकथंलोचनप्रीतिधारां ॥
दूरस्थंचग्लपयतिमनोनिस्वनोयस्यतस्या । स्नेत्रप्रीतिप्रदमि
तिवचोनश्रुतंक्वापिकेन ॥ २४ ॥ आस्तेचैवंनवजलधरोयंवि
लोक्यप्रमोदा । न्मृत्यंत्युच्चैर्विषधरभुजोनिस्वनोप्यस्यभी
मः ॥ मिथ्यैवायंयदवधिमयावीक्षितस्तादृशोयं । कंदर्पोमां
तदवधिदहत्येवबाणैरसह्यैः ॥ २५ ॥ क्रोशस्यांतेचरणयुगलं
क्षालयन्सूरजायां । यायाःकिंचक्षणमपितरोर्मूलमासाद्यति
ष्ठेः ॥ उत्कृष्टंयज्जनयतिपदंसेवकानांजनानां । पभ्द्यांहीनंत
दितिजगतांमन्यथःकूर्मलोम ॥ २६ ॥ आरुह्यात्मद्रुदयमथवा

गच्छतुंगंतुरंगं । सौरंतेजःसजलजलदच्छाययावारणीयं ॥ वृष्टिनैवत्वदुपरिकरिष्यत्ययंचंडरश्मिः । खेदाशंकीसरसिंज सखस्त्वद्धृतांभोरुहस्य ॥ २७ ॥ एतेनस्यान्मधुपुरगतिःकेन मेपंकिलोऽभूत् । पंथानंदव्रजकुलभुवांलोचनांभोभिरुच्चैः ॥ नोवाशुष्कोहरिविरहजोत्तापितोपींदुवक्त्रे । निर्व्योत्पत्तेर्नय नपयसांवाक्यमेतन्निरस्तं ॥ २८ ॥ अद्भिस्ताभिस्तरणितन यापीनतांनैवलब्ध्वा । गोपीभर्त्तुर्विरहदहनैःप्रत्युतक्षीणतांच॥ नोचेदेवंसलिलतरसागोकुलेमास्तुंकितु । प्रस्थानंतेकिलमधु पुरेनिर्विरोधंक्रमांक ॥ २९ ॥ क्षीणैवास्तेतरणितनयावस्तु तस्त्वद्वियोगे । कावापीनाभवतिवचनंकस्यचिन्नेतियुक्तं ॥ गोपस्त्रीणांनयनसलिलैर्वर्द्धतेसाविशीर्णा । अन्येनंदव्रजपुर जनानूनमत्यर्थंकंयत् ॥ ३० ॥ सामग्रीचेन्नफलविरहोव्या मिरेवेतितत्वं । तत्वंगोपीनयनसलिलेकेवलेप्यस्तिमैवं ॥ उ त्कंठायांन्हदिनकुरुतेकारणानांसहस्रं । लक्षंवापिक्षणमपि यतःपीवरत्वंजनानां ॥ ३१ ॥ तस्मात्तस्याविरतिरथवाहेतुर न्यादृशोऽस्या । नस्यादेवक्वचिदपिफलंकारणासन्निधाने ॥ नष्टेहेतौप्रभवतिकुतःकार्यमित्यप्ययुक्तं । यागेऽपूर्वादिवजन कताद्वारतस्तस्यसिद्ध्या ॥ ३२ ॥ क्लेशोन्मीलत्कमलयपवनैर्भू र्च्छयाचोपकार । स्तस्मात्सर्वंकिलविधिकृतंकारणंकारणा नां ॥ अंभोजानामृतकिरणज्योतिषाम्लानरुच्चैरुद्यज्योतिः किरणमिलनाज्जायतेचप्रकाशः ॥ ३३ ॥ स्त्रीभिःप्रेमप्रियतम कृतंनैवशक्यंविहातुं । यातेऽतस्त्वांकिलमधुपुरींचंक्रमायक्र मांक ॥ दग्धेनापिव्यथितहृदयापंचबाणेनबाणैः । क्रूरैरुच्चै

र्मदनरमणीतल्कृतेरोदितस्म ॥ ३४ ॥ आस्तेचित्तेकिलकल यितुंवासनासंबरारे । ऐकैकेनव्रजकुलवधूप्राणमेकैकमंक ॥ बाणेनातःसततमतनुर्जातकोपाहितुल्यैः । क्रूरैरस्मान्दहतिकु सुमैःशायकैःपंचसंख्यैः ॥ ३५ ॥ यल्लोकानामपकृतिभया त्कालंकूटोपिपीत । स्तानेवायंदहतिगरलैस्तादृशैरर्चितेन ॥ बाणेनेतित्रिपुररिपुणाजातकोपेनदग्धो । नेत्रोत्थेनप्रबलशि खिनानिर्दयंसंबरारिः ॥ ३६ ॥ नैवंन्यूनःसगरजगरःशम्बरा रेःशरस्य । ब्रह्मादीनामयमपियतोधैर्यविध्वंसहेतुः ॥ एतद्वा क्यंगिरिशचरणैःखंडितंमंडिताक्षै । रन्यासंगाव्यथितन्ददयै र्निर्दयंदग्धुकामैः ॥ ३७ ॥ उत्तापोयंमदनजनितोवर्द्धतेनित्य मुच्चै । र्वृंदारण्येवसतिरधुनाकेवलंदुःखहेतुः ॥ किंचास्माकंन यनसलिलैर्वर्द्धतेचेन्नदीयं । केनस्थेयंद्रुतगतिजलैराचितेकुंज मध्ये ॥ ३८ ॥ यस्यध्यानंजनयतिसुखंयादृशंतादृशानां । स्वर्लोकादावपिकिमपरंब्रह्मसाक्षात्कृतौच ॥ ज्ञेयंचैतन्मुनि वरमुखांभोजतःकीदृशीते ॥ बुद्धिस्तादृग्जनकविधयेदर्शनेना स्तियत्नः ॥ ३९ ॥ वक्तव्यंयन्मदनजनितंदुःखमस्माकमेत । द्भूयोभूयःप्रियतमपदेगोपयित्वास्वदेहं ॥ दृष्टेतेनत्वयिनयन योर्निस्तुलप्रीतिहेतौ । यास्यत्येवक्षणमपिमनस्तत्कथायांन तस्य ॥ ४० ॥ वक्तव्यंचस्फुटमितियदानिर्जनस्थोमुकुंदः । पद्माद्यैकैरतिसुललितैरंकितंतत्पदाब्जैः ॥ वृंदारण्यंस्मरसिन कथंश्रीपतेमंजुकुंजं । ज्ञातंज्ञातंयदिहनपरीरंभणंकुब्जिकायाः ॥ ४१ ॥ आकांक्षायाग्लपयतिमनोमादृशांवासनासा । शा ब्देधर्मेसतिनभविताहानिरेवक्रमांक ॥ साकांक्षोक्त्यामुरहर

पदेसर्वमतन्निवेद्यं। नोचेत्तस्यप्रमितिजननेकेनहेतुस्तवोक्तिः ॥ ४२ ॥ आगंतव्यंसरसिजदृशाबोधितेनत्वदुक्त्या । नाप्रत्यक्षंप्रमितिकरणंवाक्यमेतन्नयुक्तं ॥ स्वीकर्त्तव्यंनयनविरहाप त्तिभीत्येतिसर्वं । मानाभावाद्दृशिनहिभवेन्मानमन्यद्वितीयात् ॥ ४३ ॥ बौद्धस्यैतन्मतविटपिनोमूलमाच्छादितंस्यात् । मृद्धिस्तस्यानृतवचनतोयन्मयापूर्वमुक्तं ॥ यद्यस्माकंसततम तनोःशायकक्षुण्णदेहः । मामाप्येस्यात्कुसुमविशिखोस्तीतिवाक्येनसाक्षी ॥ ४४ ॥ मूर्खाएवक्षणिकमनिशंविश्वमाहुर्नधीराः । खेदोऽस्माकंहरिविरहजःसर्वदैवास्तिचित्ते॥ नांन्यःशब्दोवचनमपियत्तादृशंतस्यकिंतु । प्रेमैवास्मन्प्रियतमकृतंतच्चगोपांगनासु ॥४५॥शाकेसायकवेदषोडशमितेश्रीकृष्णशर्मार्पय । न्नानंदमदनंदनंदनपदद्वंद्वारविंदंदधि ॥ चक्रेकृष्णपदांकदूतरचनंविद्वन्मनोरंजनं । श्रीलश्रीयुतरामजीवनमहाराजाधिराजादृत. ॥ ४६ ॥ इतिमहामहोपाध्यायश्रीकृष्णसार्वभौमविरचितंपदांकदूतकाव्यंसमाप्तं ॥ १३ ॥

उद्धवदूतः

गोपीबंधोरनवधिकृपादाक्ष्यदाक्षिण्यसिंधो । रादेशेनप्रणयपटुनाप्रापितंगोकुलाय ॥ गोधुग्वृंदव्यसनविसरालोकदुःस्थंरहस्थं । मध्येकुन्यंमियसहचरीमुद्धवंकाचिदूचे ॥ १ ॥ कस्त्वंसाधोकुवलयदलस्यामविस्तीर्णदृष्टे ।दृष्टेसद्योभवतिभवतिस्निग्धमन्यंतमंतः ॥ किंवामश्रैरहहमथुरानाथमुक्तंतदेत ।

श्चत्तेमौलौकनककपिशंसौरभोद्वारिवासः ॥२॥ तत्त्वंतत्त्वंमधु
पुरपतेर्लब्धलोभ्यप्रसाद । स्तद्विश्रंभस्थलमतिमहन्नेहसंदेह
लेशः ॥ वक्षस्येतन्ममचकिमिदंकथ्यतेदर्श्यतेवा । जातंय
स्मादखिलमधुनाहंतहास्यास्पदंनः ॥ ३ ॥ प्रस्थानंतेभवतु
भगवन्मत्रवाप्यान्यतोवा । गंभीरत्वंभजतुसभवानित्थमुक्ता
नतांवा ॥ यद्वातद्वाभवतुविधिनावंचितेयंवराकी । यत्तेवि
ज्ञापयतिनिमिषंपातनीयोत्रकर्णः ॥ ४ ॥ कैषायोषित्प्रकृतिच
पलापामरीकातराच । ज्यायान्यातोयदुकुलपतिर्वल्लुभत्वंक
चत्वं ॥ विज्ञप्तौमेतदपिभवताभव्यनोदासितव्यं । सानुक्रो
शंवहतिहिमनोदुर्गतेदुर्जनोपि ॥ ५ ॥ त्वंकल्याणीननुकुल
वधूःसार्द्धमन्येनपुंसा । संलापस्तेसपदिसमुदाचारसेतुंभिन
त्ति ॥ जल्पन्नेवंनहिजहिघनश्यामदास्योन्मदानां । लोका
तीतंकिमपिचरितंकेननालोकितंनः ॥ ६ ॥ अभ्रश्यामंस्मर
सिनमनागित्थमुद्भाषिणीनां । प्राणत्राणश्रवणमनसोगोदुहो
गेहिनीनां ॥ एताःशश्वत्कुसुमशयनेशाययित्वासखीव ।
मंदंमंदंसरसबिसिनीपल्लवैर्वीजयंति ॥ ७ ॥ सिंहव्याघ्रप्रभृ
तिभिरपिप्रेक्ष्यमाणाःप्रबाष्पै । राक्रंदेषुप्रखरकुररीसंसदं
शिक्षयंत्यः ॥ एकाकिन्यस्तरुणतिमिरास्तत्पदस्पर्शपुण्ये ।
वृंदारण्येकतियुवतयोयामिनीर्यापयंति ॥ ८ ॥ पश्यन्लक्षिद्व
यमविरलस्यंदमानाश्रुधारा । क्लिन्नाभोगंममचकिमभूर्लघि
तोविस्मयेन ॥ गोगोपानांविरमतुकथानेहभीरस्तिगत्वा ।
सारंगाणामपिवनजुषांपश्यकीदृक्षमक्षि ॥ ९ ॥ राधेमन्युंप
रिहरहरिःपादमूलेतवायं । जातंदैवादसदृशमिदंवारमेकंक्षम

स्व ॥ एतानाकर्णयन्निनयवनूकुंजकीरानुवादा । नेभिःक्रू रैर्वयमविरतंवंचितावंचिताःस्म ॥ १० ॥ त्वंचेदंचेदिहविमुख तामत्रबालेतमाले । प्राणान्मोक्ष्येवनलतिकयाकंठमुद्बध्यस द्यः ॥ आतंकोवाकइहभवतांसेवकास्तस्ययूयं । यस्योद्दे श्यंनखलुकिमपिस्त्रीवधादन्यदस्ति ॥ ११ ॥ पीतप्राणाप्रथम ममुनापूतनास्तन्यदात्री । दिष्टस्यांतंकतिनगमितावेणुगीतेन गोप्यः ॥ तस्यप्रीत्याजगतिविदितंयत्कृतंयज्ञपत्न्या । स्वातं त्र्येणप्रविशतिमनस्तत्रतत्किकरोमि ॥ १२ ॥ अश्रुस्निग्धं नयनयुगलंरूढरोमांचराजि ॥ प्रत्यंगंतेतदलमनयादेवदुःशंक यानः ॥ एतद्दीनोद्धरणपटवेतुभ्यमभ्यर्थनीयं । मत्संदिष्टंमु दिरमहसिप्रेयसिप्रापयेति ॥ १३ ॥ नंदोनत्वांन्यजतिनिमिषं नापिदेवीयशोदा । श्रीदामाद्याअपिनशिशवोनापिपौराःस दाराः ॥ सत्वंलब्धोरहसिचमयाकेनचिन्नापिदृष्ट । स्तन्नि र्णीतंकिमपिसुकृतंशिष्टमस्माकमस्ति ॥ १४ ॥ द्वित्रानत्राव ससिदिवसानास्पदंघोषभर्तुं ।स्तेनाशंकेपुरमिदमसिप्रेषितोमा धवेन ॥ एतद्बीजंकिमपिबहुधामद्विधाभावयंत्य । स्तस्यात्र त्यंकिमपिनपुनःकृत्यमालोकयंति ॥ १५ ॥ तेनप्रायोसपदि जनकौपोषकाभ्यांकिमाभ्यां। किंगोरक्षैःसखिभिरधुनाराज पुत्राःसखायः ॥ तस्यद्वारेकतिकरटिनस्तर्णकादेःक्वचिता । हंताभीरीस्मरतुसकथंसंवृतोनागरीभिः ॥ १६ ॥ आस्तामे तन्ममकिमनयाकूटकृत्यानुवृत्त्या । सारंफल्गुप्रियमथपरंप थ्यमन्यादृशंवा ॥ धर्माधीनैरितिममवचःपुंडरीकाक्षसाक्षा । दाख्यातव्यंयदनुकरणेकुत्रचिन्नैवदोषः ॥ १७ ॥ विख्यातो

भूर्दिनकतिपयंनंदसूनुर्यशोदा । नेत्रानंदीव्रजजनपतिर्वल्लभो वल्लवीनां ॥ अद्यख्यातोमधुपुरपतिर्माधवीप्राणनाथः । सूनुः शौरेरगणितगुणोदेवकीनंदनोसि ॥ १८ ॥ गोपीषूद्धुष्विवतव समोभोगकालःकलानां । भर्त्तुःकर्त्तुर्निखिलनयनानंदर्मिदो रिवासीत् ॥ तासांमध्येतदपिरमणीरोहिणीवप्रसिद्धा । सा त्वांनन्वारहसिपरमार्किंचनार्किंचिदाह ॥ १९ ॥ इत्यत्रन्यै रुपधिभिरपिस्निग्धसंबोधनंते । जायेतारुंतुदमुदयिनीरीतिर न्याद्ययद्वः ॥ माक्संस्कारास्तदपियदिमांतेनुबध्नंतिदोषः । क्षंतव्योऽयंभवतुभवतावाचिकर्माक्रियासु ॥ २० ॥ वाक्चा तुर्यंत्वयिबतवृथासंततांतश्चरेण । ज्ञातंचेतश्चरितमखिलंमन्मथे नत्वयाच ॥ विज्ञप्तिर्मेतदपिमथुरानाथनेयंविरुद्धा । संतप्तादे र्वचसिविदितंपौनरुक्तंनदोषः ॥ २१ ॥ गोरक्षत्वंसमजनिय दातावकीनंतदैव । स्वच्छंदत्वंतवतिरयितुंनाथमाभूदशक्ताः॥ वश्यःकस्यत्वमथजगतामीशितार्किंतुवाचा । माविष्कारैर दयत्दयग्रंथिमुद्घाट्यामि ॥ २२ ॥ किंतेजन्मांतरमुपगतं पारसंचारकाले । धौतंनद्याःकिमिदमथवाकार्मणीमाशुरी णां॥विस्मर्त्तव्यंयदिहनतनौयत्रबद्धःपशोर । प्यत्रप्रेम्णिक्षण कतिपयैर्नाथनिर्लेपकोऽसि ॥ २३ ॥ कर्तांकृष्णोनियतमधु नागोकुलंराजधानी । बंधुभ्योपिप्रगुणममुनागोदुहोमाननी याः ॥ काचिद्गोपीभवतिमहिषीत्युक्तमग्रेनवाकैः । तद्वैदग्ध्ये नतुपितृवनप्रेतवत्कारिताःस्मः ॥ २४ ॥ नीतेनामन्यपिचभ वतःप्रस्थवानांस्तनाभ्यां । बिभ्रत्यंकेपुलकिनिभवद्वेणुवेत्रप तोदान् ॥ सोरस्ताडंनवहतुतवाक्रंदमंबाकथंवा । यस्मादद्य

Digitized by Google

प्रशमितपरोराजराजेश्वरोसि ॥ २५ ॥ तैरुत्साहैःक्वखलुच लितंकुत्रतेनर्मवाग्दाः । कंठीमग्नःकरुणकरुणैस्तातकृष्णेतिश ब्दैः ॥ पर्वस्वंतःकिमपिविरुजन्नाममात्रानुकारी । विच्छेद स्तेतमपिकृतवान्नंदमस्पंदमेव ॥ २६ ॥ दोहःप्रायोनभवतिग वांदोहनंचेन्नपाकः । क्षीराणांस्यात्सभवतियदादुर्लभंतद्दधि त्वं ॥ दध्नःसिद्धौक्वखलुमथनंमंथनेकोपयोग । स्तक्रादीना मितिगतिरभूद्यगोधुग्गृहेषु ॥ २७ ॥ तन्नक्षोणीखुरविलिख नंवप्रभंगोनशृंगै । नैवास्पर्द्धीवनजलमुचांघोरहंबानिनाद॥ कामोन्मादैरुदयतिनवासोपसर्यासपर्या । नामावाहामधुपु रपथादन्यदालोकयंति ॥ २८ ॥ वत्सालोकस्मरणसुलभप्र स्रवप्लावनीयं । धूलीजालंनयनसलिलैरध्वसुप्लावयंत्यः ॥ त्वामन्विष्यव्रजपुरसरित्तीरभूषुभ्रमंत्यः । सद्योजातानपिसु रभयोनार्भकान्पाययंति ॥ २९ ॥ निःप्रेमाणोललितयवस श्यामश्रीमन्नरण्ये । न्यस्यन्यस्यन्वदनुसृतयेचक्षुषीदिक्षुदि क्षु ॥ आजिघ्रंतिव्यथितमनसःकिंचसिंचंतिबाष्पैः । क्रीडा नीपंतवयदुपतेवत्सलावत्सतर्यः ॥ ३० ॥ भास्मत्कन्याकमल विपिनंकर्णिकाशेषमेत । द्वंद्वारण्यद्रुमकिसलयाःपांडुपत्रीभवं ति ॥ शस्यैःपंकैःपिहितमभितस्त्वद्विलासानुकूलं । मूलंध त्तेसतवकमलाकांतकेलीकदंबः ॥ ३१ ॥ येवैगोवर्द्धनधरतव स्निग्धगंभीरघोषैः ॥ केकावाचस्तिमितनयनास्तेभिरेतांडबा नि ॥ अद्यप्रावृड्घनघनघटागर्जितेपिप्रवृत्ते । भुग्नग्रीवाःकिम पिनहितेपुच्छमुल्लासयंति ॥ ३२ ॥ यस्यस्कंधोमसृणसुरभि स्तारकैरंगसंगै । र्यत्रास्माकंसिचयनिचयंचोरयन्नुत्थितो

सि॥यस्याधस्तात्तवचरणयोश्चक्रचिन्हाधरित्री । धन्योनीपः समभवदसौदेवदुग्धंदशौनः ॥ ३३ ॥ पांडुच्छायाःकुसुमरज साभृंगमालाजटालाः । संवीतांगाःकिसलयरुचापाटलेनांबरेण ॥ भोगाभावादपगतरुजःपावनाभ्यासभाजः । सर्वेवृंदावनविटपिनोयोगिचर्याचरंति ॥ ३४ ॥ शृंगस्वानप्रियसखसमाहूतिगोरक्षहिक्काः । मत्याख्यायव्रजपुरपथस्योपकंठेविशिष्य ॥ श्योतद्वाष्पाःसहसुरभयस्तोककृष्णादयस्ते । सायंमातर्नगरसरणौचौरवत्संचरंति ॥ ३५ ॥ विस्मृत्यत्वन्मधुपुरगतिं वासरांतेपुरांतः । श्रीदामादौविंशतिविंशतीहस्तैर्हयंगवीना ॥ वत्सक्कासिक्कचममसुतेत्युन्मदेवभ्रमंती । त्वामप्राप्यव्रजपतिवधूःक्रंदयत्यश्यनोपि ॥ ३६ ॥ वीतासंगाःशयनवसनस्नानपानाशनादौ । गायंत्यस्त्वच्चरितगुणिताःसंततंगीतगाथाः ॥ औदासीन्यंकिमपिसकलाबंधुवृंदेवहंत्यो । गोप्योलीलाक्षितिषुभवतोयोगिनीवद्भ्रमंति ॥ ३७ ॥ स्वार्थनैतत्समुचितत यावच्चिमकर्मातितीव्रं । सह्यंयस्मिन्नजनिसमयेनाथयातःस कालः ॥ अद्यत्रस्यत्त्रिभुवनवशीकारमाधुर्यधूर्यै । त्वच्चातुर्यैनभवतियथालांछनंतद्विदभ्याः ॥ ३८ ॥ एकैकाभिर्विहितमसकृत्तत्तवेहानुगत्यं । यस्मैकस्मिन्नपिगणयतिक्रीतमात्मानमन्यः ॥ धिग्वैदग्ध्यंतवतदिहताःसिंधुपारंविहाय । स्मैरीवैरीपरमद्वयन्निर्भरंनिर्वृतोसि ॥ ३९ ॥ कूलक्रोडेतपनदुहितुश्यालपेकेनिमग्नं । यत्नादुत्थापितमथकृतोपस्क्रियंकौशलेन ॥ न्यस्तंपीठेतवचरणयोश्चक्रचिन्हंपदंतत् ॥ शालिग्रामोपलमिवसदामद्विधाःपूजयंति ॥ ४० ॥ युक्तासर्वात्मनिमयिम

नःसच्चिदानंदरूपे । चेतस्तापंजहितनुहितःकश्चिदेवांगसंगः ॥ इत्युद्देशान्कथयसिवृथामादृशांबालिशानां । एतेह्यित्वद्विरह शिखिनःसामिधेनींभजंति ॥ ४१ ॥ वेशेवाम्यंतदपिमुदिर-श्यामसावर्ण्यतस्ते । मुग्धाहस्तेमरकतमयीकंकणश्रेणिरिद्ध-क् ॥ अंगालेपोमृगमदरसैःस्निग्धनीलंदुकूलं । सर्वांगी नंव्रजपुरजुषामंगनानामिदानीं ॥ ४२ ॥ साक्षादीक्षांघट्य तिघनश्यामयत्तेकुतस्तत् । तल्लावण्यंकथयकृतिनाकेनचि त्रेणलेख्यं ॥ अक्रूरस्यागमनदिवसान्निद्रयानाथनष्टं । कुत्र स्वमःशिवशिवदृशौबाष्पदृष्ट्यैपरंनः ॥ ४३ ॥ दत्तस्वमोभव सियदिमेदर्शनीयःकदाचि । द्वर्हापीडंमधुरमुरलीधामतद्धाम दृश्याः ॥ अस्मादन्यद्यदिवितनुषेदीयतेदिव्यमुग्रं । पादस्पर्शः पुरमृगदृशांदुर्लभस्तत्तवस्यात् ॥ ४४ ॥ मद्भावेनस्थिरमथ चरंभावयंत्योभवत्यः । संतुष्यंतुत्वमितिबहुधासत्वमस्मानवा दीः ॥ आख्यातव्यंकिमिहभवतःकिंचिदूनोनवासौ । नैवा स्माकंमदयतिमनोनामनीलांबरोपि ॥ ४५ ॥ व्यक्तीभूतः स्वयमयमसिश्लाघनीयःसमृत्व्या । ऋज्वीषुत्वंकथमिहपरी तोषमस्मासुयायाः ॥ तत्तद्धुमकरपुरतस्तत्रकापित्रिवक्रा । धृ त्वायत्त्वामधिनिवसनंनाथनिघ्नीचकार ॥ ४६ ॥ गव्यस्तेन मथमुदभूर्वत्सपालश्चपश्चा ॥ त्तत्रेदानींतदनुतदनुछिद्रनौक र्णधारः ॥ लुंठाकोभूदथकुलवधूजातिजीवार्थसार्थ । धिग्धाता रंभवतिनिहितोयेनभूचक्रभारः ॥ ४७ ॥ भक्तिप्रीतिप्रणयस हितंमानदंभाद्यपेतं । चेतोस्माकंगुणवदगुणंगोदुहांदेहमेतत् ॥ विक्रीतंतेयुगपदुभयंस्वीकृतंचत्वयाथो । त्वद्वृण्हासित्यज

सिचवपुर्नाथकोयंविचारः ॥ ४८ ॥ यत्राधर्मःप्रसवतितरांय त्रभूयाननर्थो । यत्राकामःसपरमुदयीयत्रतेनास्तिमोक्षः ॥ त्यागेतस्मिन्नपिपरिजनेगोचरेयत्त्वनर्थी । तस्मादर्थीभवति विदुषांपौरुषव्यत्ययोपि ॥ ४९ ॥ शैलोद्धर्त्तादमितभुजगःपी तदावाग्निचक्रो । माद्यन्नागायुतबलगजाधीशभोजेंद्रहंता ॥ सत्वंदोषप्यसतिकुरुषेकिंकरीणामभद्रं । वक्तुंनास्तेजनइति नभोःकर्तुमेवंयुनक्ति ॥ ५० ॥ लोकातीतंयइहकुरुतेकर्मकिं धर्मधारा । तेनत्याज्याकिमिहविहितंश्रीमताराघवेण ॥ त्य क्तासीतातदपिसुचिरंसैवहैमीप्रियाभूत्। त्यक्तायस्मिन्नहनितु वयंतत्रकुब्जारतोसि॥५१॥व्यावर्त्तध्वंस्वभवनमितःकुत्रयेयात मुग्धा । ऋज्वीरद्यस्पृशतुसकथंवल्लभःकुब्जिकायाः ॥ संभू यत्वच्चरणकमलस्पर्शलोभेनयांती ॥ रित्थंगोपीपथिपथि बलादध्वगाअप्यरुंधन् ॥ ५२ ॥ पीयूषान्मातवकुलगुरुर्ज न्मदातावदातो । माताभूदियमपिजगत्पावनीतिप्रसिद्धं ॥ एकैकंतेजयतिजगदानंदिचित्रंचरित्रं । कस्मादेवंविरहदहने देवदासीर्जुहोषी ॥ ५३ ॥ स्वामीवामीभवतियदितत्सन्निधौ संचरिष्णुः । पथ्यंप्रत्यापयतिसमयःसोयमीशानयानां ॥ लोकद्विष्टंकिमपिभवतेकुर्वतेयुक्तवादी । साधुस्तस्मिन्नकिमुम थुरामंडलेकश्चिदस्ति ॥ ५४ ॥ येनागत्यत्वमपिमथुरांयानमा रोप्यनीतो । यश्चाविष्टस्तवचरणयोश्चक्रचिन्हेलुलोठ ॥ अ स्माकंत्वद्गमनसमयेसादशायेनदृष्टा । सोपिस्वामिन्किमपि करुणाकातरोनब्रवीति ॥ ५५ ॥ अस्मन्मर्मच्छिदुरमकरो त्कन्यमत्युत्कटंयत् । कंसस्तेनत्रिभिरपिदिनैस्तत्फलंसाधुले

भे ॥ त्वामुत्थाप्यत्वरिततुरगंयेनयानंवितेने ॥ किंचित्तस्यभुवरकुतःश्रूयतेनाधुनापि ॥ ५६ ॥ श्यामंतेजःप्रकृतिविमलत्वेनसंक्रांतसर्वं । प्रत्यक्षंचव्यवधिबहुलंविश्वरूपमकाशि ॥ आंध्यंजन्मावधिजनयताशेषलोकैकरत्नं । हाहातेनत्वमपिमुषितंतारकंचक्षुषोनः ॥ ५७ ॥ सूक्ष्मंसूक्ष्मादपिचकलयन्नंधवश्चेष्टतेयो । नांध्यंतस्मात्तिरयतिरसैरश्विनीनंदनोपि ॥ विज्ञातुंसत्वमपिरचयन्नेवमंगव्यवस्थां । वंकीकार्यःकथमिववृथाकिंपरंदूषयामि ॥ ५८ ॥ तत्तेचित्तंशरणमपिनःसर्वतोभद्ररूपं । व्यावृत्तास्मान्वसतिबलवन्नागरीवृंदमत्र ॥ वैदग्ध्यंतेकिमिदमधुनातद्वहिर्वीथिकांते । वासोरासोत्सवनटविभोर्दुर्लभोयन्ममापि ॥ ५९ ॥ किंनोवृष्ट्यानकिमशनिभिर्भूभृतावाहताःस्म । किंनप्लुष्टादवहुतवहैर्दंशिताःकिंनसर्पैः ॥ प्रेमसौढंकिमपिजनयन्नव्यलीकाश्रमुचं । न्यंचन्नेवंकथमपयशोघोरमंगीकरोति ॥ ६० ॥ अस्मत्प्राणास्तवपदनखच्छायनीराजनाय । तंयातोभूःसपदियदितेयांतिकोवाविषादः ॥ एकंकिंतुव्यथयतिमनश्छद्मनाकिंकरीणां । प्राणान्निन्येयदुपतिरितित्वद्गतांकिंवदंति ॥ ६१ ॥ संकोचोयस्तवगुरुजनेयश्चपौरांगनास । व्यक्तीभूतंतदुभयमभूत्कुब्जिकोपग्रहेण ॥ अस्मानेवक्षिपसिसहसादेवदूराद्वीयः । कर्तुंयःपारयतिसकृतीकिंकरोत्येवमेव ॥ ६२ ॥ एतस्माद्प्यधिकमधिकंयत्तदस्मासुकुर्या । नस्वमेपित्वयिविसदृशंचिंतयन्येतदंतः ॥ दंतेकृत्वातृणमितिमहासभ्यमभ्यर्थयामि । स्वामिन्नेवंनहिमधुपुरीक्षीणमध्यांविदध्याः ॥ ६३ ॥ द्रोणीरादौमलयजयुताशोचिताःसंचिनुध्वं ।

वापीर्निमग्नीकुरुतशतशोलालशैवालपूर्णा ॥ सख्यंसख्योयदि यदुपतौपातनीयंतदेति । प्रेष्योवश्योमिलतियदितन्माथुरीर्वेद यिष्ये ॥ ६४ ॥ सौभाग्येनव्रजकुलवधूसार्थसीमंतरत्नं । या कंसारेरतिगुणवतीस्कंधमप्यारुरोहे ॥ सेयंराधाकिमिदमिति मामुद्दिशंत्यंगुलीभिः । लोकानोत्रस्वतितनयनाःशाखिनोरो दयंति ॥ ६५ ॥ योविद्यायांतपसिभवतोज्येष्ठएवादिदेवो । माद्यन्मायाविभवभवतावंचितःसोपिदृष्टः ॥ यात्वामंबाशरण मविशद्वंचकश्चापितस्या । स्त्वामुद्दामाकथयनकथंलोकलज्जा रुणद्धि ॥ ६६ ॥ आदावेवक्षणसुखकरंकृष्णकल्पांतभोग्य । केशारंभित्वयिममहत्पातकंप्रेममन्ये ॥ प्रायश्चित्तंभवतिनच मेदुर्गतायाविधेयं । तेनैवत्वामहमविरतंसानुतापास्मरामि ॥ ६७ ॥ मातुर्नापिस्मरणमियतालक्षितंलौकिकंते । धर्माधी नोयदसितदपिव्यक्तमेतावतैव ॥ किंचब्रूतेतवरसिकतांनिग्रहः कामिनीनां । कोजानीतेकितवभवतःकुत्रतात्पर्यमस्ति ॥६८॥ तत्वज्ञानंकथयशतधाप्रेषयप्रेषलक्षं । चिंतारत्नंवितरकुरुवा सानुतापप्रसंगान् ॥ यावद्दोर्भ्यांतवनवघनश्यामलंधामगाढं । नाश्लिष्यामित्रुटतिनहिमेतावदेवैषतापः ॥ ६९ ॥ लक्ष्मीकां तंकतिचनचिदानंदमन्येविदुस्त्वां । मायाकारंकतिचिदपरे साधकाःसिद्धिमाहुः ॥ योवान्योवाभवनवघनश्यामतस्यैव धाम्नो । दासीभूतावयमितिपरेवंध्यकल्पाविकल्पाः ॥ ७० ॥ नायासिन्वंनचनयसिमामात्मनःपादमूलं । नोवादूतंविसृज सिनवालेखलेशंददासि ॥ निश्वासाग्निर्निपततिनतेकाचिदा श्वासवार्त्ता । कस्मिन्नास्थामुपहितवतीजीवितंधारयामि

॥ ७१ ॥ यत्पूर्वैर्युगमनदिवसान्मानभंगाभिलाषी । लक्ष्मी कांतस्त्वमपिपतितःपादमूलेममासीः ॥ स्पृष्टोंगुल्यातदपिनमया नापिनेत्रांतपीतं । चित्तेशैल्यंसमिषमिवतन्मामकेमग्नमस्ति ॥ ७२ ॥ कोजानातिन्वदपहरणक्रूरमक्रूरमामं । कःमन्येति त्वमपिसहसागोकुलंत्यक्ष्यसीति ॥ त्यक्तानायास्यसिपुनरिदं नाथकेनाशुमेयं । मद्दुर्दैवान्यहहसुमहादुर्घटंसाधयंति ॥७३॥ भूयस्त्वंचेन्मिलसिमहिलासंप्रदायंविहाय । द्वाभ्यांदृग्भ्यांयु गपदपितद्रूपमादौग्रहीष्ये ॥ आश्लिष्यन्वामहहतदनुस्पंदसं बंधहीना । कल्पक्रूरामपिनिमिषतांयामिनीयापयिष्ये ॥७४॥ यात्राकालेकथमपिचलन्नंदपत्नीकराज । व्यस्तन्यस्तेनचसु रुचिरंरोचनाचित्रकेन ॥ आशीर्दूर्वाक्षतचितमनुस्मर्यमाणं सुखंते । सर्वक्लेशापहमपिजगन्नाथमर्मच्छिनत्ति ॥ ७५ ॥ नस्मर्त्तव्यस्तदयमदयःकर्हिचिद्बर्हचूडो । निश्चिन्येतिस्पृहय तिमनोयावदर्थांतराय ॥ किंतेवैरंविहितमवरेकृष्णकृष्यन्नि वांत । धारावाहिस्मरणपदवींगाहसेतावदेव ॥ ७६ ॥ गुंजा हारंकतिचनतदापत्रशृंगाणिकेचि । त्केचिद्बर्हस्तबकमपेरेवत्र मन्येप्रतोदं ॥ वंशीकाचित्त्वदधरसुधासारसौरभ्यलभ्यां । निन्युर्धन्यानिजमविदुषीदीर्घमायुर्मृतास्मि ॥ ७७ ॥ आया स्यामिस्वयमितिपुरःप्रस्थितौयत्त्वयोक्तं । मन्येवाश्रुप्लुतमिव तदानाथनिःक्षिप्तमक्षि ॥ आस्थामत्रप्रणिहितवतीप्राणिनी प्राणबंधो । चिंताबंधोभवदथभवेःसत्यसंधोनवेति ॥ ७८ ॥ सेयंसीर्धीवकचकमलाकाननंफुल्लमेत । न्नीपश्चायंकुसुमन मितःश्रूयतेभृंगगीतं ॥ सत्वंसाहंसचरतिपतिःकिंवदामःपरंते ।

Digitized by Google

भावाभिन्नःसपदिविदधेसर्वमन्याद्दगेव ॥७९॥ योषिल्लक्षंरमय दमयद्वेषिणादुर्विनीता। न्सम्राडेधिमणयसुमुखोबंधुवृंदंपुराणं॥ क्लेशानेषावहतुबहुशःकांतकितेनवार्त्ता । कल्याणंतेभवतु ममतुश्रोतुमेवेदमायुः ॥ ८० ॥ यत्तन्मेस्तुत्वयितुचरितंयुक्ति वर्त्मव्यतीतं । संपश्यंतीकिमपिकिमपिप्राणबंधोबिभेमि ॥ दीनायाचेविधिमहमतस्त्वत्कृतेमंत्रयंते । यद्वर्गाद्याःकिमपि निपुणंतद्वचःसत्यमस्तु ॥ ८१ ॥ आगःकस्मिन्नहनिनकृतंति ष्ठतापित्वयेह । प्रस्थानेनप्रकटितमथोवीरवैरंवरीयः ॥ रूक्ष त्वंनोनजयितुमियानेवयत्नस्तवाभू । देतच्चेतस्त्वयितुनगु णादन्यदंगीकरोति ॥ ८२ ॥ तुभ्यंदातुंविषमुपनतापूतनाघा नियुक्तं । विश्वोन्माथिष्वपिसमुचितोनिग्रहःपूरुषेषु ॥ अ ब्रह्मायोषित्प्रकृतिकृपणानन्यवृत्तिश्चयाते । तत्रोन्माथेकिमप यशसःपातकाद्वान्यदस्ति ॥ ८३ ॥ संभोग्योभूर्दिनकतिपयं मादृशीनामथत्वं । माथुर्यश्चेद्दिनकतिपयंभुंजतेसह्यमेतत् ॥ अस्माभिर्योभवदनुभवःसोपिसर्वात्मनायन् । निःसंस्कारःस मजनिमनोदग्धमेतावतैव ॥ ८४ ॥ तुल्याकारंसमनुभवतोर त्रदुःखंसुखंच । क्रीडाकारीत्वमहमितिनोशब्दभेदोपिजातः ॥ सत्वंयोषित्कुलरतिगुरुःसाहमेवंवराकी । सार्किनाहंत्वम सिनसिर्किनाथर्किजातमेतत् ॥ ८५ ॥ धैर्यान्काचित्कतिचन सखीशिक्षयालज्जयान्ये । भीत्याकाचित्कतिचनरुषाका चिदालस्यतोपि ॥ स्वाधीनेपित्वयिरतिगुरौकेलिकुंजावलं ब । नस्वाभ्यायाःकतिकतिनिशामादृशामत्रनासन् ॥ ८७ ॥ दूरंदूरादपिचविषमंकंचिदेत्यप्रहारं । कुर्वन्नेकंपशुमिवजग

Digitized by Google

न्नाथकिंनावधीर्मा ॥ वाटीसीमप्रसरणपटुःश्रूयमाणैरजस्रं । किंदुःशीलप्रहरणशतैरंगमंगंलुनासि ॥ ८७ ॥ सोढव्यस्तेस कलमधुनासंभृतब्रह्मचर्या । राजर्षित्वंकलयसियदिस्वीयवं शानुरूपं ॥ लक्ष्मःश्रोणिःपुरयुवतिषुश्रूयमाणानवीना । किं कुर्यामःस्पृशतित्वदयंशासितासर्वमेव ॥ ८८ ॥ यांतिप्राणा नहिबहिरमीनुद्यमानाश्चगाढं । सन्यंगन्यंतरमपिनमेकिंचिद स्तिश्वसंन्याः ॥ मग्नंचेतःकुलिशकठिनेस्वव्यनुद्धार्यमेतत् । तेनैवाहंभवदनुगतिंसुस्थितांकिंकरोमि ॥ ८९ ॥ किंनोदंड प्रहररजनीपृक्षिणीपक्षरीत्या । स्फीतस्फीतांविरहविपदंसाह यन्मामहासीः ॥ दत्तोयस्यैनखलुनिमिषोदृष्टिविघ्नोपितस्यै । दूरस्थिन्यैवितरसिविभोयौगपद्याद्युगानि ॥ ९० ॥ स्वामिन्ने कंवचसिभवतःस्वांतविश्रांतमन्यत् । कर्मण्यन्यन्मुहुरिदम भिव्यक्तमंधोपिवेद ॥ भूयोभूयस्तदतिमुषितानामगृण्हामिकिं ते । तिष्ठत्यस्मिन्जगतियदिनोजीवनस्थानमन्यत् ॥ ९१ ॥ त्वत्सेवासुस्खलनमभवन्मादृशःकस्यकिंवा । सेवाधर्मोगहन इतियन्नीतिनिष्ठाःपठंति ॥ तेनत्यागःकिमघमुचितोवच्मिसं कोचहीना । पांथोयत्रत्वमसिरसिकैरीक्षितोनैषपंथाः ॥९२॥ पांडुक्षामंवपुरिदममीकुंतलाःक्लांतभासो । वासोप्येवंविधमि तिभिदाभिक्षुकीभिःकुतोनः ॥ एषाक्रोशाःकतिचमथुराया मिचेदद्यकिंत । नेत्रोद्वंधंनभवतिकृतिःश्रीमुखालोकनाय ॥ ९२ ॥ कुंजद्वाराद्बहिरपियदिप्राणनाथप्रयासि । प्राणैः स्थेयंक्षणमपितदानैवमेसत्यमेतत् ॥ भूयोभूयोविलुभितवती त्वामितिध्वस्तलज्जा । दूराद्दूरंकथमतिचिरादाननंदर्शयिष्ये

॥ ९४ ॥ त्वंचेदानींनगरतरुणीसार्थसर्वस्वभूत । स्ताअप्ये वंतवकिमितरास्तुभ्यमद्यस्वदंते ॥ अन्योत्सुक्यात्तदपिभव तःसंमुखीवायदिस्यां । किंस्यादेतन्नखलुनिपुणंभावयंभ्यप्य वैमि ॥ ९५ ॥ नस्यादस्यायदिममतनोःमन्यभिज्ञेयतावा । स्यादेवाथस्फुटमुभयथामामकीनोविडंबः ॥ आद्येमासिस्पृ शतिभवतोदृष्टिरौदास्यमुद्रा । मन्यत्रापिप्रणयलघुतातादव स्थ्यंव्यनक्ति ॥ ९६ ॥ सांमुख्यंतेभवतियदिमेतद्गृहेवाबहिर्वा । सौजन्येनस्मरसियदितत्साकथादुर्लभैव ॥ पूर्वावस्थास्मर णलघिमादुर्निवारःसभायां ॥ शुद्धांतेचेच्चतुरतरुणीसार्थसौ हार्दभंगः ॥ ९७ ॥ दूरादेवस्मिततरसुधासिच्यमानाधरौष्ठ । गंडोद्यंचत्पुलककमलाकारविस्फारदृष्टि ॥ एह्येहीतिस्वयमश वतःप्रेसयःप्रार्थनंया । लेभेतस्यामनतिशयनीमाननैवापमृ त्युः ॥ ९८ ॥ रूक्ष्मालोकाःकटुकवचसःस्वालयेसर्वएव । क्षीणासित्वंकथमितिबहिर्ग्राम्यवाचोदहंति ॥ ग्रामस्यांतेतप नतनयाकूलमुद्यानमूलं । शून्यंलीलाशरणमपितेकुत्रतन्निर्वृ णोमि ॥ ९९ ॥ वैमुख्यंतेकिमपिमदनोमाद्यतिक्रूरकर्मा । न र्मालापेष्वपिकुवचनैर्बाधतेबंधुवर्गः ॥ चेतोनाथत्वयिविनि हितंवाचमुल्लंघ्ययासा । मासामुक्तिःस्मितकलुषिताकल्पते किंकरोमि ॥ १०० ॥ कुंजेकुंजेरतिरुपहिताधिक्कृतंधामधौ तं । मर्मवेणोर्वचसिविहितोबंधुवाचांविसर्गः ॥ दृष्टःस्वामी कपिरिवकृतःप्राणसारोऽसिजारो । हीनोपायाकथमहममून द्यभूयोनियोक्ष्ये ॥ १०१ ॥ एतेनित्यंनवपरिमलोद्गारिणःसं तुकुंजाः । संतुक्लेशानचममतनोरत्रबीभन्सभावः ॥ एतद्दृष्ट्वा

रमयतिहरिर्गूढमागत्यराधा । मित्यद्यापित्रजयुवतयोमह्यमी
र्षावहंति ॥ १०२ ॥ राधेराधेकथयकथयत्वय्यसौनंदनोमे ।
बाल्यादेवप्रभृतिकुरुतेवत्सलोन्दत्मकाशं ॥ दृष्टव्योऽसौपुनरपि
मयामन्यतेकीदृशंवा । मानिन्यंबातवचरुदतीपृच्छतीदंदही
ति ॥ १०३ अत्रागच्छत्वरितमथवातिष्ठतात्राब्दलक्षं । शृण्वं
त्वेतेजनपदजनाप्युक्तकंठान्रवीमि ॥ यामिस्वर्गेनिरयमथवा
प्राणिमीहम्प्रियेवा । श्यामादन्योनहिनहिनहिप्राणनाथोम
मास्ते ॥ १०४ ॥ राधाबंधुर्लिखितपठितोविश्वतोयत्त्वमासीः।
साहंसाहंकृतिरुदभवंयत्तवातिप्रियेति ॥ लक्ष्मीकांतमणयमु
धयार्सिचवामांनवान्वं । एतज्ज्ञातंननुममजनुर्धन्यमेतावतैव॥
॥ १०५ ॥ यांतिप्राणाममयदिनतेपृच्छनीयःपुरोधा । देयाम
ह्यंकिसलयरुचापाणिनैवत्वयापः ॥ याचेतत्रव्यवधिकृतिनः
क्षालनंक्षारनीरैः। कर्त्तव्यंतेमधुपुरवधूपादलाक्षारसस्य॥१०६॥
सीदत्यंगंदलतिन्दयंकिंनुकुर्वेतिहंत । प्राणाश्यामाशयममव
धाभद्रभागीत्वमेव ॥ हाधिक्कीदृग्वदसिरसनेतत्वतोयत्तदा
स्तां । वंदीभूयस्वयमिहमयामोचितःप्राणनाथः ॥ १०७ ॥
श्यामश्यामस्मरसहचरीमंदकारीकृतंमे । केनाकस्माद्भ्रमति
भुवनंमज्जतिद्यौरवन्यां ॥ क्काहंक्काहंक्वममदयितःकुत्रतस्यैष
दासो । हाहाहाहाहरिहरिहरिक्षीणमभ्यप्रसीद ॥ १०८ ॥
इत्युद्गाद्गुर्विमलपुलकाकंपनासन्नकंठी । छिन्नामूलेपततिभु
विसाहेमवल्लीवयावत् ॥ शृंगारैस्तैःशिशिरसलिलैस्तावदेवोद्ध
वोऽस्याः। सिंचन्नास्यंतदुपरिविभोरुत्तरीयंदुधाव ॥ १०९ ॥
चक्रेचैतन्मनसिचतुराश्चेटकाश्चक्रपाणे । लक्षंयत्स्यात्तदपि

यदसौमामिहैकमयुंक्त ॥ एतत्संभावनसमुचितंसाध्वभून्नैपुणं मे । यद्रक्षायामहमधिकृतोनाशितेयंमयैव ॥ ११० ॥ सम्य ग्जातंशुचिरविरहज्वालयादूयमाना । सेयंसाध्वीविशतिपर मानंदधामन्यनंते ॥ मंत्रोवैज्ञानिकइतिवृथामानमासाद्यमाद्य । न्यस्वीयांमतिपरिणतिंबुद्धवानुद्धवोपि ॥ १११ ॥ शृण्व न्नेतन्मधुपुरपतिर्मेस्यतेकीदृशंमां । किंवाभावीकथमिवमयाद श्यतामास्यमस्मै ॥ ध्यायन्नेतत्पुलकमुकुलारंभिसस्पंदतारं । पश्यन्नस्यामुखमकथयन्माणितिमांणितीति ॥ ११२ ॥ नष्टंप्रा मंनिधिमिवमुखंवीक्षमाणोऽयमस्या । भूयःसिंचन्मधुपुरपते रुत्तरीयानिलेन ॥ उच्चैराहश्रुतिपरिसरेकिंकरंकंसशत्रो । दूं तंराधेव्यविनिहितंविद्धिमामुद्धवोस्मि ॥ ११३ ॥ साति स्वादुर्दवथुदमनीतुल्यपीयूषवाणी । वर्णश्रेणिःश्रवणपुटकेनां तरस्याविशंती ॥ कोजानीतेकिमकृतपरंसम्वरंसापितन्वी । किंकिंकिंकिंकथयकथयेत्युन्थिताकौतुकेन ॥ ११४ ॥ आ दावस्यैमलयजजलैर्मर्मरीभूतमंत । म्लानाभोगंनयनपयसः मोचनात्सांजनस्य ॥ किंचश्रोतंबहुभिरभितःशुष्कशैवालखं डैः । सारंशौरेरखिलमपितद्वर्णयामासभूयः ॥ ११५ ॥ पश्चा दूचेपुनरयमिदंचेलवल्लीधुनान । स्तस्मादस्याःशपथशतकैः सन्निवृत्तःकथंस्वित् ॥ लक्ष्मीर्यस्मान्निवसतिबहिस्म्वंतदंत र्निमग्ना । मन्योरन्योभवतुविषयःसाकिमेवंविधासि ॥११६॥ धारावाहिष्यसनकथनाहूतवन्याःप्रियायाः । सूक्तासक्तिष्य वधिभयतोयन्नमध्येमयोक्तं ॥ मौढ्यादेवंममकिमुमहानेवन स्यादनर्थ । स्तस्यायंचेद्वसनपवनःपावनोनाभविष्यत् ॥

॥ ११७ ॥ यस्तेमनोमनसिहृदयेयस्यचत्वंविलीना । मन्यं तेयच्चरणशरणाभूतिमैंद्रींतृणाय ॥ यस्यालाभात्पुरयुवतयो नालशैवालशय्याः । सूर्यागर्यज्वलितवपुषोयामिनीर्यापयंति ॥ ११८ ॥ यस्याद्यत्वद्विरहदहनज्वालयापांडुभासो । वासोनीलंगमयतिभिदामंबनीलांबरेण ॥ दासोरासोत्सवनट गुरोरास्यसोहंसमोहं । सत्वामावेदयतियदिदंमन्मुखेनप्रती हि ॥ ११९ ॥ दैवादद्यप्रतिपदमितोविश्वतोबंधुपाशै । र्देहेनैवद्विजपदमनुप्रापितःसंयतोस्मि ॥ यस्मिन्बालेतपनतनयाकूलकुंजांतराले । चित्तेनत्वंविरमतिनमेर्किंतुकेलीविनोदः ॥ ॥ १२० ॥ साक्षादीक्षानभवतुचिरंचिंततातेनमाभू । र्दैवाधीनोगमयतिजनःकोपिकुत्रापिकालं ॥ बंधीभूतंमयितवमनस्त्वय्यपीदंममेति । द्वाभ्यामाभ्यांमिलनमचिरादावयोःसाधनीयं ॥ १२१ ॥ राधेराधेक्कचलसिमनाक्तिष्टकल्याणिकुंजे । प्रातर्जातंनहिनहिनिशासावशेषाधुनापि ॥ इत्यावेशप्रलपितशतंमद्भतंदेविदिग्भ्यः । संप्राप्तास्तेकथयितुममीसाक्षिणः संतिसभ्याः ॥ १२२ ॥ रुद्धाबंधुप्रणयपदवीलंघितालोकलज्जा । मूर्ध्निन्यस्तंपदमयशसःशंकितोनापमृत्युः ॥ मामाराद्धुंकिमिवनकृतंदुष्करंत्वादृशीभि । स्त्यक्तायुष्माम्मम यदुपतेरद्यराज्यंधिगस्तु ॥ १२३ ॥ रम्याहर्म्यावलिरियममी बंधवःसानुबंधाः । निर्वैरंयंजयतिनगरीगुंफितानागरीभिः ॥ एषासंपत्किमिहनसुखंर्कितुकांतारकुक्षौ । युष्माभिर्यःसमजनिसमेदुर्लभोत्कंठितोदः ॥ १२४ ॥ नोपष्टंभोगुणवतितवस्यादयंचेत्तदानीं । नाहंनासावतिनवघनश्यामलोदेहबंधः ॥ दुः

खंकापिकचिदपिसुखंयच्छसिकापिमोहं । सर्वत्रैवंस्फुरतिम
मतुत्वन्मयीसृष्टिरेव ॥ १२५ ॥ कुब्जामृज्वीमकरवमुरीकृत्य
यन्निर्घृणत्वं । तत्तात्पर्यैविपुलमतयोनापयंतिक्षतिःका ॥ हि
त्वावेशंकुवलयदृशांकेशमक्षिभ्रुवंवा । क्षंतव्यामेनहिकुटिल
तेत्येतदुन्नायकंतत् ॥ १२६ ॥ विद्युल्लोलंवपुरिदमितोयौवना
देःकथाका । दृश्यंमिथ्यासकलमितिमद्दासदासोपिवेद ॥ किं
तेवक्ष्येस्वयममुमहंनैववक्तुंसमर्थो । यद्गोपीतत्प्रणयमदिराम
त्तमात्मानमेव ॥ १२७ ॥ उद्यद्गोत्रस्खलनमनिशंगोपितेगोप
यिष्य । न्राधानाम्नीमकरवमहंसारिकामंतिकस्थां ॥ नीता
राधेममपुरलिकेन्येवमादीन्यकांडे।वक्तुंसभ्यस्मितजनयितुस्त
न्मयासीद्यथैव ॥ १२८ ॥ अस्रंप्रस्वापनमपिमयालब्धमुन्नि
द्रकेण ।यस्मिन्नेतन्निहितमथतेस्वमसंदर्शनाय॥जाग्रद्भावेभव
तिभवतीभावनीयैवधिक्मे । तेनाशेषस्फुरणशमनीहंतजाता
सुषुप्तिः ॥ १२९ ॥ यानेप्राणेश्वरिममयथानिर्विवादंतथाते ।
संतमायायुगपदभयंयद्यतन्वोरजन्यः॥ यास्यंन्येतादिनकति
पयैरंगपल्यंकभाजोः । सन्यंसन्यंनिमिषनिभृतामावयोःसु
स्थितास्था ॥१३०॥ ह्लातिग्रामोहसतिनिभृतंबंधुवर्गोरुणद्धि ।
क्रीडामंतर्दधतिगुरवोनीरवोभृत्यलोकः ॥ चित्रीयंतेकिमपिसु
जनादुर्जनाःकुत्सयंते । श्लाघंतेमांसदसिरसिकाःसादरंत्व
त्कथासु ॥ १३१ ॥ इत्यादिष्टंभुवनगुरुणागौरवेणक्रियाणा ।
मत्रागंतुंकिमवशयिनाभोक्तुमप्यक्षमेण ॥ तामौत्सुक्यादिति
सकथयन्नात्मनःपादमूले । निम्नासीनःसुरभिशिशिरंनिर्झरं
किंचिदाप ॥ १३२ ॥ पश्यन्नेतत्किमपिकथयन्नश्रुधारामुदा

रां । मंदाकिन्याइवतनुभृतःसुभुवःसुस्थितायाः ॥ हाहाजातं किमितिचकितःसत्वरंमोच्यपादौ । भक्तिश्रद्धासपुलकमुपादायमूर्ध्नाववंदे ॥ १३३ ॥ बुध्वाबद्धांजलिपुटमिमांकिंचिदाख्यातुकामा । मित्याचख्यौविरमतुपरंनिष्फलोदेविखेदः ॥ एतद्वासोनयवतिहरेःश्रीमदंगाधिरूढं । चेतोमूढंनकुरुकरुणासागरेसंगतासि ॥ १३४ ॥ भास्वानश्वानयमतिकृतीखेलयन्नंबरांत । धर्मस्थित्यैभ्रमतिभुवनेतामसोन्मूलनाय ॥ मादक्षिण्याइझटितिविनतानंदनाधीनयानो । रागींचितांनकुरुकुरुतेपद्मिनीनांप्रबोधं ॥ १३५ ॥ गोपीमात्रंघृणलिपिनयान्माधवप्रेमपात्रं । मत्वायत्त्वामनतिशयिनीदृष्टिरग्रेममासीत् ॥ क्षंतव्यंतद्विधिविधिसुतव्योमकेशाब्धिपुत्री । मृग्यःपाशेपशुरिवतवप्रेम्णिबद्धोयदस्ति ॥ १३६ ॥ मातर्मातर्जयजयजगन्मोहनंमोहयंत्याः । कस्तेतत्त्वंकलयतुनयद्वेदगर्भोपिवेद ॥ मंतव्योसौपरिजनतयावल्लुभस्येतितस्यै । वारंवारंतदनुदधिरेतेनदंडप्रणामाः ॥ १३७ ॥ सर्वांगीनंपुलकमुदभूदश्रुमग्रेचदृष्टी । कंठोभग्नस्वरइववचःपर्यवस्थानशून्यं ॥ तस्यास्तस्याप्यजनियुगपद्यानकालेतदानीं । मुग्धामूर्द्धन्यभवदुभयोरद्भुतापुष्पवृष्टिः ॥ १३८ ॥ आमंत्र्यैकस्तदनुसकलंघोषमुत्कंठमानः । सद्योराधारमणचरणप्रेक्षणायप्रतस्थे ॥ मंत्रांचितामणिमिवपरांचितयंतीचिराय । प्रेयःसूक्तंवनभुविघनानंदमग्नावतस्थे ॥ १३९ ॥ नानारामप्रणयिषुमनःसंगसौभाग्यभाजा। जाड्यापायेसुरभिसमयस्थायिनामाधवेन ॥ राधाबंधोरुपदृतमितिप्रेममाध्वीकमेत । न्निर्विघ्नेनश्रवणपुटकैःपुण्यवंतः

Digitized by Google

पिबंतु ॥ १४० ॥ विचारपारदृश्वानःकृतंकृशधियामया ॥
करुणार्द्राःकरिष्यंतिशुद्धमुद्धवदूतकं ॥ १४१ ॥ ॥
॥ इतितालितनगरनिवासिश्रीमाधवकवींद्रभट्टाचार्यविरचितं
उद्धवदूतंखंडकाव्यंसंपूर्णम् ॥ १४ ॥

रामकृष्णविलोमकाव्यं

। तंभूसुतामुक्तिमुदारहासं ।
॥ वंदेयतोभव्यभवंदयाश्रीः ॥
। श्रीयादवंभव्यभतोयदेवं ।
॥ १ ॥ संहारदामुक्तिमुतासुभूतं ॥ १ ॥
। चिरंविरंचिर्नचिरंविरंचिः ।
॥ साकारतासन्यसनारकासा ॥
। साकारतासन्यसतारकासा ।
॥ २ ॥ चिरंविरंचिर्नचिरंविरंचिः ॥ २ ॥
। तामसीन्यसतिसन्यसीमता।
॥ माययाक्षमससमक्षयायमा ॥
। माययाक्षमससमक्षयायमा ।
॥ ३ ॥ तामसीन्यसतिसन्यसीमता ॥ ३ ॥
। कातापघ्नीतारकाद्याविपापा ।
॥ त्रेधाविद्यानोष्णकृन्यंनिवासे ॥
। सेवानिन्यंकृष्णनोद्याविधात्रे ।
॥ ४ ॥ पापाविद्याकारताघ्नीपताका ॥४॥

Digitized by Google

। श्रीरामतोमथ्यमतोदियेन ।
॥ धीरोऽनिशंवश्यवतीवराद्धा ॥
। द्वारावतीवश्यवशंनिरोधी ।
॥ ५ ॥ नयेदितोमथ्यमतोऽमराश्रीः ॥ ५ ॥
। कौशिकेत्रितपसिक्षरन्नती ।
॥ योऽदशद्भितनयस्वमातुरं ॥
। रंतुमास्वयनतद्विदादयो ।
॥ ६ ॥ तीव्ररक्षसिपतत्रिकेशिकौ ॥ ६ ॥
। लंबाधरोरुत्रमलंबनासे ।
॥ त्वंयाहियाहिक्षरमागताङ्गा ॥
। ङ्गातागमारक्षहियाहियान्वं ।
॥ ७ ॥ सेनाबलंयत्ररुरोधबालं ॥ ७ ॥
। लंकायनानित्यगमाधवाशा ।
॥ साकंतयानुन्नयमानुकारा ॥
। राकानुमायन्ननुयातकंसा ।
॥ ८ ॥ शावाधमागत्यनिनायकालं ॥ ८ ॥
॥ गाधिजाध्वरवैराये । तेऽतीतारक्षसामताः ॥
॥ ९ ॥तामसाक्षरतातीते । येरावैरध्वजाधिगाः ॥ ९ ॥
॥ तावदेवदयादेवे । यागेयावदवासना ॥
॥ १० ॥नासवादवयागेया । वेदेयादवदेवता ॥ १० ॥
। सभास्वयेभग्नमनेनचापं ।
॥ कीनाशतानद्धरुषाशिलाशैः ॥
। शैलाशिषारुद्धनताशनाकी ।

Digitized by Google

॥ ११ ॥ पंचाननेमग्रभयेस्वभासः ॥ ११ ॥
। नवेदयामक्षरभामसीतां ।
॥ कातारकाविष्णुजितेविवादे ॥
। देवावितेजिष्णुविकारताका ।
॥ १२ ॥ तांसीमभारक्षमयादवेन ॥ १२ ॥
॥ तीव्रगोरन्वयत्रार्यो । वैदेहीमनसोमतः ॥
॥ १३ ॥ तमसोनमहीदेवै । र्यो त्रायन्वरगोव्रती ॥ १३ ॥
॥ वेदयापद्मसदनं । साधारावततारसा ॥
॥ १४ ॥ सारतातवराधासा । नंदसद्मपयादवे ॥ १४ ॥
॥ शैवतोहननेऽरोधी । योदेवेषुनृपोत्सवः ॥
॥ १५ ॥ वत्सपोनृषुवेदेयो । धीरोनेनहृतोवशैः ॥ १५ ॥
। नगोपगोसिक्षरमेपिनाके ।
॥ नापोजनेधर्मधनेनदानं ॥
। नंदाननेधर्मधनेजपोना ।
॥ १६ ॥ केनापिमेरक्षसिगोपगोनः ॥ १६ ॥
। तातानदामग्रमदापदाय ।
॥ नेमेरुचामस्वनसुंदराक्षी ॥
। क्षीरादसुंनस्वमचारुमेने ।
॥ १७ ॥ यदापदामग्रमदानतातः ॥ १७ ॥
॥ तामितोमत्तसूत्रामा । शापादेषविगानतां ॥
॥१८॥ तांनगाविषदेपाशा । मात्रासूत्तमतोमिता ॥ १८ ॥
। नासावधापत्रपाङ्गाविनोदी ।
॥ धीरोनुन्यासस्मितोऽद्याविगीत्या ॥

Digitized by Google

। त्यागीविद्यातोस्मिसत्यानुरोधी ।
॥ १९ ॥ दीनोविज्ञापात्रपधावसाना ॥ १९ ॥
। संभावितंभिक्षुरगादगारं ।
॥ याताधिरापस्वनघाजवंशः ॥
। शवंजघानस्वपराधितायां ।
॥ २० ॥ रंगादगारक्षुभितंविभासं ॥ २० ॥
। तपातितारःस्वनयागतंमा ।
॥ लोकापवादद्वितयंपिनाके ॥
। केनापियंतद्विदवापकालो ।
॥ २१ ॥ मातंगयानस्वरतातिपातः ॥ २१ ॥
। शवेऽविदाचित्रकुरंगमाला ।
॥ पंचावटीनर्मनरोचतेवा ॥
। वातेचरोनर्मनटीवचापं ।
॥ २२ ॥ लामागरंकुत्रचिदाविवेश ॥ २२ ॥
। नेहवाक्षिपसिपक्षिकंधरा ।
॥ मालिनीस्वमतमत्तदूयते ॥
। तेयदूत्तमतमस्वनीलिमा ।
॥ २३ ॥ राधकंक्षिपसिपक्षिवाहने ॥ ३३ ॥
। वनांतयानस्वणुवेदनासु ।
॥ योषामृतेररापगजाविरोधी ॥
। धीरोविजागपरारतेमृषायो ।
॥ २४ ॥ सुनादवेणुस्वनयातनावः ॥२४ ॥
॥ किन्नुतोयरसापंपा । नसेवानियतंनवैः॥

॥ २५ ॥ वैनतेयनिवासेन । पापंसारयतोनुर्कि ॥ २५ ॥
॥ सनतातपहातेने । स्वंशेनाविहितागसं ॥
॥ २६ ॥ संगताहिविनाशेस्वं । नेतेहापततानसः ॥ २६ ॥
कपितालविभागेन । योषादोनुनयेनसः ॥
॥२७॥ सनयेमनुदोषायो । नगेभाविलतापिकः ॥ २७ ॥
। तेसभामकपिवर्णमालिका ।
॥ नाल्पकप्रसरमभ्रकल्पिता ॥
। ताल्पिकभ्रमरसप्रकल्पना ।
॥ २८ ॥ कालिमार्णवपिकप्रभासते ॥ २८ ॥
। रावणोऽक्षिपतनम्रपानते ।
॥ नाल्पकभ्रमणमक्रमातुरं ॥
। रंतुमाक्रमणमभ्रकल्पना ।
॥ २९ ॥ तेनपात्रनतपक्षिणोवराः ॥ २९ ॥
॥ दैवेयोगेसेवादानं । शंकानापेलंकायाने ॥
॥३०॥ नेयाकालंपेनाकाशं । नंदावासेगेयोवेदैः ॥ ३० ॥
। शंकावज्ञानुत्वनुज्ञावकाशं ।
॥ यानेननद्यामुद्याननेयाः ॥
। यानेनद्यामुद्याननेयाः ॥
॥ ३१ ॥ शंकावज्ञानुत्वनुज्ञावकाशं ॥ ३१ ॥
॥ वादिदेशद्विसीतापं । पंपाथोयनसेतवे ॥
॥ ३२ ॥ वेतसेनयथोपापं । पंतासीद्विशदेदिवा ॥ ३२ ॥
वायुजोनुमतोमेने । संग्रामेरवितोऽन्हिवः ॥
॥३३॥ वन्हितोविरमेग्रासं । नेमेऽतोऽमनुजोयुवा ॥ ३३ ॥

Digitized by Google

। क्षतायमायत्ररघोरितायु ।
॥ रंकानुगानल्पवयोयनानि ॥
। निनाययोवल्पनगानुकारं ।
॥ ३४ ॥ युतारिघोरत्रयमायताक्षः ॥ ३४ ॥
॥ तारकेरिपुरापश्री । रुचादासमुताञ्चितः ॥
॥ ३५ ॥ तन्वितासुसदाचारु । श्रीपरापुरिकेरता ॥ ३५ ॥
॥ लंकारंकागाराध्यासं । यानेमेयाकाराध्यासे ॥
॥३६॥ सेव्याराकायामेनेया । संध्यारागाकारंकालं ॥३६॥
गोदावरीब्रह्मगिरेःसकाशात् । संप्रापिताप्रागुदधिंप्रयत्नात्॥
येनर्षिणासोपिपुनःप्रतीम । मानेतुमर्द्रिंप्रभवेत्किमेतां॥३७॥
एवंविलोमाक्षरकाव्यकर्तुं । भूयःसभायांसमवेक्ष्यतज्ज्ञाः ॥
जानंत्विमांचित्रकविंत्वसीमां। दैवज्ञसूर्याभिधसंप्रदिष्टां॥३८॥
॥ इतिश्रीदैवज्ञपंडितसूर्यकविविरचितंविलोमाक्षर ॥
रामकृष्णकाव्यंसमाप्तं ॥ १५ ॥

वृंदावनयमकं.

वरदायनमोहरये । पततिजनोयंस्मरन्नपिनमोहरये॥
बहुशश्चक्रंदहता । मनसिदितिर्यैनदैत्यचक्रंदहता ॥ १ ॥ स्व
मिवभुजंगविशेषं । व्युपधायस्वपितियोभुजंगविशेषं ॥ नवपु
ष्करसमकरया । श्रियोमिपंक्त्यायाचसेवितःसमकरया ॥ २ ॥
येनचबलिरसुरोधः । समवस्थापितःक्षितेरसुरोधः ॥ पृथुकः
सन्निभवदनः । चिक्षेपचयःसरोजसन्निभवदनः ॥ ३ ॥

Digitized by Google

विशेषकं ॥ स्तौमिचलांगलवंतं । देवंयःसंयुगेचलांगलवंतं ॥ कपिमकरोदसुरहितं । द्विविदंदृढमुष्टिताडनादसुरहितं ॥ ४ ॥ आपानपरंपरया । भेजेयंरेवतीजितपरंपरया ॥ बिभ्रतमाला नाभौ । बाहूमम्रकुसुमाश्वमालानाभौ ॥ ५ ॥ योरूढमदारु णया । तन्वामणतंप्रतिद्विषमदारुणया ॥ कर्षितदानवकुल या । विबभौगंधविजितेभदानवकुलया ॥ ६ ॥ गृहपतिरिव हिमहीनः । कांत्याभूदुधसेनइतिहिमहीनः ॥ प्रकृतिभिररि हेतीह । स्वयंवृत्तःसंहताभिररिहेतीहः ॥ ७ ॥ बलभिदरी भागानां । जेतार्विंध्यर्क्षबदरीभागानां ॥ शौक्ल्यादाशार्ह स्य । प्रभवोयशसःसमश्नदाशार्हस्य ॥ ८ ॥ योभोक्तेवसुधा याः । वर्णकविःशशिताचवसुधायाः ॥ यस्यपरामुदधीनांतटे षुदर्त्तिप्रचक्षतेमुदधीनां ॥ ९ ॥ भरतइवविभावसवः । सर्वेषां प्राणिनामथविभावसवः ॥ यस्मिन्वसुधामवति । स्थिराबभू वुःसमाश्चवसुधामवति ॥ १० ॥ अनुकुन्यरघोराज्ञः । प्रत्या रव्याताशनःप्रभुरघोराज्ञः ॥ योगिभिरित्यस्तमितः । केशव मामोमिनाथमस्तमितः ॥ ११ ॥ तस्येयमकार्यैर्भ्यश्चुतेनतन नरचितयमकार्यैर्भ्यः ॥ दत्तावाक्स्वाकृतिना । मानांकेनह येरिसंश्रयास्वाकृतिना ॥ १२ ॥ अथजग्मतुरुरुमत्तौ । वय सावृंदावनांतरंरुरुमत्तौ ॥ हरिराहितकुमुदसितः । स्निग्धत रांगस्तथाहलीकुमुदसितः ॥ १३ ॥ उदधिपयोनिर्घोषं । तत्र निवेश्याच्युतोऽपयोनिर्घोषं ॥ अविचितितकंसवल । श्चचा रभेजेचयामुनकंसवलः ॥ १४ ॥ प्रियसुत्दामोदरयो । ललि तोरथरौहिणेयदामोदरयोः ॥ कृतपशुवृंदावनयो । र्धर्मःक्षय

Digitized by Google

मापदयितवृंदावनयोः ॥ १५ ॥ क्षोभमगादभ्राणां । स्तनितै
र्विद्युत्त्वतामगादभ्राणां ॥ मुनिरपिनीरागमनाः । सरितश्चा
संभवृत्तनीरागमनाः ॥ १६ ॥ रुद्रंकंदर्पस्य । मथमोहेतुर्बभू
वकंदर्पस्य ॥ स्त्रीत्वदयान्यभिदनतः । सशरैःप्राप्यसुन्दरोघ
नानभिदनतः ॥ १७ ॥ विद्युद्गौरीहावा । नकृतेवघने
ष्वभूच्चगौरीहावान् ॥ सुलभबलाकायेषु । ग्लपितचिरमोषि
तबलाकायेषु ॥ १८ ॥ जात्यासज्जालकया । यूथिकयाचा
मयुवतिसज्जालकया । कमलानिससर्जाभ्यां । भ्रमरःकृष्णो
बलादिवससर्जाभ्यां ॥ १९ ॥ व्याप्यदिशोदशनिभृतः । क्ष
णमपितस्थौशासनादशनिभृतः ॥ संसमितागवलस्य । भ्व
नत्घनौघसमभोगवलस्य ॥ २० ॥ भ्रमरदृशकदंबरजः ।
त्वमितीववदन्स्वनादृशकदंबरजः ॥ हंतुंविभ्रमरहितां । न
लिनीपथिकांगनांचविभ्रमरहितां ॥ २१ ॥ ज्योत्स्नालंघन
मलिना । नबभौक्रियतेस्मकुटजलंघनमलिना ॥ बलवानव
पूरोहन् । न्दद्यासनदीतटांश्चनवपूरोऽहन् ॥ २२ ॥ शिखि
षुसमुत्सुकमनसो । गतिहरमुंचतिचखेसमुत्सुकमनसः ॥ व्य
मुंचन्पवनजवना । वापीर्हंसाश्चनपवनजवनाः ॥ २३ ॥
शब्दोनादेयानां । कलुषतयानोशशामनादेयानां ॥ फेनोवा
नीराणां । आरुष्टोभयतटांतवानीराणां ॥ २४ ॥ प्राप्यसख
द्योतायां । निशिविद्युज्जितमरुत्सखद्योतायां ॥ प्रियतमसदनं
गेहा । दबलाभयमुत्ससर्जसदनंगेहा ॥ २५ ॥ पर्वतकटके
शानां । नीपरजःकपिलकुंभकटकेशानां ॥ कुंजनदीनगजा
नां । हर्षोजज्ञेमहान्नदीनगजानां ॥ २६ ॥ विविधोपलरा

शिखरं । पिदधेगोवर्द्धनंतृणैराशिखरं ॥ कालोऽगंधारावान्। अकरोत्कुजटशिखिनांचगंधारावान् ॥ २७ ॥ कणिकाभिर पांशुखरा । वृंदावनमारुतावचुरपांशुखरा ॥ यमुनानवमुदक पटं । भेजेव्रजलोकमाश्रितामुदकपटं ॥ २८ ॥ अतपनवसुदेव सुतौ । व्रजस्यसाश्रेततोऽन्हिवसुदेवसुतौ ॥ अमृतसमधुनी पवनं । वृंदावनमविशतांसमधुनीपवनं ॥ २९ ॥ शिखिसर्व स्वधरस्य । द्वेप्रियतांजग्मतुर्हरेःस्वधरस्य ॥ भ्रमरकदंबकर वहा । वेणुःमावृट्तथाकदंबकरवहा ॥ ३० ॥ अंशादामोद स्य । स्थानमवभ्रंशिनीपदामोदस्य ॥ श्रीर्ललितमथोव्रजतः। कापिबभूवास्यमुष्टिकमथोव्रजतः ॥ ३१ ॥ धृतकामधुरैर्मधु रै । भ्रमरेभ्योमुदितवल्लवकुलैर्बकुलैः ॥ क्षतकेशिशिराःशि शिराः । स्थलीर्युताःप्रायशोऽस्तसुरभीःसुरभीः ॥ ३२ ॥ ता वृषभरणाभरणा । स्तेनयुताःस्वयमिवांजनभसानभसा ॥ रे जुःसुतरांसुतरां । यमुनामभितःसवंजुललतालता ॥ ३३ ॥ श्रेष्ठपदारोहिण्याः । सुतोप्यलंघ्यमहिमापदारोहिण्याः ॥ मा प्यशरीरंतुंगां । द्युतिचसद्दवागतःशरीरंतुंगां ॥ ३४ ॥ निचु लवतींककुभानां ! समोमतिक्षांतिकांतिभिःककुभानां ॥ अं शेनस्वनवद्यां । अजंवहन्लपिवदलिकुलंस्वनवद्यां ॥ ३५ ॥ दृष्ट्योद्भवलासितया । लिंपन्निवदिङ्मुखानिधवलासितया ॥ बहुधापवनेच्छायां । मावृषिमेघानुयातपवनेच्छायां ॥ ३६॥ अथसवलक्षोभानां । पतिरिवकर्त्तारमरिवलक्षोभानां ॥ मु सलीदंतुरगहनं । वीक्ष्यगिरिंमाहकुटजदंतुरगहनं ॥ ३७ ॥ विदधच्छन्नः छन्नः । कुटजैःक्षरतिमगीतगोपोगोपः ॥ मश्व

नदश्रोदभ्रः । सृष्टिविशेषोयमतुलधातुर्धातुः ॥ ३८॥ पश्यश्या
माश्यामा । वनस्थलीभातिबलवद्दृश्यादृश्या ॥ प्रदराधारा
धारा । धुन्वंतिमेघाश्वशिरसिहंतेहंते ॥ ३९ ॥ अस्मसुकंदल
दशनै । रुद्धमतिदरीमुखैश्चकंदलदशनैः ॥ दीयतोच्युतहेमम
यः । तवचरवींदोरिवाचलेोहेममयः ॥ ४० ॥ शकुनिपता
काशबलं । घनवृंदचक्षुषापताकाशबलं ॥ रूपंहारीतानां ।
श्रियंवनानांचमत्तहारीतानां ॥ ४१ ॥ पूर्वस्महरेशेषे । या
न्मेघान्वीक्ष्यभूश्रमहरेशेषे ॥ जनितरतिरसावसितै । रादा
यतडिद्गुणार्णवरसावसितैः ॥ ४२ ॥ कार्मुकवलयमनूनं ।
दिशसियत्तोषितोसिवलयमनूनं ॥ इत्याशामुखरतया । घन
राज्याहरिरिवोच्यतेमुखरतया ॥ ४३ ॥ नतवोपरिबर्हेण ।
ग्रथिताभरणस्यगोपपरिबर्हेण ॥ छायामसितापघनः । सुर
चापांकःपरैरकसितापघनः ॥ ४४ ॥ हतगिरिधातुरसंगा ।
रुध्वातवभुजसमोर्मिधातुरसंगा ॥ कुलानिखनद्यमुना । वह
तिजलमसौविसर्पतिखनद्यमुना ॥ ४५ ॥ पवनैरजसाध्वस्तं ।
बिभ्राणांनीयमान्मरजसाध्वस्तं ॥ पश्यैकांततरलतां । स्थली
मितांबर्हियोगकांततरलतां ॥ ४६ ॥ वसनेसंस्तवननवा ।
जेतुमलममोघसंस्तवननवा ॥ मधुकरविश्वसितानि । स्मित
मिहकुटजानिजनितविश्वसितानि ॥ ४७ ॥ मारुतवेगाद्रुणव
न्नवशिखंडानां । शुक्लापांगविडंबितनवशिखंडानां ॥ सं
घाःशिखिनांश्यामाःशंकेकायंते । स्थलघनमितिमन्वानाःशं
केकायंते ॥ ४८ ॥ पश्यशिलाःशैलेस्मिन्नुच्चावचसानौ । यां
त्युन्मुखबर्हिणतामुच्चावचसानौ ॥ अमुनाशमितरिपुस्त्रीशृंगा

Digitized by Google

रोहित्वं । याचितइवांबुनादैःशृंगारोहित्वं ॥ ४९ ॥ नदतिज लदैर्निदाघेसारंगोपास्ते । बिभ्रतिकेतकमवनेःसारंगोपास्ते ॥ संभत्युद्यमकालोनवाहिनीपानां । त्वन्मुखसुरभीनांचश्रीर्न वाहिनीपानां ॥ ५० ॥ इत्याहपीतवाससमायतनेत्रस्तं । कं सासुरान्पशुमतामायतनेत्रस्तं ॥ हसितानांविमलतयासहली लाजानां । छायांविकिरंदशनैःसहलीलाजानां ॥ ५१ ॥

॥ इतिश्रीमानांककृतंवृंदावनयमक ॥

॥ काव्यं समाप्तं ॥ १६ ॥

पूर्वचातकाष्टकं

वातैर्विधूनयविभाषयभीमनादैः । संचूर्णयत्वमथवाक रकाभिघातैः ॥ त्वद्वारिबिंदुपरिपालितजीवितस्य । नान्या गतिर्भवतिवारिदचातकस्य ॥ १ ॥ चातकस्त्रिचतुरान्पयःक णान् । याचतेजलधरंपिपासितः ॥ सोपिपूरयतिभूयसांभ सा । चित्रमत्रमहतामुदारता ॥ २ ॥ शक्यतेयेनकेनापि । जीवनेनैवजीवितुं ॥ किंतुकौलव्रतोद्भंग । प्रसंगःपरदुःस हः ॥ ३ ॥ गर्जसिमेघनयच्छसितोयं । चातकपक्षीव्याकु लितोहं ॥ दैवादिहयदिदक्षिणवातः । क्वत्वंक्काहंक्वचजलपा तः ॥ ४ ॥ वापीस्वल्पजलाशयोविषमयोनीचापगाहोन्हदः । क्षुद्रान्क्षुद्रतरोमहाजलनिधिर्गंडूषमेकंमुनेः ॥ गंगाद्याःसरितः पयोनिधिगताःसंत्यज्यतत्सादिमान् । सन्मानीखलुचातको जलमुचामुच्चैःपयोवांछति ॥ ५ ॥ बीजैरंकुरितंनदीभिरुदितं

वल्मीभिरुज्जृंभितं । वृक्षैःपल्लवितंजनैश्चमुदितंधाराधरेवर्ष
ति । आतश्चातकपातकंकिमपितेसम्यङ्नजानीमहे । यत्ते
स्मिन्नपतंतिचंचुपुटकेद्वित्राःपयोबिंदवः ॥ ६ ॥ नदेभ्योपिन्ह
देभ्योपिपिबंत्यन्येऽवयःपयः ॥ चातकस्यतुजीमूत । भवाने
वावलंबनं ॥ ७ ॥ नभसिनिरवलंबेसीदतादीर्घकालं । त्वद
भिमुखनिविष्टोत्तानचंचूपुटेन ॥ जलधरजलधारादूरतस्तावदास्तां । ध्वनिरपिमधुरस्तेनश्रुतश्चातकेन ॥ ८ ॥ ॥
॥ इतिपूर्वचातकाष्टकंसमाप्तं ॥ १७ ॥

उत्तरचातकाष्टकं

स्वच्छाःसौम्यजलाशयाःप्रतिदिनंतेसंतुमासंतुवा । स्वरूपंवाबहुधाजलंजलधरत्वंदेहिमादेहिवा ॥ कासारेषुसरित्सुसिंधुषुतथानीचेषुनीरंमहं । धिक्तत्रापिशिरोनतिःकिमपरंहेयंभवेन्मानिनां ॥ १ ॥ इत्यालोच्यविमुच्यचातकयुवातेषुस्पृहामादरा । दुर्दुरीवस्तववारिवाहकुरुतेधाराधरालोकनं ॥ २॥ केवानसंतिभुवितामरसावतंसा । हंसावलीवलयिनीजलसंनिवेशाः ॥ किंचातकःफलमवेक्ष्यसवग्रपातां । पौरंदरीमुपगतोनववारिधारां ॥ ३ ॥ रेधाराधरधीरनीरनिकरैरेषारसानीरसा । शेषापूषकरोल्करैरतिखरैरापूरिभूरिंत्वया ॥ एकांतेनभवंतमंतरगतंस्वांतेनसंचिंतयन् । आश्चर्यंपरिपीडितोऽभिरमतेयच्चातकस्तृष्णया ॥ ४ ॥ आत्मानंभोनिधिरेतुशोषं । ब्रह्मांडमार्सिचतुवातरंगैः ॥ नास्तिक्षतिर्नोपचितिःकदापि ।

पयोदवृत्तेःखलुचातकस्य ॥ ५ ॥ पयोदहेवारिददासिवान वा । त्वदेकचित्तःपुनरेषचातकः ॥ वरंमहत्याम्रियतेपिपास या । तथापिनान्यस्यकरोत्युपासनां ॥ ६ ॥ यद्यपिचातक पक्षी । क्षपयतिजलधरमकालवेलायां ॥ तदपिनकुप्यतिज लदे । गतिरिहनान्यायतस्तस्य ॥ ७ ॥ एकएवखगमणि श्चिरंजीवतुचातकः ॥ पिपासयावाम्रियते । याचतेवापुरंद रान् ॥ ८ ॥ ॥ इत्युत्तरचातकाष्टकंसमाप्तं ॥ १८ ॥

भ्रमराष्टकं

गंधाढ्यासौभुवनविदिताकेतकीस्वर्णवर्णा । पद्मभ्रांत्या क्षुधितमधुपःपुष्पमध्येपपात ॥ अंधीभूतःकुसुमरजसाकंटकै श्छिन्नपक्षः । स्थातुंगंतुंद्वयमपिसखेनैवशक्तोद्विरेफः ॥ १ ॥ गंधाढ्यांनवमल्लिकांमधुकरस्त्यक्त्वागतोयूथिकां । दैवात्तां त्वविहायचंपकवनंपश्चात्सरोजंगतः ॥ बद्धस्तत्रनिशाकरेण विधिनाक्रंदत्यसौमूढधीः । संतोषेणविनापराभवपदंप्रामोति मूढोजनः ॥ २ ॥ येऽमीतेमुकुलोद्गमादनुदिनंत्वामाश्रिताःष ट्पदा । स्तेभ्राम्यंतिफलाद्वहिर्बहिरतोदृष्ट्वानसंभाषसे ॥ येकी टास्तवदृक्पथंचनगतास्तेत्वत्फलाभ्यंतरे । धिक्त्वांचूतयतः परापरपरिज्ञानानभिज्ञोभवान् ॥ ३ ॥ नीतंजन्मनवीननीर जवनेपीतंमधुस्वेच्छया । मालत्याःकुसुमेषुयेनसततंकेलीकृ ताहेलया ॥ तेनेयंमधुगंधलुब्धमनसागुंजालतांसेव्यते । हा धिग्दैवकृतंसएवमधुपःकांकांदशांनागतः ॥ ४ ॥ पलाशकु

सुमभ्रांन्या । शुकतुंडेमधुव्रतः ॥ पतन्येषशुकोप्येनं । जंबुभ्रां न्याजिघांसति ॥ ५ ॥ दृष्ट्वास्फीतोभवदलिरसौलेख्यपद्मंवि शालं । चित्रंचित्रंकिमितिकिमितिव्याहरन्निष्पपा ॥ नास्मि न्गंधोनचमधुकणानास्तितत्सौकुमार्यं । घूर्णन्मूर्ध्नाबतनत शिराव्रीडयानिर्जगाम ॥ ६ ॥ अलिरसौनलिनीवनवल्लभः । कुमुदिनीकुलकेलिकलारसः ॥ विधिवशेनविदेशमुपागतः । कुटजपुष्परसंबहुमन्यते ॥ ७ ॥ रात्रिर्गमिष्यतिभविष्यतिसु प्रभातं । भास्वानुदेष्यतिहसिष्यतिपद्मजालं ॥ इत्थंविचिंत यतिकोषगतेद्विरेफे । हाहंतहंतनलिनींगजउज्जहार ॥ ८ ॥

॥ इतिभ्रमराष्टकंसमाप्तं ॥ १९ ॥

वानर्यष्टकं.

माधुर्यंशास्त्रमारोग्यं । दानंमूर्खोद्विजातिकः ॥
वैद्यंसुजीर्णंयूस्संच । वानर्युक्तमिहाष्टकं ॥ १ ॥

माधुर्यैप्रमदाजनेषुललितंदाक्षिण्यमार्यैजने । शौर्यंशत्रु षुनम्रतागुरुजनेधार्मिष्ठतासाधुषु ॥ मर्मज्ञेष्वनुवर्त्तनंबहुविधंमा नंजनेपंडिते । शाठ्यंपापिजनेनरस्यकथिताःपर्यंतमष्टौगुणाः॥ ॥ १ ॥ शास्त्रंसुचिंतितमपिप्रतिचिंतनीयं । स्वाराधितोपिनृप तिःपरिशंकनीयः ॥ अंकेस्थितापियुवतिःपरिरक्षणीयाशास्त्रे नृपेचयुवतौचकुतोवशित्वं ॥ २ ॥ आरोग्यमानृण्यमविप्रवा सः । संप्रत्ययावृत्तिरभीतिवासः ॥ सद्भिर्मनुष्यैःसहसंप्रयो

गः । षड्जीवलोकेषुसुखानिराजन् ॥३॥ दानंदरिद्रेविभवेऽपि शांति । यूनांतपोज्ञानवतांचमौनं ॥ ईहानिवृत्तिश्चसुखोचितानां । दयाचभूतेत्रिदिवंनयंति ॥ ४ ॥ मूर्खोद्विजातिःस्थविरोगृहस्थो । गृहीदरिद्रोधनवांस्तपस्वी ॥ वेश्याकुरूपानृपतिःकुधर्मो । लोकेषडैतानिविडंबितानि ॥ ५॥ वैद्यंपानरतंनटंकुपठितंस्वाध्यायहीनंद्विजं । युद्धेकापुरुषंहयंगतरयंमूर्खंपरिव्राजकं ॥ राजानंचकुमंत्रिभिःपरिवृतंदेशंचसोपद्रवं । भार्यांयौवनगर्वितांपररतांमुंचंतिशीघ्रंबुधाः ॥ ६ ॥ सुजीर्णमन्नंसुविचक्षणःसुतः । सुशासितास्त्रीनृपतिःसुसेवितः ॥ सुचिंत्यचोक्तंसुविचार्ययत्कृतं । सदीर्घकालेपिनयातिविक्रियां ॥ ७॥ वृक्षंक्षीणफलंत्यजंतिविहगाःशुष्कंसरःसारसाः । पुष्पंपर्युषितंत्यजंतिमधुपादग्धंवनांतंमृगाः ॥ निर्द्रव्यंपुरुषंत्यजंतिगणिकाभ्रष्टश्रियंमंत्रिणः । सर्वःकार्यवशाज्जनोभिरमतेकस्यास्तिकोवल्लभः ॥ ८ ॥ इतिवानर्यष्टकंसमाप्तं ॥ २० ॥

वानराष्टकं

ईर्षीदक्षःक्रतौरूपं । स्तब्धःशुष्कैधनंजयः ।।
दुर्मंत्रिणमितिश्लोकाः । कथितावानराष्टके ।। १ ॥

ईर्षीघृणीत्वसंतुष्टः । क्रोधनोनित्यशंकितः ॥ परभाग्योपजीवीच । षडेतेदुःखभागिनः ॥ १ ॥ दक्षःश्रियमधिगच्छति । पथ्याशीकल्पतांसुखमरोगी ॥ उद्युक्तोविद्यायांतथा धर्मार्थयशांसिविनीतः ॥ २ ॥ क्रतौविवाहेव्यसनेरिपुक्षये ।

यशस्करेकर्मणिमित्रसंग्रहे ॥ प्रियासुनारीषुतथैवबांधवे । प्यतिव्ययोनास्तिनराधिपाष्टसु ॥ ३ ॥ रूपंजरासर्वसुखानि तृष्णा । खलेषुसेवापुरुषाभिमानं ॥ याचागुरुत्वंगुणमात्मपू जा । चिंताबलंहंत्यदयाचलक्ष्मीं ॥ ४ ॥ स्तब्धस्यनश्यतिय शोविषमस्यमैत्री । नष्टक्रियस्यकुलमर्थपरस्यधर्मः ॥ विद्या फलंव्यसनिनःकृपणस्यवित्तं । राज्यंप्रमत्तसचिवस्यनराधिप स्य ॥ ५ ॥ शुष्केंधनेवन्हिरुपैतिवृद्धिं । बालेषुशोकश्चपले षुकोपः ॥ कांतासुकामोनिपुणेषुचित्तं । धर्मोदयावत्सुमहत्सु धैर्यं ॥ ६ ॥ जवोहयेह्यस्तिपरंविभूषणं । त्रपांगनायाःकृश तातपस्विनः ॥ द्विजस्यविद्यैवमुनेरपिक्षमा । पराक्रमःशस्त्र बलोपजीविनां ॥ ७ ॥ दुर्मैत्रिणंकमुपयांतिननीतिदोषाः । सं तापयंतिकमपथ्यभुजंनरोगाः॥ कंस्त्रीनमोहयतिकंननिहंतिमृ त्युः कंस्त्रीकृतानविषयाःपरितापयंति ॥ ८ ॥ ॥ ॥

इतिवानराष्टकंसमाप्तं ॥ २१ ॥

गंगाष्टकं

यदवधितवनीरंपातकीनैतिगंगे । तदवधिमलजालैर्नै वमुक्तःकलौस्यात् ॥ तवजलकणिकालंपापिनांपापशुन्ध्यै । पतितपरमदीनान्त्वंहिपासिप्रपन्नान् ॥१॥ तवशिवजललेशं वायुनीतंसमेत्य । सपदिनिरयजालंशून्यतामेतिगंगे ॥ समल गिरिसमूहाःप्रस्फुटंतिप्रचंडा । स्त्वयिसखिविशतांनःपापशं काकुतःस्यात् ॥२॥ तवशिवजलजालंनिःसृतंयर्हिगंगे । सक

लभुवनजालंपूतपूतंतदाभूत् ॥ यमभटकलिवार्त्तादेविलुप्ताय मोपि । व्यधिकृतवरदेहाःपूर्णकामाःसकामाः ॥ ३ ॥ मधुम धुवनपूगंरत्नपूगैर्नृपूगै । र्मधुमधुवनपूगैर्देवपूगैःसपूगैः ॥ पुरह रपरमांगेभासिमायेवगंगे । शमयसिविषतापंदेवदेवस्यवंद्ये ॥ ॥ ४ ॥ चलितशशिकुलाभैरुत्तरंगैस्तरंगै । रमितनदनदीनामं गसंगैरसंगैः ॥ विहरसिजगदंडेखंडयंतीगिरींद्रान् । रमयसि निजकांतंसागरंकांतकांते ॥ ५ ॥ तवपरमहिमानंचित्तवाचा ममानं । हरिहरविधिशक्रानापिगंगेविदंति ॥ श्रुतिकुलमभि धत्तेशंकितंतंगुणांतं । गुणगणसुविलापैर्नेतिनेतीतिसत्यं ॥६॥ तवनुतिनतिनामान्यप्यघंपावयंति । ददतिपरमशांतिंदिव्यभो गानूजनानां ॥ इतिपतितशरण्येत्वांमपन्नोस्मिमात । र्ललित तरतरंगेचांगगंगेप्रसीद ॥ ७ ॥ शुभतरकृतयोगाद्विश्वनाथ प्रसादाद् । भवहरवरविद्यांप्राप्यकाश्यांहिगंगे ॥ भगवतित वतीरेनीरसारंनिपीय । मुदितन्हृदयकंजेनंदसूनुंभजेहं ॥ ८ ॥ गंगाष्टकमिदंकृत्वा । भुक्तिमुक्तिप्रदंनृणां ॥ सत्यज्ञानानंदती र्थ यतिनास्वर्पितंशिवे ॥ ९ ॥ तेनप्रीणातुभगवान् । शिवो गंगाधरोविभुः॥करोतुशंकरःकाश्यां । जनानांसंततंशिवं ॥ ९ ॥

॥ इतिसत्यज्ञानानंदतीर्थयतिनाविरचितं
गंगाष्टकंसंपूर्णम् ॥ २२ ॥

शृंगाररसाष्टकं

अविदितसुखदुःखंनिर्गुणंवस्तुकिंचित् । जडमतिरिहक श्चिन्मोक्षदंत्याचचक्षे ॥ ममतुमतमनंगस्मेरतारल्यघूर्ण । न्म

दकलमदिराक्षीनीविमोक्षोहिमोक्षः ॥ १ ॥ कदाकांतागोरेप रिमलमिलत्पुष्पशयने । शयानःकांतायाःकुचयुगमहंवक्षसि वहन् ॥ अयेकांतेमुग्धेकुटिलनयनेचंद्रवदने । प्रसीदेतिक्रोश न्निमिषमिवनेष्यामिदिवसान् ॥ २ ॥ सायंनायमुदेतिवासर मणिश्चंद्रोनचंडद्युति । दावाग्निःकथमंबरेकिमशनिःस्वच्छां तरीक्षेस्थितः ॥ हंतेदंनिरणायिपांथरमणीप्राणानिलाशाश या । धावद्घोरविभावरीविषधरीभोगस्यभीमोमणिः ॥ ३ ॥ आयातियातिपुनरेवजलंप्रयाति । पद्मांकुराणिविधुनोतिधुनो तिपक्षौ । उन्मत्तवद्भ्रमतिकूजतिमंदमंदं । कांतावियोगवि धुरोनिशिचक्रवाकः ॥ ४ ॥ भुंक्ताभोक्तुंनभुंक्तेकुटिलविषल ताखंडमिदोर्वितर्कात् । ताराकारास्तृषार्त्तोनपिबतिपयसांवि मुषःपत्रसंस्थाः ॥ छायामंभोजिनीनामलिकुलसबलांवीक्ष्य संध्यामसंध्यां । कांताविश्लेषभीरुर्दिनमपिरजनींमन्यतेच क्रवाकः ॥ ५ ॥ गंधाढ्यासौभुवनविदिताकेतकीस्वर्णवर्णा । पद्मभ्रांत्याचपलमधुपःपुष्पमध्येपपात ॥ अंधीभूतःकुसुमरज साकंटकैर्लूनपक्षः । स्थातुंगंतुंह्रयमपिसखेनैवशक्तोद्विरेफः ॥ ६ ॥ तंवीक्ष्यवेपथुमतीसरसांगयष्टि । निक्षेपएवपदमुद्धृत मर्पयंती ॥ मार्गाचलव्यतिकराकुलितेवसिंधुः । शैलाधिराज तनयानययौनतस्थौ ॥ ७ ॥ काकाबलानिधुवनश्रमपीडितां गी । निद्रांगतादयितबाहुलतानुबद्धा ॥ सासातुयातुभवनं मिहिरोद्गमोयं । संकेतवाक्यमितिकाकचयावदंति ॥ ८ ॥

इतिमहाकविकालिदासविरचितं
शृंगाररसाष्टकंसमाप्तं ॥ २३ ॥

Digitized by Google

शृंगार तिलकं

बाहूद्वौचमृणालमास्यकमलंलावण्यलीलाजलं । श्रोणी तीर्थशिलाचनेत्रशफरंधम्मिल्लशैवालकं ॥ कांतायास्तनचक्रवाकयुगलंकंदर्पबाणानलै । र्दग्धानामवगाहनायविधिनारम्यंसरोनिर्मितं ॥ १ ॥ आयातामधुयामिनीयदिपुनर्नायात एवप्रभुः । माणायांतुविभावसौयदिपुनर्जन्मग्रहंप्रार्थये ॥ व्याधःकोकिलबंधनेविधुपरिध्वंसेचराहुर्ग्रहः । कंदर्पेहरनेत्रदीधितिरियंप्राणेश्वरेमन्मथः ॥ २ ॥ इंदीवरेणनयनंमुखमंबुजेन । कुंदेनदंतमधरंनवपल्लवेन ॥ अंगानिचंपकदलैःसविधाय धाता । कांतेकथंघटितवानुपलेनचेतः ॥ ३ ॥ एकोहिखंजनवरोनलिनीदलस्थो । पृष्टःकरोतिचतुरंगबलाधिपत्यं ॥ किंमेकरिष्यतिभवद्वदनारविंदे । जानामिनोनयनखंजनयुग्ममेतत् ॥ ४ ॥ येयेखंजनमेकमेवकमलेपश्यंतिदैवान्क्वचित् । तेसर्वेमनुजाभवंतिसुतरांप्रख्यातभूमीभुजः ॥ त्वद्वक्त्रांबुजनेत्रखंजनयुगंपश्यंतियेयेजनाः । स्तेतेमन्मथबाणजालविकलामुग्धेकिमित्यद्भुतं ॥ ५ ॥ झटितिप्रविशगेहंमाबहिस्तिष्ठकांते । ग्रहणसमयवेलावर्त्ततेशीतरश्मेः ॥ अयिसुविमलकांतिंवीक्ष्यनूनंसराहु । र्ग्रसतितवमुखेंदुंपूर्णचंद्रंविहाय ॥ ६ ॥ कस्तूरीवरपत्रभंगनिकरोभ्रष्टोनगंडस्थले । नोलुप्तंसखिचंदनंस्तनतटेधौतंननेत्रांजनं ॥ रागोनस्खलितस्तवाधरपुटेतांबूलसंवर्द्धितः । किंरुष्टासिगजेंद्रमंदगमनेकिंवाशिशुस्तेपतिः ॥ ७ ॥

Digitized by Google

समायातेकांतेकथमपिचकालेनबहुना । कथाभिर्देशानांस खिरजनिरर्द्धेगतवती ॥ ततोयावल्लीलाकलहकुपितास्मिप्रिय तमे । सपत्नीवमाचीदिगियमभवत्तावदरुणा ॥ ८ ॥ श्लाघ्यं नीरसकाष्ठताडनशतंश्लाघ्यःप्रचंडातपः । क्लेशःश्लाघ्यतरः सुपंकनिचयैःश्लाघ्योतिदाहोनलैः ॥ यत्कांताकुचपार्श्वबा हुलतिकाहिल्लोललीलासुखं । लब्धंकुंभवरत्वयानहिसुखंदुः खैर्विनालभ्यते ॥ ९ ॥ किंमेवक्त्रमुपेत्यचुंबसिबलान्निर्लज्ज जानते ।वस्त्रांतंशठमुंचमुंचशपथैःकिंधूर्त्तनिर्वंचसे ॥ क्षीणाहंत वरात्रिजागरवशात्तामेवयाहिप्रियां ।निर्माल्योज्झितपुष्पदाम निकरेकाषट्पदानांरतिः ॥ १० ॥ वाणिज्येनगतःसमेगृहप तिर्वार्त्तापिनश्रूयते । मातस्तज्जननीप्रसूततनयाजामातृगेहंग ता ॥ बालाहंनवयौवनानिशिकथंस्थातव्यमस्मद्गृहे । सायं संप्रतिवर्त्ततेपथिकहेस्थानांतरंगम्यतां ॥ ११ ॥ यामिन्येषाब हुलजलदैर्बद्धभीमांधकारा । निद्रांयातोममपतिरसौक्लेशितः कर्मदुःखी ॥ बालाचाहंमनसिजभयात्प्राप्तगाढप्रकंपा । ग्रा मश्वौरैरयमुपहतःपांथनिद्रांजहीहि ॥ १२ ॥ क्वभ्रातश्चलितो सिवैद्यकगृहंकिंतत्रशांत्यैरुजां । किंतेनास्तिसखेगृहेप्रियत मासर्वंगदंहंतिया ॥ १४ ॥ दृष्टिर्देहिपुनर्बालेे । कमलायतलो चने ॥ श्रूयतेहिपुरालोके । विषस्यविषमौषधं ॥ १५ ॥ अंत र्गतामदनवन्हिशिखावलीया । नोबाध्यतेकिमपिचंदनलेप नेन ॥ यत्कुंभकारपवनोपरिपंकलेप । स्तापायकेवलमसौ नतुतापशांत्यै ॥ १६ ॥ दृष्ट्वायासांनयनसुभगंबंगवारांगना नां । देशत्यागःपरमकृतिभिःकृष्णसारैरकारि ॥ तासामेव

स्तनयुगजितादंतिनःसंतिमत्ताः । मायोमूर्खःपरिभवविधौना भिमानंतनोति ॥ १७ ॥ अपूर्वोदृश्यतेवन्हिः । कामिन्यास्त नमंडले ॥ दूरतोदहतेगात्रं । हृदिलग्नस्तुशीतलः ॥ १८ ॥ कु सुमेकुसुमोत्पत्तिः । श्रूयतेनचदृश्यते ॥ बालेतवमुखांभोजे । कथमिंदीवरद्वयं ॥ १९ ॥ अयिमन्मथचूतमंजरि । श्रवणाय तलोचनेमिये ॥ अपतद्यमनःक्रयासिमे । किमराजकमत्ररा जते ॥ २० ॥ कोपस्त्वयान्ददिकृतोमयिपंकजाक्षि । सोऽस्तु प्रियंतवकियत्रविधेयमन्यत् ॥ आश्लेषमर्पयमदर्पितपूर्वमुच्चै । रुच्चैःसमर्पयमदर्पितचुंबनंच ॥ २१ ॥ ॥ इतिमहाकवि कालिदासकृतंशृंगारतिलकंसमाप्तं ॥ २४ ॥

घटकर्पर.

निचितंखमुपेत्यनीरदैः । प्रियहीनाहृदयावनीरदैः ॥ सलिलैर्निहितंरजःक्षितौ । रविचंद्रावपिनोपलक्षितौ ॥ १ ॥ हंसानदृग्मेघभयाद्भ्रवंति । निशामुखान्यघनचंद्रवंति ॥ नवां बुमत्ताःशिखिनोनदंति । मेघागमेकुंदसमानदंति ॥ २ ॥ मेघा वृतंनिशिनभातिनभोवितारं । निद्राभ्युपैतिचहरिंसुखसेवि तारं ॥ सेंद्रायुधश्चजलदोधरसन्निभानां । संरंभमावहतिभू धरसन्निभानां ॥ ३ ॥ सतडिज्जलदार्पितंनगेषु । स्वनदंभो धरभीतपन्नगेषु ॥ परिधीररवंजलंदरीषु । प्रपतन्त्यद्भुतरूपसुं दरीषु ॥ ४ ॥ क्षिप्रंप्रसादयतिसंप्रतिकोपितानि । कांतामु खानिरतिविग्रहकोपितानि ॥ उत्कंठयंतिपथिकान्जलदाःस्व

नंतः । शोकःसमुद्भवतितद्वनितास्वनंतः ॥५॥ छादितेदिनक
रस्यभावने । खाज्जलेपततिशोकभावने ॥ मन्मथेचन्दहिं
तुमुद्यते । शोषितश्रमदयेदमुद्यते ॥ ६ ॥ सर्वकालमवलंघ्यतो
यदा । आगतास्थदयितोगतोयदा ॥ निर्घृणेनपरदेशसेवि
ना । मारयिष्यथहतेनमांविना ॥ ७ ॥ ब्रूततंपथिकपांशुलं
घनाः । यूयमेवपथिशीघ्रलंघनाः ॥ अन्यदेशरतिरद्यमुच्य
तां । साधवातववधूःकिमुच्यतां ॥ ८ ॥ हंसपंक्तिरपिनाथसं
मति । प्रस्थितावियतिमानसंमति ॥ चातकोपितृषितोऽबु
याचते । दुःखितापथिकसाम्प्रियाचते ॥ ९ ॥ नीलशष्प्रम
भिभातिकोमलं । वारिवेंदतिचचातकोमलं ॥ अंबुदैःशिखि
गणोविनाद्यते । कारतिर्दयितयाविनाद्यते ॥ १० ॥ मेघश
ब्दमुदिताःकलापिनः । शोषिताम्बुदयशोकलापिनः ॥ तोय
दागमरुशापिसाद्यते । दुर्धरेणमदनेनसाद्यते ॥ ११ ॥ किं
रुपापितवनास्तिकांतया । पांडुगंडपतितालकांतया ॥ शोक
सागरजलेऽद्यपातितां । त्वद्गुणस्मरणमेवपातितां ॥ १२ ॥
कुसुमितकुटजेषुकाननेषु । प्रियरहितेषुसमुत्सुकाननेषु ॥
वहतिचकलुषेजलेनदीनां । किमितिचमांसमवेक्षसेनदीनां
॥ १३ ॥ मार्गेषुमेघसलिलेनविनाशितेषु । कामेधनुःस्पृशति
तेनविनाशितेषु ॥ गंभीरमेघरसितव्यथिताकदाहं । जह्यांस
खिप्रियवियोगजशोकदाहं ॥ १४ सुसुगंधतयावनेजितानां ।
स्वनदंभोधरवायुवीजितानां ॥ मदनस्यकृतेनिकेतकानां ।
प्रतिभांत्यद्यवनानिकेतकानां ॥ १५ ॥ तत्साधुयत्त्वांसुतरुंस
सर्ज । प्रजापतिःकामनिवाससर्ज ॥ त्वंमंजरीभिःप्रवरोवना

नां । नेत्रोत्सवश्वासिसयौवनानां ॥ १६ ॥ नवकदंबशिरो वनतास्मिते । वसतियन्मदनःकुसुमस्मिते ॥ कुटजकिंकुसु मैरुपहस्यते । निपतितास्मिसुदुःप्रसहस्यते ॥ १७ ॥ तरुवर विनतास्मितेसदाहं । ह्रदयंमेमकरोषिकिंसदाहं ॥ तवकुसुम निरीक्षणेपदेहं । विसृजेयंसहसैवनीपदेहं ॥ १८ ॥ कुसुमैरु पशोभितांसितै। र्घनमुक्तांबुलवप्रकाशितैः॥मधुनःसमवेक्ष्यका लतां । भ्रमरश्रुंबतियूथिकालतां ॥ १९॥ तासामृतुःसफलएव ह्रियादिनेषु । सेंद्रायुधांबुधरगर्जितदुर्दिनेषु ॥ रत्युत्सवंभि यतमैःसहमानयंति । मेघागमेप्रियसखीश्चसमानयंति ॥२०॥ एतन्निशम्यविरहानलपीडिताया । स्तस्यावचःखलुदयालुर पीडितायाः ॥ खंस्वारवेणकथितंजलदैरमोघैः । मन्यायय्यौ सगृहमूनदिनैरमोघैः ॥ २१ ॥ आलंब्यचांबुतृषितःकरकोष पेयं । भावानुरक्तवनितासुरतैःशपेयं ॥ जीयेययेनकविना यमकैःपरेण । तस्मैवहेयमुदकंघटकर्परेण ॥ २२ ॥

॥ इतिश्रीघटकर्परकविकृतंयमककाव्यंसंपूर्णं ॥ २५ ॥

चौरपंचाशिका.

अद्यापितांकनकचंपकदामगौरीं। फुल्लारविंदवदनांतनु लोमराजीं ॥ सुप्तोत्थितांमदनविव्हललालसांगीं । विद्यांप्रमा दगुणितामिवचिंतयामि ॥ १ ॥ अद्यापितांशशिमुखींनवयौ वनाढ्यां । पीनस्तनींपुनरहंयदिगौरकांतीं ॥ पश्यामिमन्मथ शरानलपीडितानि । गात्राणिसंप्रतिकरोमिसुशीतलानि ॥

Digitized by Google

॥ २ ॥ अद्यापितांयदिपुनःकमलायताक्षीं । पश्यामिपीवरप
योधरभारखिन्नां ॥ संपीड्यबाहुयुगलेनपिबामिवक्त्र । मु
न्मत्तवन्मधुकरःकमलंयथेष्टं ॥ ३ ॥ अद्यापितांनिधुवनक्लम
निःसहांगी । मापांडुगंडपतितालककुंतलाक्षीं ॥ मच्छन्नपाप
कृतमंतरमावहंतीं । कंठावसक्तमृदुबाहुलतांस्मरामि ॥ ४ ॥
अद्यापितांसुरतजागरघूर्णमानां । तिर्यक्स्खलत्तरलतारक
मावहंतीं ॥ शृंगारसारकमलाकरराजहंसीं । व्रीडावनम्रवद
नामुरसिस्मरामि ॥ ५ ॥ अद्यापितांसुरततांडवसूत्रधारीं ।
पूर्णेंदुसुंदरमुखींमदविव्हलांगीं ॥ तन्वींविशालजघनांस्तन
भारखिन्नां । व्यालोलकुंतलकलापवतींस्मरामि ॥६॥ अद्या
पितांमसृणचंदनचर्चितांगीं । कस्तूरिकापरिमलेनविसर्पिगं
धां ॥ अर्ल्पेदुरेखपरिशीलितभालरेखां । मुग्धाभिरामनयनां
शयनेस्मरामि ॥ ७ ॥ अद्यापितांनिधुवनेमधुपानपात्रीं ।
लीढांबरांकृशतनुंचपलायताक्षीं ॥ काश्मीरपंकमृगनाभिकृ
तांगरागां । कर्पूरपूगपरिपूर्णमुखींस्मरामि ॥ ८ ॥ अद्यापि
तांक्लमपतन्मदिरापराग । प्रस्वेदबिंदुवितंतवदनंप्रियायाः ॥
अंतेस्मरामिरतिखेदविलोलनेत्रं । राहूपरागपरिमुक्तमिवेंदु
बिंबं ॥ ९ ॥ अद्यापितन्मुखशशीपरिवर्त्ततेमे । रात्रौमयिक्षु
तवतिक्षितिपालपुत्र्या ॥ जीवेतिमंगलवचःपरिदत्यकोपा ।
त्कर्णेकृतंकनकपत्रमनालपंत्या ॥ १० ॥ * ॥ ११ ॥ अद्या
पितत्मणयभंगुरदृष्टिपातं । तस्याःस्मरामिरतिविभ्रमगात्रभं
गं ॥ वस्त्रांचलेनपरिधर्षितपयोधरांतं । दंतच्छदंदशनखंडनमं
डलंच ॥ १२ ॥ अद्याप्यशोकनवपल्लवरक्तहस्तां । मुक्ताफ

गः । षड्जीवलोकेषुसुखानिराजन् ॥३॥ दानंदरिद्रेविभवेऽपि शांति । यूनांतपोज्ञानवतांचमौनं ॥ ईहानिवृत्तिश्चसुखोचितानां । दयाचभूतेत्रिदिवंनयंति ॥ ४ ॥ मूर्खोद्विजातिःस्थविरोगृहस्थो । गृहीदरिद्रोधनवांस्तपस्वी ॥ वेश्याकुरूपानृपतिःकुधर्मो । लोकेषडैतानिविडंबितानि ॥ ५॥ वैद्यंपानरतंनटंकुपठितंस्वाध्यायहीनंद्विजं । युद्धेकापुरुषंहयंगतरयंमूर्खंपरिव्राजकं ॥ राजानंचकुमंत्रिभिःपरिवृतंदेशंचसोपद्रवं । भार्यांयौवनगर्वितांपररतांमुंचंतिशीघ्रंबुधाः ॥ ६ ॥ सुजीर्णमन्नंसुविचक्षणःसुतः । सुशासितास्त्रीनृपतिःसुसेवितः ॥ सुचिंत्यचोक्तंसुविचार्यंयत्कृतं । सदीर्घकालेपिनयातिविक्रियां ॥ ७॥ वृक्षंक्षीणफलंत्यजंतिविहगाःशुष्कंसरःसारसाः । पुष्पंपर्युषितंत्यजंतिमधुपादग्धंवनांतंमृगाः ॥ निर्द्रव्यंपुरुषंत्यजंतिगणिकाभ्रष्टश्रियंमंत्रिणः । सर्वःकार्यवशाज्जनोभिरमतेकस्यास्तिकोवल्लभः ॥ ८ ॥ इतिवानर्यष्टकंसमाप्तं ॥ २० ॥

वानराष्टकं

ईर्षीदक्षःक्रतौरूपं । स्तब्धःशुष्कैधनंजयः ।।
दुर्मैत्रिणमितिश्लोकाः । कथितावानराष्टके ।। १ ।।

ईर्षीघृणीत्वसंतुष्टः । क्रोधनोनित्यशंकितः ॥ परभाग्योपजीवीच । षडेतेदुःखभागिनः ॥ १ ॥ दक्षःश्रियमधिगच्छति । पथ्याशीकल्पतांसुखमरोगी ॥ उद्युक्तोविद्यायांतथा धर्मार्थयशांसिविनीतः ॥ २ ॥ क्रतौविवाहेव्यसनेरिपुक्षये ।

यशस्करेकर्मणिमित्रसंग्रहे ॥ प्रियासुनारीषुतथैवबांधवे । प्यतिव्ययोनास्तिनराधिपाष्टसु ॥ ३ ॥ रूपंजरासर्वसुखानि तृष्णा । खलेषुसेवापुरुषाभिमानं ॥ याचागुरुत्वंगुणमात्मपू जा । चिंताबलंहंत्यदयाचलक्ष्मीं ॥ ४ ॥ स्तब्धस्यनश्यतिय शोविषमस्यमैत्री । नष्टक्रियस्यकुलमर्थपरस्यधर्मः ॥ विद्या फलंव्यसनिनःकृपणस्यवित्तं । राज्यंप्रमत्तसचिवस्यनराधिप स्य ॥ ५ ॥ शुष्केंधनेवन्हिरुपैतिवृद्धिं । बालेषुशोकश्चपले षुकोपः ॥ कांतासुकामोनिपुणेषुचित्तं । धर्मोदयावत्सुमहत्सु धैर्यं ॥ ६ ॥ जवोहयेष्वस्तिपरंविभूषणं । त्रपांगनायाःकृश तातपस्विनः ॥ द्विजस्यविद्यैवमुनेरपिक्षमा । पराक्रमःशस्त्र बलोपजीविनां ॥ ७ ॥ दुर्मैत्रिणंकमुपयांतिननीतिदोषाः । सं तापयंतिकमपथ्यभुजंनरोगाः॥ कंस्त्रीनमोहयतिकंननिहंतिमृ त्युः कंस्त्रीकृतानविषयाःपरितापयंति ॥ ८ ॥ ॥ ॥

इतिवानराष्टकंसमाप्तं ॥ २१ ॥

गंगाष्टकं

यदवधितवनीरंपातकीनैतिगंगे । तदवधिमलजालैर्नै वमुक्तःकलौस्यात् ॥ तवजलकणिकालंपापिनांपापशुद्ध्यै । पतितपरमदीनान्त्वंहिपासिप्रपन्नान् ॥१॥ तवशिवजललेशं वायुनीतंसमेत्य । सपदिनिरयजालंशून्यतामेतिगंगे ॥ समल गिरिसमूहाःप्रस्फुटंतिप्रचंडा । स्त्वयिसखिविशतांनःपापशं काकुतःस्यात् ॥२॥ तवशिवजलजालंनिःसृतंयद्धिगंगे । सक

लभुवनजालंपूतपूतंतदाभूत् ॥ यमभटकलिवार्त्तादेविलुप्ताय मोपि । व्यधिकृतवरदेहाःपूर्णकामाःसकामाः ॥ ३ ॥ मधुम धुवनपूगंरत्नपूगैर्नृपूगै । र्मधुमधुवनपूगैर्देवपूगैःसपूगैः ॥ पुरह रपरमांगेभासिमायेवगंगे । शमयसिविषतापंदेवदेवस्यवंद्ये ॥ ॥ ४ ॥ चलितशशिकुलाभैरुत्तरंगैस्तरंगै । रमितनदनदीनामं गसंगैरसंगैः ॥ विहरसिजगदंडेखंडयंतीगिरींद्रान् । रमयसि निजकांतंसागरंकांतकांते ॥ ५ ॥ तवपरमहिमानंचित्तवाचा ममानं । हरिहरविधिशक्रानापिगंगेविदंति ॥ श्रुतिकुलमभि धत्तेशंकितंतंगुणांतं । गुणगणसुविलापैर्नेतिनेतीतिसत्यं ॥ ६ ॥ तवनुतिनतिनामान्यप्यघंपावयंति । ददतिपरमशांतिंदिव्यभो गान्जनानां ॥ इतिपतितशरण्येत्वांमपन्नोस्मिमात । र्ललित तरतरंगेचांगगंगेप्रसीद ॥ ७ ॥ शुभतरकृतयोगाद्विश्वनाथ प्रसादाद् । भवहरवरविद्यांप्राप्यकाश्यांहिगंगे ॥ भगवतित वतीरेनीरसारंनिपीय । मुदितन्हृदयकंजेनंदसूनुंभजेहं ॥ ८ ॥ गंगाष्टकमिदंकृत्वा । भुक्तिमुक्तिप्रदंनृणां ॥ सत्यज्ञानानंदती र्थं यतिनास्वार्पितंशिवे ॥ ९ ॥ तेनप्रीणातुभगवान् । शिवो गंगाधरोविभुः॥करोतुशंकरःकाश्यां । जनानांसंततंशिवं ॥ ९ ॥

॥ इतिसत्यज्ञानानंदतीर्थयतिनाविरचितं
गंगाष्टकंसंपूर्णम् ॥ २२ ॥

शृंगाररसाष्टकं

अविदितसुखदुःखंनिर्गुणंवस्तुकिंचित् । जडमतिरिहक श्चिन्मोक्षइत्याचचक्षे ॥ ममतुमतमनंगस्मेरतारल्यघूर्ण । न्म

Digitized by Google

दकलमदिराक्षीनीविमोक्षोहिमोक्षः ॥ १ ॥ कदाकांतागोरेप रिमलमिलत्पुष्पशयने । शयानःकांतायाःकुचयुगमहंवक्षसि वहन् ॥ अयेकांतेमुग्धेकुटिलनयनेचंद्रवदने । प्रसीदेतिक्रोश न्निमिषमिवनेष्यामिदिवसान् ॥ २ ॥ सायंनायमुदेतिवासर मणिश्चंद्रोनचंडद्युति । दावाग्निःकथमंबरेकिमशनिःस्वच्छां तरीक्षेस्थितः ॥ हंतेदंनिरणायिपांथरमणीमाणानिलाशाश या । धावद्घोरविभावरीविषधरीभोगस्यभीमोमणिः ॥ ३ ॥ आयातियातिपुनरेवजलंमयाति । पद्मांकुराणिविधुनोतिधुनो तिपक्षौ । उन्मत्तवद्भ्रमतिकूजतिमंदमंदं । कांताविधुरोनिशिचक्रवाकः ॥ ४ ॥ भुंक्ताभोक्तुंनभुंक्तेकुटिलविषल ताखंडमिदोर्वितर्कात् । ताराकारास्तृषार्त्तोनपिबतिपयसांवि मुषःपत्रसंस्थाः ॥ छायामंभोजिनीनामलिकुलसबलांवीक्ष्य संध्यामसंध्यां । कांताविश्लेषभीरुर्दिनमपिरजनींमन्यतेच क्रवाकः ॥ ५ ॥ गंधाढ्यासौभुवनविदिताकेतकीस्वर्णवर्णा । पद्मभ्रांत्याचपलमधुपःपुष्पमध्येपपात ॥ अंधीभूतःकुसुमरज साकंटकैर्लूनपक्षः । स्थातुंगंतुंद्वयमपिसखेनैवशक्तोद्विरेफः ॥ ६ ॥ तंवीक्ष्यवेपथुमतीसरसांगयष्टि । निक्षेपएवपदमुद्धृत मर्पयंती ॥ मार्गाचलव्यतिकराकुलितेवसिंधुः । शैलाधिराज तनयानययौनतस्थौ ॥ ७ ॥ काकाबलानिधुवनश्रमपीडितां गी । निद्रांगतादयितबाहुलतानुबद्धा ॥ सासातुयातुभवनं मिहिरोद्गमोयं । संकेतवाक्यमितिकाकचयावदंति ॥ ८ ॥

इतिमहाकविकालिदासविरचितं
शृंगाररसाष्टकंसमाप्तं ॥२३॥

Digitized by Google

शृंगार तिलकं

बाहूद्वौचमृणालमास्यकमलंलावण्यलीलाजलं । श्रोणी तीर्थशिलाचनेत्रशफरंधम्मिल्लशैवालकं ॥ कांतायास्तनचक्र वाकयुगलंकंदर्पबाणानलै । र्दग्धानामवगाहनायविधिनार म्यंसरोनिर्मितं ॥ १ ॥ आयातामधुयामिनीयदिपुनर्नायात एवप्रभुः । प्राणायांतुविभावसौयदिपुनर्जन्मग्रहंप्रार्थये ॥ व्या धःकोकिलबंधनेविधुपरिध्वंसेचराहुर्ग्रहः । कंदर्पेहरनेत्रदी धितिरियंप्राणेश्वरेमन्मथः ॥ २ ॥ इंदीवरेणनयनंमुखमंबुजे न । कुंदेनदंतमधरंनवपल्लवेन ॥ अंगानिचंपकदलैःसविधाय धाता । कांतेकथंघटितवानुपलेनचेतः ॥ ३ ॥ एकोह्यखंज नवरोनलिनीदलस्थो । पृष्टःकरोतिचतुरंगबलाधिपत्यं ॥ किं मेकरिष्यतिभवद्वदनारविंदे । जानामिनोनयनखंजनयुग्ममे तत् ॥ ४ ॥ येयेखंजनमेकमेवकमलेपश्यंतिदैवात्क्वचित् । ते सर्वेमनुजाभवंतिसुतरांप्रख्यातभूमीभुजः ॥ त्वद्वक्त्रांबुजनेत्र खंजनयुगंपश्यंतियेयेजना । स्तेतेमन्मथबाणजालविकला मुग्धेकिमिन्यद्भुतं ॥ ५ ॥ झटितिप्रविशगेहंमाबहिस्तिष्ठकां ते । ग्रहणसमयवेलावर्त्ततेशीतरश्मेः ॥ अयिसुविमलकांति वीक्ष्यनूनंसराहु । र्ग्रसतितवमुखेंदुंपूर्णचंद्रंविहाय ॥ ६ ॥ कस्तूरीवरपत्रभंगनिकरोभ्रष्टोनगंडस्थले । नोलुप्तंसखिचंदनं स्तनतटेधौतंननेत्रांजनं ॥ रागोनस्खलितस्तवाधरपुटेतांबूल संवर्द्धितः। किंरुष्टासिगजेंद्रमंदगमनेकिंवाशिशुस्तेपतिः ॥ ७ ॥

Digitized by Google

समायातेकांतेकथमपिचकालेनबहुना । कथाभिर्देशानांस खिरजनिरर्द्धेगतवती ॥ ततोयावल्लीलाकलहकुपितास्मिप्रिय तमे । सपत्नीवप्राचीदिगियमभवत्तावदरुणा ॥ ८ ॥ श्लाघ्यं नीरसकाष्ठताडनशतंश्लाघ्यःप्रचंडातपः । क्लेशःश्लाघ्यतरः सुपंकनिचयैःश्लाघ्योतिदाहोनलैः ॥ यत्कांताकुचपार्श्वबा हुलतिकाहिल्लोललीलासुखं । लब्धंकुंभवरत्वयानहिसुखंदुः खैर्विनालभ्यते ॥ ९ ॥ किंमेवक्रमुपेत्यचुंबसिबलान्निर्लज्ज जानते ।वस्त्रांतंशठमुंचमुंचशपथैःकिंधूर्त्तनिर्वचसे ॥ क्षीणाहंत वरात्रिजागरवशात्तामेवयाहिप्रियां ।निर्माल्योज्झितपुष्पदाम निकरेकाषट्पदानांरतिः ॥ १० ॥ वाणिज्येनगतःसमेगृहप तिर्वार्त्तापिनश्रूयते । प्रातस्तज्जननीमसूततनयाजामातृगेहंग ता ॥ बालाहंनवयौवनानिशिकथंस्थातव्यमस्मद्गृहे । सायं संप्रतिवर्त्ततेपथिकहेस्थानांतरंगम्यतां ॥ ११ ॥ यामिन्येषाब हुलजलदैर्बद्धभीमांधकारा । निद्रांयातोममपतिरसौक्लेशितः कर्मदुःखी ॥ बालाचाहंमनसिजभयान्मामगाढमकंपा । मा मश्रौरैरयमुपहतःपांथनिद्रांजहीहि ॥ १२ ॥ क्वभ्रातश्चलितो सिवैद्यकगृहंकितत्रशांन्यैरुजां । किंतेनास्तिसखेगृहेमियत मासर्वंगदंहंतिया ॥ १४ ॥ दृष्टिदेहिपुनर्बाले । कमलायतलो चने ॥ श्रूयतेहिपुरालोके । विषस्यविषमौषधं ॥ १५ ॥ अंत र्गतामदनवन्हिशिखावलीया । नोबाध्यतेकिमपिचंदनलेप नेन ॥ यत्कुंभकारपवनोपरिपंकलेप । स्तापायकेवलमसौ नतुतापशांन्यै ॥ १६ ॥ दृष्ट्वायासांनयनसुभगंबंगवारांगना नां । देशत्यागःपरमकृतिभिःकृष्णसारैरकारि ॥ तासामेव

स्तनयुगजितादंतिनःसंतिमत्ताः । प्रायोमूर्खःपरिभवविधौना भिमानंतनोति ॥ १७ ॥ अपूर्वोदृश्यतेवन्हिः । कामिन्यास्त नमंडले ॥ दूरतोदहतेगात्रं । त्वदिलग्नस्तुशीतलः ॥ १८ ॥ कु सुमेकुसुमोत्पत्तिः । श्रूयतेनचदृश्यते ॥ बालेतवमुखांभोजे । कथमिंदीवरद्वयं ॥ १९ ॥ अयिमन्मथचूतमंजरि । श्रवणाय तलोचनेमिये ॥ अपदंत्यमनःक्रयासिमे । किमराजकमत्ररा जते ॥ २० ॥ कोपस्त्वयाप्रदिक्रतोमयिपंकजाक्षि । सोऽस्तु प्रियंतवकियत्रविधेममन्यत् ॥ आश्लेषमर्पयमदर्पितपूर्वमुच्चै । रुच्चैःसमर्पयमदर्पितचुंबनंच ॥ २१ ॥ ॥ इतिमहाकवि कालिदासकृतंशृंगारतिलकंसमाप्तं ॥ २४ ॥

घटकर्पर.

निचितंखमुपेत्यनीरदैः । प्रियहीनाइदयावनीरदैः ॥ सलिलैर्निहितंरजःक्षितौ । रविचंद्रावपिनोपलक्षितौ ॥ १ ॥ हंसानदम्मेघभयाद्रवंति । निशामुखान्यघनचंद्रवंति ॥ नवां बुमत्ताःशिखिनोनदंति । मेघागमेकुंदसमानदंति ॥ २ ॥ मेघा वृतंनिशिनभातिनभोवितारं । निद्राभ्युपैतिचहरिंसुखसेवि तारं ॥ सेंद्रायुधश्चजलदोधरसन्निभानां । संरंभमावहतिभू धरसन्निभानां ॥ ३ ॥ सतडिज्जलदार्पितंनगेषु । स्वनदंभो धरभीतपन्नगेषु ॥ परिधीररवंजलंदरीषु । प्रपतन्त्यद्भुतरूपसुं दरीषु ॥ ४ ॥ क्षिप्रंप्रसादयतिसंप्रतिकोपितानि । कांतामु खानिरतिविग्रहकोपितानि ॥ उत्कंठयंतिपथिकान्जलदाःस्व

नंतः । शोकःसमुद्भवतितद्वनितास्वनंतः ॥५॥ छादितेदिनक
रस्यभावने । खाज्जलेपततिशोकभावने ॥ मन्मथेचन्द्दहं
तुमुद्यते । शोषितमदयेदमुद्यते ॥ ६ ॥ सर्वकालमवलंघ्यतो
यदा । आगतास्थदयितेागतोयदा ॥ निर्घृणेनपरदेशसेवि
ना । मारयिष्यथहतेनमांविना ॥ ७ ॥ ब्रूततंपथिकपांशुलं
घनाः । यूयमेवपथिशीघ्रलंघनाः ॥ अन्यदेशरतिरद्यमुच्य
तां । साधवातववधूःकिमुच्यतां ॥ ८ ॥ हंसपंक्तिरपिनाथसं
मति । प्रस्थितावियतिमानसंमति ॥ चातकोपितृषितोंऽबु
याचते । दुःखितापथिकसाप्रियाचते ॥ ९ ॥ नीलशष्प्म
भिभातिकोमलं । वारिवंदतिचचातकोमलं ॥ अंबुदैःशिखि
गणोविनाद्यते । कारतिर्दयितयाविनाद्यते ॥ १० ॥ मेघश
ब्दमुदिताःकलापिनः । शोषिताद्दयशोकलापिनः ॥ तोय
दागमकृशापिसाद्यते । दुर्धरेणमदनेनसाद्यते ॥ ११ ॥ किं
रुपापितवनास्तिकांतया । पांडुगंडपतितालकांतया ॥ शोक
सागरजलेऽद्यपातितां । त्वद्गुणस्मरणमेवपातितां ॥ १२ ॥
कुसुमितकुटजेषुकाननेषु । प्रियरहितेषुसमुत्सुकाननेषु ॥
वहतिचकलुषेजलेनदीनां । किमितिचमांसमवेक्षसेनदीनां
॥ १३ ॥ मार्गेषुमेघसलिलेनविनाशितेषु । कामेधनुःस्पृशति
तेनविनाशितेषु ॥ गंभीरमेघरसितव्यथिताकदाहं । जह्यांस
खिप्रियवियोगजशोकदाहं ॥ १४ सुसुगंधतयावनेजितानां ।
स्वनदंभोधरवायुवीजितानां ॥ मदनस्यकृतेनिकेतकानां ।
प्रतिभांत्यद्यवनानिकेतकानां ॥ १५ ॥ तत्साधुयत्त्वांसुतरुंस
सर्ज । प्रजापतिःकामनिवाससर्ज ॥ त्वंमंजरीभिःप्रवरोवना

नां। नेत्रोत्सवश्वासिसयौवनानां ॥ १६ ॥ नवकदंबशिरो वनतास्मिते । वसतियन्मदनःकुसुमस्मिते ॥ कुटजकिंकुसु मैरुपहस्यते । निपतितास्मिसुदुःमसहस्यते ॥ १७ ॥ तरुवर विनतास्मितेसदाहं । त्वदयंमेमकरोषिकिंसदाहं ॥ तवकुसुम निरीक्षणेपदेहं । विसृजेयंसहसैवनीपदेहं ॥ १८ ॥ कुसुमैरु पशोभितांसितै। र्घनमुक्तांबुलवमकाशितैः॥मधुनःसमवेक्ष्यका लतां । भ्रमरश्रुंबतियूथिकालतां ॥ १९॥ तासामृतुःसफलएव हियादिनेषु । सेंद्रायुधांबुधरगर्जितदुर्दिनेषु ॥ रत्युत्सवंमि यतमैःसहमानयंति । मेघागमेप्रियसखीश्चसमानयंति ॥२०॥ एतन्निशम्यविरहानलपीडिताया । स्तस्यावचःखलुदयालुर पीडितायाः ॥ खंस्वारवेणकथितंजलदैरमोघैः । प्रत्याययौ सगृहमूनदिनैरमोघैः ॥ २१ ॥ आलंब्यचांबुतृषितःकरकोष पेयं । भावानुरक्तवनितासुरतैःशपेयं ॥ जीयेययेनकविना यमकैःपरेण । तस्मैवहेयमुदकंघटकर्परेण ॥ २२ ॥

॥ इतिश्रीघटकर्परकविकृतंयमककाव्यंसंपूर्णं ॥ २५ ॥

चौरपंचाशिका.

अद्यापितांकनकचंपकदामगौरीं। फुल्लारविंदवदनांतनु लोमराजीं ॥ सुप्रोन्थितांमदनविव्हललालसांगीं । विद्यांप्रमा दगुणितामिवचिंतयामि ॥ १ ॥ अद्यापितांशशिमुखींनवयौ वनाढ्यां । पीनस्तनींपुनरहंयदिगौरकांतीं ॥ पश्यामिमन्मथ शरानलपीडितानि । गात्राणिसंप्रतिकरोमिसुशीतलानि ॥

॥ २ ॥ अद्यापितांयदिपुनःकमलायताक्षीं । पश्यामिपीवरप
योधरभारखिन्नां ॥ संपीड्यबाहुयुगलेनपिबामिवक्त्र । मु
न्मत्तवन्मधुकरःकमलंयथेष्टं ॥ ३ ॥ अद्यापितांनिधुवनक्लम
निःसहांगी । मापांडुगंडपतितालककुंतलाक्षीं ॥ मच्छन्नपाप
कृतमंतरमावहंतीं । कंठावसक्तमृदुबाहुलतांस्मरामि ॥ ४ ॥
अद्यापितांसुरतजागरघूर्णमानां । तिर्यक्स्खलत्तरलतारक
मावहंतीं ॥ शृंगारसारकमलाकरराजहंसीं । व्रीडावनम्रवद
नामुरसिस्मरामि ॥ ५ ॥ अद्यापितांसुरततांडवसूत्रधारीं ।
पूर्णेंदुसुंदरमुखींमदविव्हलांगीं ॥ तन्वींविशालजघनांस्तन
भारखिन्नां । व्यालोलकुंतलकलापवतींस्मरामि ॥६ ॥ अद्या
पितांमसृणचंदनचर्चितांगीं । कस्तूरिकापरिमलेनविसर्पिगं
धां ॥ अल्पेंदुरेखपरिशीलितभालरेखां । मुग्धाभिरामनयनां
शयनेस्मरामि ॥ ७ ॥ अद्यापितांनिधुवनेमधुपानपात्रीं ।
लीढांबरांकुशतनुंचपलायताक्षीं ॥ काश्मीरपंकमृगनाभिकृ
तांगरागां । कर्पूरपूगपरिपूर्णमुखींस्मरामि ॥ ८ ॥ अद्यापि
तांक्लमपतन्मदिरापराग । प्रस्वेदबिंदुवितंतवदनंप्रियायाः ॥
अंतेस्मरामिरतिखेदविलोलनेत्रं । राहूपरागपरिमुक्तमिवेंदु
बिंबं ॥ ९ ॥ अद्यापितन्मुखशशीपरिवर्त्ततेमे । रात्रौमयिक्षु
तवतिक्षितिपालपुत्र्या ॥ जीवेतिमंगलवचःपरिदत्तयकोपा ।
त्कर्णेकृतंकनकपत्रमनालपंत्या ॥ १० ॥ * ॥ ११ ॥ अद्या
पितन्मणयभंगुरदृष्टिपातं । तस्याःस्मरामिरतिविभ्रमगात्रभं
गं ॥ वस्त्रांचलेनपरिधर्षितपयोधरांतं । दंतच्छदंदशनखंडनमं
डलंच ॥ १२ ॥ अद्याप्यशोकनवपल्लवरक्तहस्तां । मुक्ताफ

लभचयचुंबितचूचुकाग्रां ॥ अंतःस्मितोच्छ्वसितपांडुरगंडदे
शां । तांवल्लभांरहसिसंवलितांस्मरामि ॥ १३ ॥ अद्यापित
स्कुसुमरेणुसुगंधिमिश्रं । न्यस्तंस्मरामिनखरक्षतलक्ष्मतस्याः॥
आकृष्टहेमरुचिरांबरमुन्थितायाः । लज्जावशात्करधृतंनकुतो
व्रजंत्याः ॥ १४ ॥ अद्यापितांविधृतकज्जललोलनेत्रां । पृथ्वी
मभिन्नकुसुमाकुलकेशपाशां ॥ सिंदूरसंवलितमौक्तिकहार
भारां । आबद्धहेमकटिकांरहसिस्मरामि ॥ १५ ॥ अद्यापि
तांधवलवेश्मनिरन्नदीप । मालामयूखपटलैर्गलितांधकारैः॥
सुप्तांचमेरहसिहास्यमुखींमसन्नां । लज्जाभरार्द्रनयनांपरि
चिंतयामि ॥ १६ ॥ अद्यापितांगलितबंधनकेशपाशां। स्रस्त
स्रजंस्मितसुधामधुराधरौष्ठीं ॥ पीनोन्नतस्तनयुगोपरिचारुचुं
बन् । मुक्तावलिरहसिलोलदृशंस्मरामि ॥ १७ ॥ अद्याप्यहं
विरहवन्हिनिपीडितांगीं । तन्वींकुरंगनयनांसुरतैकपात्रीं ॥
नानाविचित्ररुतमंडनमावहंतीं । तांराजहंसगमनांसुदतींस्म
रामि ॥ १८ ॥ अद्यापितांविरहितांकुचभारनम्रां । मुक्ताक
लापविमलीकृतकंठदेशां ॥ तांकेलिमंदिरगतांकुसुमायुधस्य।
कांतांस्मरामिरुचिरोज्वलधूमकेतुं ॥ १९ ॥ अद्यापिचाटुश
तमोल्लसितस्मितंतु । तस्याःस्मरामिसुरतक्लमविव्हलायाः ॥
अव्याजनिस्तनितकातरकाकुकंठ । संकीर्णवर्णरुचिरंवदनं
प्रियायाः ॥ २० ॥ अद्यापितांसुरतघूर्णनिमीलिताक्षीं । स्र
स्तांगयष्टिगलितांशुककेशनम्रां ॥ शृंगारवारिकमलांबुजरा
जहंसीं । जन्मांतरेनिधुवनेप्यनुचिंतयामि ॥ २१ ॥ अद्यापि
तांप्रणयिनींमृगशावकाक्षीं । पीयूषपूर्णकुचकुंभयुगंवहंतीं ॥

Digitized by Google

पश्याम्यहंयदिपुनर्दिवसावसाने । स्वर्गापवर्गनरराज्यसुखं न्यजामि ॥ २२ ॥ अद्यापितांस्तिमितवस्त्रमिवावलग्नां । गौढ मतापमदनानलतप्तदेहां ॥ बालांमदेकशरणामनुकंपनीयां । प्राणाधिकांक्षणमहंनहिविस्मरामि ॥ २३ ॥ अद्यापितांक्षि तितलेवरकामिनीनां । सर्वांगसुंदरतयामथमैकरेखां ॥ संसा रनाटकरसोत्तमरत्नपात्रीं । कांतांस्मरामिकुसुमायुधबाण खिन्नां ॥ २४ ॥ अद्यापितांमथमतोवरसुंदरींमे । स्नेहैकपा त्रघटितावनिनाथपुत्रीं ॥ हेहेजनाममवियोगहुताशतापं । सोढुंनशक्यतइतिमतिर्चितयामि ॥ २५ ॥ अद्यापिविस्मयक रीत्रिदशान्विहाय । बुद्धिर्बलाच्चलतितत्किमहंकरोमि ॥ जा नन्नपिप्रतिमुहूर्त्तमिवांतकाले । रुष्टातुवल्लभतरेतिममातिधी राः ॥ २६ ॥ अद्यापितांगमनमित्युदितंमदीयं । श्रुत्वैवभीत हरिणीशिशुचंचलाक्षीं ॥ वाचस्खलद्विगलदश्रुकणाकुला क्षीं । संचिंतयामिगुरुशोकविनम्रवक्त्रां ॥ २७ ॥ अद्यापिवा सगृहतोमथिनीयमाने । दुर्वारभीषणवरैर्यमदूतकल्पैः ॥ कि किंतयाबहुविधंनकृतंमदर्थे । कर्त्तुंनपार्यतइतिव्यथतेमनोमे॥ ॥२८॥अद्यापितांक्षणवियोगवियोगमग्नां शंकेपुनर्बहुतयामृत शोकधारां ॥ मज्जीवधारणकरींमदनालसांगीं । किंब्रह्मकेश वहरैःसुदतींस्मरामि ॥२९ ॥ अद्यापितांचलचकोरविलोलने त्रां । शीतांशुमंडलमुखींकुटिलाग्रकेशां ॥ मत्तेभकुंभसदृश स्तनभारनम्रां । बंधूकपुष्पसदृशौष्ठपुटांस्मरामि ॥ ३० ॥ अ द्यापिमेनिशिदिवाहृदयंदुनोति । पूर्णेंदुसुंदरमुखंममवल्लभा याः ॥ लावण्यनिर्जितमनोहरकामदर्पं । भूयःपुनःप्रतिमुहुर्न

विलोक्यतेयत् ॥ ३१ ॥ अद्यापितामरहितांमनसापिनित्यं । संचिंतयामिसततंममजीवितेशां ॥ लावण्यभोगनवयौवनभा रसारां । जन्मांतरेपिममसैवगतिर्यथास्यात् ॥ ३२ ॥ अद्या पितांमलयपंकजगंधलुब्ध । भ्राम्यद्भिरेफचयचुंबितगंडदेशां॥ केशावधूतकरपल्लवकंकणानां । त्वांनोदुनोतिनियतंसुरतंमदी यं ॥ ३३॥ अद्यापिसानखपदंस्तनमंडलेषु । दत्तंमयैवमधुपान विमोहितेन ॥ उद्भिन्नरोमपुलकैर्बहुभिःसमंता । जागर्त्तिर क्षतिविलोकयतिप्रयत्नात् ॥३४॥ अद्यापियाशशिमुखीनकु तागसंमां । सोच्चैर्वचःप्रतिददातियदैवनक्तं ॥ चुंबामिरोदि मिभृशंपतितोस्मिपादे । दासस्तवप्रियतमेभजमांस्मरामि ॥ ॥ ३५ ॥ अद्यापिधावतिमनःकिमहंकरोमि । सार्द्धंसखीभि रभिवासगृहेषुकांते ॥ कांतासुगीतपरिहासविचित्रवाचैः । क्रीडासुखैरिहतुयातुमदीयकालः ॥ ३६ ॥ अद्यापितांनखलु वेद्मिकिमीशपत्नी । सावाशचीसुरपतेरथकृष्णलक्ष्मीः ॥ धात्रै वकिंत्रिजगतांपरिमोहनाय । सृष्टाकुलेयुवतिराजिदिदृक्षयै व ॥ ३७ ॥ अद्यापितांजगतिवर्णयितुंनकोपि । शक्नोत्यदृष्ट सदृशप्रतिरूपलक्ष्मीं ॥ दृष्टंतयातुसदृशंखलुतेनरूपं । शक्तोभ वेदपिसएवपरोनचान्यः ॥ ३८ ॥ अद्यापिनिर्मलशरच्छशि गौरकांति । चेतोमुनेःपरिहरेत्किमुतास्मदीयं ॥ वक्त्रंसुधामय महंयदितत्प्रपद्ये । चुंबामिचाप्यविरतंव्यथतेनचेतः ॥ ३९ ॥ अद्यापितेप्रतिमुहुःप्रतिभाव्यमाना । चेतोहरंतिहरिणीशिशु लोचनायाः ॥ अंतर्निमग्नमधुपाकुलकुंदवृंद । संदर्भसुंदररु चोनयनार्द्धपाताः ॥ ४० ॥ अद्यापितत्कमलरेणुसुगंधिगंधं ।

तत्प्रेमवारिमकरध्वजतापहारि ॥ प्रामोम्यहंयदिपुनःसुरतैक
तीर्थं । प्राणांस्त्यजामिनियतंपुनरागमिहेतोः ॥ ४१ ॥ अद्या
पिसायदिपुनर्नलिनीवनांते।रोमांचवीचिविलसच्चपलांगयष्टिः
॥कादंबकेशररुचःकणमात्रसेका । किंचित्तूक्तमंश्लथयतिमि
थराजहंसी ॥ ४२ ॥ अद्यापितांनृपतिशेखरराजकन्यां । संपू
र्णयौवनमदालसभंगगात्रीं ॥ गंधर्वयक्षसुरकिन्नरराजकन्यां।
स्वर्गादिमांनिपतितामिवचिंतयामि ॥ ४३ ॥ अद्यापितत्सुर
तकेलिनिबद्धबुद्धिं । रंकोपबंधपतितोस्मितशून्यहस्तां ॥ दं
तोष्ठपीडननखक्षतरक्तसिक्तां । तस्याःस्मरामिरतिबंधुरगात्रय
ष्टिं ॥ ४४ ॥ अद्यापितांनिजवपुःकृतवेदिमध्यां । तत्संगसंचि
तसुधास्तनभारनम्रां ॥ नानाविचित्रकृतमंडनमंडितांगीं । सु
मोन्थितांनिशिदिवानहिविस्मरामि ॥ ४५ ॥ अद्यापितांनव
वधूसुरताभियोगे । संपूर्णकेलिविधिनारचितांकदाचित् ॥ पू
र्णेंदुसुंदरमुखींहरिणायताक्षीं । उन्निद्रकोकनदपत्रनखींस्मरा
मि ॥ ४६ ॥ अद्यापितद्विकसितांबुजगौरमध्यं । गोरोचना
तिलकवृंदकृतैकदेशं ॥ ईषन्मदालसविघूर्णितदृष्टिपातं । कां
तामुखंसखिमयासहगच्छतीव ॥ ४७ ॥ अद्याप्यहंनववधूसु
रताभियोगं । शक्नोमिनान्यविधिनारचितुंकदाचित् ॥ तद्भा
तरोमरणमेवहिदुःखशांतौ । विज्ञापयामिभवतस्त्वरितंसुनी
तुं ॥ ४८ ॥ अद्यापिनोज्झतिहरःकिलकालकूटं । कूर्मोबिभ
र्त्तिधरणींखलुपृष्ठकेन ॥ अंभोनिधिर्वहतिदुःसहवाडवाग्नि ।
मंगीकृतंसुकृतिनःपरिपालयंति ॥ ४९ ॥ ॥ इतिमहाकविसु
दरकृतंविद्यायारूपगणवर्णनंवाचौरपंचाशिकासमाप्ता ॥२६॥

धर्मविवेकः

श्रद्धाबीजोविभवेदांबुसिक्तः । शाखाविद्यास्ताश्चतस्रो दशापि ॥ पुण्यान्यर्थाद्वेफलेस्थूलसूक्ष्मे । मोक्षःकामोधर्मवृक्षोयमीड्यः ॥ १ ॥ यातःक्ष्मामखिलांप्रदायहरयेपातालमूलं बलिः । सक्तुप्रस्थविसर्जनात्सचमुनिःस्वर्गंसमारोपितः ॥ आबाल्यादसतीसतीसुरपुरींकुंतीसमारोहयाद्वासीतापतिदेवतागमदधोधर्मस्यसूक्ष्मागतिः ॥ २ ॥ कानीनस्यमुनेःस्वबांधववधूवैधव्यविध्वंसिनो । नेमारःखलुगोलकस्यतनयाःकुंडास्वयंपांडवाः ॥ तेऽमीपंचसमानयोनिरतयःतेषांगुणोत्कीर्त्तना । दक्षय्यंसुकृतंभवेदविकलंधर्मस्यसूक्ष्मागतिः ॥ ३ ॥ आहारेशुचिताध्वनौमधुरतानीडेपराधीनता । बंधौनिर्ममता वनेरसिकतावाचालतामाधवे ॥ यस्यैतेगुणराशयःपिकवरं त्यक्त्वाकिमेतेजना । वंदंतेखलुखंजनंकृमिभुजंचित्रागतिःकर्मणां ॥ ४ ॥ कांतंवक्तिकपोतिकाकुलतयानाथांऽतकालोऽधुना । व्याधोधोधृतचापशानितशरःश्येनःपरिभ्राम्यति ॥ इत्थंसत्यहिनासदष्टइषुणाश्येनोपितेनाहत । स्तूर्णंतौतुयमालयंप्रतिगतौदैवीविचित्रागतिः ॥ ५ ॥ शुंठीगोखुरयोर्विचार्यमनसाकल्काशनंयन्मया । प्रोक्तंतद्विपरीतकंकृतमहोगोःखूमात्रंददौ ॥ नार्थोमूखंजनालयेनचसुखंनोवायशोलभ्यते । सद्वैद्येकविभूपतौहरहरेलाभःपरंगोवधः ॥ ६ ॥ पंचास्यस्यपराभवायभषकोमांसेनगोर्भूयसा । दध्यन्नैरपिपायसैःप्रतिदि

नंसंवर्द्धितोयोमया ॥ सोयंसिंहरवाद्दुहांतरगमद्धीन्याकुलःसं भ्रमा । द्धंताशाविलयंगताहतविधेर्लाभःपरंगोवधः ॥ ७ ॥ पारींद्रस्यपराभवायसुरभीमांसेनदुर्मेधसा । पुष्यंतेकिलपी वराःकटुगिरःश्वानःप्रयत्नादमी ॥ नत्वेतन्मदमत्तवारणचमू विद्रावणःकेशरी । जेतव्योभवताकिरातनृपतेलाभःपरंगोव धः ॥ ८ ॥ एकाभूरुभयोरैक्य । मुभयोर्दलकांडयोः ॥ शा लिश्यामाकयोर्भेदः । फलेनपरिचीयते ॥ ९ ॥ जातःसूर्यकु लेपितादशरथःक्षोणीभुजामग्रणीः । सीतासत्यपरायणाग्रण यिनीयस्यानुजोलक्ष्मणः ॥ दोर्दंडेनसमोनचास्तिभुवनेप्रत्य क्षविष्णुःस्वयं । रामोयेनविडंबितोपिविधिनाचान्येपरेकाक था ॥ १० ॥ असारेखलुसंसारे । सारंश्वशुरमंदिरं ॥ हरोहि मालयेशेते । विष्णुःशेतेमहोदधौ ॥ ११ ॥ असारेखलुसंसा रे । सारमेतच्चतुष्टयं ॥ काश्यांवासःसतांसंगो । गंगांभःशंभु सेवनं ॥ १२ ॥ आपदर्थधनंरक्षे । द्दारान्रक्षेद्धनैरपि ॥ आ त्मानंसततंरक्षे । द्दारैरपिधनैरपि ॥ १३ ॥ चिंताज्वरोमनु ष्याणां । वस्त्राणामातपोज्वरः ॥ असौभाग्यंज्वरःस्त्रीणा । मश्वानांमैथुनंज्वरः ॥ १४ ॥ यदिकृष्णपदेचिंता । भक्तिस्त त्पदपंकजे ॥ विषमेदुर्गमेवापि । कांचितामरणेरणे ॥ १५ ॥ देवेतीर्थेद्विजेमंत्रे । दैवज्ञेभेषजेगुरौ ॥ यादशीभावनायस्य । सिद्धिर्भवतितादृशी ॥ १६ ॥ नमाताशपतेपुत्रं । नदोषंलभते मही ॥ नहिंसांकुरुतेसाधु । र्नदेवःसृष्टिनाशकः ॥ १७ ॥ जल्पंतिसूरयःसर्वे । धर्मोरक्षतिधार्मिकं ॥ एतज्ज्ञातव्यमद्यै व । किमत्रचभविष्यति ॥ १८ ॥ जयोस्तुपांडुपुत्राणां । ये

षांपक्षेजनार्दनः ॥ यतःकृष्णस्ततोधर्मो । यतोधर्मस्ततोजयः ॥ १९ ॥ ॥ इतिश्रीमहाकविहलायुधविरचितंधर्मविवेक वाक्यंसमाप्तं ॥ २७ ॥

मुकुंदमाला

वंदेमुकुंदमरविंददलायताक्षं । कुंदेंदुशंखदशनंशिशुगोप वेषं ॥ इंद्रादिदेवगणवंदितपादपीठं । वृंदावनालयमहंवसुदे वसूनुं ॥ १ ॥ श्रीवल्लभेतिवरदेतिदयापरेति । भक्तिप्रियेति भवलुंठनकोविदेति ॥ नाथेतिनागशयनेतिजगन्निवासे । त्यालापिनंप्रतिदिनंकुरुमांमुकुंद ॥ २ ॥ जयतुजयतुदेवोदेव कीनंदनोयं । जयतुजयतुकृष्णोवृष्णिवंशप्रदीपः ॥ जयतुज यतुमेघश्यामलःकोमलांगो । जयतुजयतुपृथ्वीभारनाशो मुकुंदः ॥ ३ ॥ मुकुंदमूर्ध्नामणिपन्ययाचे । भवंतमेकांतमियं तमर्थं ॥ अविस्मृतिस्त्वच्चरणारविंदे । भवेभवेमेऽस्तुतवप्रसा दात् ॥ ४ ॥ श्रीगोविंदपदांभोज । मधुनोमहदद्भुतं ॥ यत्पा यिनोनमुंचंति । मुंचंतियदपायिनः ॥ ५ ॥ नाहंवंदेतवचर णयोर्द्वंद्वमद्वंद्वहेतोः । कुंभीपाकंगुरुमपिहरेनारकंनापनीतुं । रम्यारामामृदुतनुलतानंदनेनापिरंतुं । भावेभावेत्हृदयभवने भावयेयंभवंतं ॥ ६ ॥ नास्थाधर्मेनवसुनिचयेनैवकामोपभो गे । यद्भाव्यंतद्भवतुभगवन्पूर्वकर्मानुरूपं ॥ एतन्प्रार्थ्यंममब हुमतंजन्मजन्मांतरेपित्वन्पादांभोरुहयुगगतानिश्चलाभक्तिर स्तु ॥ ७ ॥ दिविवाभुविवाममास्तुवासो। नरकेवानरकांतक

मकामं ॥ अवधीरितशारदारविंदौ । चरणौतेमरणेविचिंतयामि ॥ ८ ॥ सरसिजनयनेसशंखचक्रे । मुरभिदिमाविरमेह चित्तरंतुं ॥ सुखतरमपरंनजातुजाने । हरिचरणस्मरणामृते नतुल्यं ॥ ९ ॥ माभीर्मैदमनोविचिंत्यबहुधायामीश्रियंयाचना । नैवामीप्रभवंविपापरिपवःस्वामीननुश्रीधरः ॥ आलस्यंत्यपनीयभक्तिसुलभंध्यायस्वनारायणं । लोकस्यव्यसनापनोदनकरोदासस्यकिंनक्षमः ॥ १० ॥ भवजलधिगतानांद्वंद्ववाताहतानां । सुतदुहितृकलत्रत्राणभारावृतानां ॥ विषमविषयतोयेमज्जतामप्लवानां । भवतिशरणमेकोविष्णुपोतोनराणां ॥ ११ ॥ रजसिनिपतितानांमोहजालावृतानां । जननमरणदोलादुर्गसंसर्गगानां ॥ शरणमशरणानामेकएवातुराणां । कुशलपथनियुक्तश्चक्रपाणिर्नराणां ॥ १२ ॥ अपराधसहस्रसंकुलं । पतितंभीमभवार्णवोदरे ॥ अगतिंशरणागतंहरे । कृपयाकेवलमात्मसात्कुरु ॥ १३ ॥ मामेवस्त्रीत्वंमाचमेस्यात्कुभावो । मामूर्खत्वंमाकुदेशेषुजन्म ॥ मिथ्यादृष्टिर्मांचमेस्यात्कदाचित् । जातौजातौविष्णुभक्तोभवेयं ॥ १४ ॥ कायेनवाचामनसेंद्रियैश्च । बुद्ध्यात्मनावानुसृतिस्वभावात् ॥ करोमियद्यत्सकलंपरस्मै । नारायणायैवसमर्पयामि ॥ १५ ॥ यत्करोतियत्करिष्यामितत्सर्वंनमयाकृतं । त्वयाकृतंतुफलभुक्त्वमेवमधुसूदन ॥ १६ ॥ भवजलधिमगाधंदुस्तरंनिस्तरेयं । कथमहमितिचेतोमास्मगाःकातरत्वं ॥ सरसिजदृशिदेवेतारकीभक्तिरेका । नरकभिदिनिषण्णातारयिष्यत्यवश्यं ॥ १७ ॥ तृष्णातोयेमदनपवनोद्धूतमोहोर्मिमाले । दारावर्त्तेतनयसहज

ग्राहसंघाकुलेच ॥ संसाराख्येमहतिजलधौमज्जतांनस्त्रिधा
मनू । पादांभोजेवरदभवतोभक्तिभावेमसीद ॥ १८ ॥ पृथ्वी
रेणुरणुःपयांसिकणिकाःफल्गुःस्फुलिंगोलघु । स्तेजोनिः
श्वसनंमरुत्तनुतरंरंध्रंसुसूक्ष्मंनभः ॥ क्षुद्रारुद्रपितामहप्रभृतयः
कीटाःसमस्ताःसुरा । दृष्टेयत्रसतारकोविजयतेश्रीपादधूली
कणः ॥ १९ ॥ आम्नायाभ्यसनान्यरण्यरुदितंकृच्छ्रव्रताभ्य
ग्वहं । मेदच्छेदपदानिपूर्त्तविधयःसर्वेहुतंभस्मनि ॥ तीर्था
नामवगाहनानिचगजस्नानंविनायत्पद । द्वंद्वांभोरुहसंस्तुतिं
विजयतेदेवःसनारायणः ॥ २० ॥ आनंदगोविंदमुकुंदराम ।
नारायणानंतनिरामयेति ॥ वक्तुंसमर्थोपिनवक्तिकश्चि । द
ह्होजनानांव्यसनानिमोक्षे ॥ २१ ॥ क्षीरसागरतरंगशीकरा
सारतारकितचारुमूर्त्तये ॥ भोगिभोगशयनीयशायिने । मा
धवायमधुविद्विषेनमः ॥ २२ ॥ ॥ इतिश्रीकुलशेखरेणराज्ञा
विरचितामुकुंदमालासमाप्ता ॥ २८ ॥

व्रजविहारः

गायंतीनांगोपसीमंतिनीनां । स्फीताकांक्षामक्षिरोलंबमा
लां ॥ निश्चांचल्यामाम्मवक्त्रारविंदे । कुर्वन्नव्यादेवकीनंदनो
वः ॥ १ ॥ सुपर्णस्वर्णाद्रौरचितमणिशृंगोजलधिजा ॥ मुखां
भोजेभृंगोनिगमविलसत्पंजरशुकः ॥ त्रिलोकीकस्तूरीतिल
ककमनीयोव्रजवधू । विहारीश्रीकृष्णोदिशतुभवतांशर्मस
ततं ॥२॥ कस्त्वंबालबलानुजस्त्वमिहकिंमन्मंदिराशंकया ।

बुद्धंतन्नवनीतकुंभविवरेहस्तंकथंम्यस्यसि ॥ कर्तुंतत्रपिपीलिकापनयनंसुमाःकिमुद्बोधिताः । बालावत्सगतिंविवेक्तुमिति संजल्पन्हरिःपातुवः ॥ ३ ॥ जीर्णातरिःसरिदतीवगभीरनीरा । बालावयंसकलमित्थमनर्थहेतुः ॥ निस्तारबीजमिदमेवकृशोदरीणां । यन्माधवस्त्वमसिसंमतिकर्णधारः ॥ ४ ॥ श्रीश्रीकृष्णोजयतिजगतांजन्मदाताचपाता । हर्त्ताचांतेहरतिभजतांयश्चसंसारभीतिं ॥ राधानाथःसजलजलदःश्यामलःपीतवासा । वृंदारण्येविहरतिसदासच्चिदानंदरूपः ॥ ५ ॥ ज्योतीरूपंपरमपुरुषंनिर्गुणंनित्यमेकं । नित्यानंदंनिखिलजगतामीश्वरंविश्वबीजं ॥ गोलोकेशंद्विभुजमुरलीधारिणंराधिकेशं । वंदेवृंदारकहरिहरब्रह्मवंद्यांघ्रिपद्मं ॥ ५ ॥ येषांश्रीमद्यशोदासुतपदकमलेनास्तिभक्तिर्नराणां । येषामाभीरकन्यामियगुणकथनेनानुरक्तारसज्ञा ॥ येषांश्रीकृष्णलीलाललितगुणकथासादरौनैवकर्णौ । धिक्तानूधिक्तानूधिगेतान्कथयतिनितरांकीर्त्तनस्थोमृदंगः ॥ ७ ॥ केचिद्वदंतिधनहीनजनोजघन्यः । केचिद्वदंतिगुणहीनजनोजघन्यः । व्यासोवदत्यखिलवेदविशेषविज्ञो । नारायणस्मरणहीनजनोजघन्यः ॥ ॥ ८ ॥ वृंदावनेवृक्षलतामतानै । वृंदावनेशस्यविहारहेतोः ॥ पुराविधात्रारचितान्सुकुंजान् । जगामकृष्णःसहराधायसः ॥ ९ ॥ नवीनमेघोपमनीलदेहः । सुपीतपट्टांबरयुग्मधारी ॥ स्मितानन:कुंडलवान्किरीटी । वंशीधरोमालतिमाल्यधारी॥ ॥ १०॥ नवीननीलांबुदकांतिमद्वपुः । सस्मेरवक्त्रांबुजवेणुवादनः ॥ अनेकरत्नाभरणैर्विभूषितः । ससुंदरांगोमहसामहो

ज्वलः ॥ ११ ॥ गोपीजनानंदकरोमुरारि । वृंदावनेंद्रोवन मालयशोभी ॥ वंशीनिनादेनव्रजांगनानां । मनांसिसंमोहित वान्सकामी ॥ १२ ॥ नाशायबालकगणान्सहिकंसराजः । तांपूतनांमानुषराक्षसींच ॥ संप्रेषयामासयदातदातां । मा याशिशुःप्राणसमंशुशोष ॥ १३ ॥ जिघांसयासमायांती । पू तनांराक्षसीवरां ॥ क्रोडेकृत्वास्तन्यदात्रीं । जघानबालकोह रिः ॥ १४ गोपीगणोयमिहकामदशाभजंते । यंभक्तिभाज इहकेवलभक्तिभावैः ॥ यंयोगिनोन्हृदिधियापरिचिंतयंति । तंकेवलंकमललोचनमाश्रयेहं ॥ १५ ॥ कृष्णेकारुण्यपूर्णेश शधरवदनेपीतकौशेयवस्त्रे । रत्नालंकारभूषेसजलजलधर श्यामलेसुंदरांगे ॥ वंशीवाद्यप्रमोदेव्रजजनयुवतीजीवनेयाद वेंद्रे । भूयाद्भक्तिर्दृढामेसकलसुरवरैःसेव्यमानेमुरारौ ॥१६॥ वृंदारण्येविहरतिसदावासुदेवोदयालु । गोपश्रीभिःस्मरशर शतैर्भिन्नहृत्कामुकीभिः ॥ गोपैर्बालैरपिसहचरैःसार्द्धमानं दयुक्तै । र्योसौकृष्णःपरमकरुणस्तंसदार्चितयेहं ॥ १७ ॥ वृंदावनस्थानविहारहेतो । राधासमंकुंजगृहप्रवेशं ॥ चकार गोपीजनवल्लभोसौ । पायादपायादपिमांमुरारिः ॥ १८ ॥ वनेवनेकुंजवनेमुरारि ॥ भ्रमन्भ्रमन्भ्राजतिराधिकाच ॥ सहैवकुंजेरमतेचराधया । पायादपायादिहकृष्णएकः ॥१९॥ अनंतविश्वंभरवासुदेव । समस्तदेवैरपिवंद्यपाद ॥ निरा मयप्राणपतेमुरारे । हरेहराशेषमहाघसंघं ॥ २० ॥ ॥

इतिश्रीधरस्वामिनाविरचितं
व्रजविहारकाव्यंसमाप्तं ॥ २९ ॥

Digitized by Google

वेदसारशिवस्तवः

पशूनांपतिंपापनाशंपरेशंगजेंद्रस्यकृत्तिवसानंवरेण्यं ॥ जटाजूटमध्येस्फुरद्गांगवारिं । महादेवमेकंस्मरामिस्मरारिं ॥ ॥ १ ॥ महेशंसुरेशंसुरारातिनाशं । विभुंविश्वनाथंविभूत्यंगभूषं ॥ विरूपाक्षमिंद्वर्कवन्हित्रिनेत्रं । सदानंदमीडेप्रभुंपंचवक्त्रं ॥ २ ॥ गिरीशंगणेशंगलेनीलवर्णं । गवेंद्राधिरूढंगुणातीतरूपं ॥ भवंभास्वरंभस्मनाभूषितांगं । भवानीकलत्रंभजेपंचवक्त्रं ॥ ३ ॥ शिवाकांतशंभोशशांकार्द्धमौले । महेशानशूलिन्जटाजूटधारिन् ॥ त्वमेकोजगद्व्यापकोविश्वरूप । प्रसीदप्रसीदप्रभोपूर्णरूप ॥ ४ ॥ परात्मानमेकंजगद्बीजमाद्यं । निरीहंनिराकारमोंकारवेद्यं ॥ यतोजायतेपाल्यतेयेनविश्वं । तमीशंभजेलीयतेयत्रविश्वं ॥ ५ ॥ नभूमिर्नचापोनवन्हिर्न वायु । र्नचाकाशमास्तेनतंद्रानिद्रा ॥ नग्रीष्मोनशीतंनदेशोनवेषो । नयस्यास्तिमूर्तित्रिमूर्तितमीडे ॥ ६ ॥ अजं शाश्वतंकारणंकारणानां । शिवंकेवलंभासकंभासकानां ॥ तुरीयंतमःपारमाद्यंतहीनं । प्रपद्येपरंपावनंद्वैतहीनं ॥ ७ ॥ नमस्तेनमस्तेविभोविश्वमूर्त्ते । नमस्तेनमस्तेचिदानंदमूर्त्ते ॥ नमस्तेनमस्तेतपोयोगगम्य । नमस्तेनमस्तेश्रुतिज्ञानगम्य॥८॥ प्रभोशूलपाणेविभोविश्वनाथ । महादेवशंभोमहेशत्रिनेत्र शिवाकांतशांतस्मरारेपुरारे । त्वदन्योवरेण्योनमान्योनगण्यः ॥ ९ ॥ शंभोमहेशकरुणामयशूलपाणे । गौरीपतेपशुप

तेपशुपाशनाशिन् ॥ काशीपतेकरुणयाजगदेतदेक । स्त्वं हंसिपासिविदधासिमहेश्वरोसि ॥ १० ॥ त्वत्तोजगद्भवतिदे वभवस्मरारे । त्वय्येवतिष्ठतिजगन्मृडविश्वनाथ ॥त्वय्येवग च्छतिलयंजगदेतदीश । लिंगात्मकेहरचराचरविश्वरूपिन् ॥ ॥ ११ ॥ ॥ इतिश्रीमद्भगवच्छंकराचार्यविरचितंवेदसारशि वस्तोत्रंसंपूर्णं ॥ ३० ॥

महापद्यं.

अस्थिवद्धिवच्चैव । शंखवद्बकवत्तथा ॥ राजन्तव यशोभाति । पुनःसंन्यासिदंतवत् ॥ १ ॥ कालिदासइमंश्लो कं । स्वकविन्वस्यगोपकं ॥ लिखिन्वाममद्दौपत्रं । कवयेशं करायवै ॥ २ ॥ पठित्वाशंकरःश्लोकं । महसनूकौतुकाय तत् ॥ पत्रंकरेसमादाय । सानंदस्त्वरयातदा ॥ ३ ॥ कालि दासेनसहितो । भोजराजसभांययौ ॥ अथदृष्ट्वासराजान । माशिषंप्रजगादह ॥४॥ ॥ राजन्यभ्युदयोस्तुशंकरकवे किंपत्रिकायामिदं । पद्यंकस्यतवैवकीर्त्तिरचनातत्पठ्यतांप ठ्यते ॥ किंन्वासामरविंदसुंदरदशांद्राक्चामरांदोलना । दुद्दे छुद्भुजवल्लिकंकणझणत्कारःक्षणंवार्यतां ॥ १ ॥ महाराज श्रीमनूजगतियशसातेधवलिते । पयःपारावारंपरमपुरुषोयंभृ गयते ॥ कपर्दीकैलासंकरिवरमथोयंकुलिशभृ । त्कलानाथं राहुःकमलभवनोहंसमधुना ॥ २ ॥ नीरक्षीरेगृहीत्वासकल खगपतोन्यातिनालीकजन्मा । तत्रंधुत्वाकराब्जेसकलजल

Digitized by Google

निधीन्चक्रपाणिर्मुकुंदः ॥ सर्वानुत्धृन्यशैलान्दहतिपशुपति र्भालनेत्रेणपश्य । न्यायान्वत्कीर्तिकांतासकलवसुमतींभोज राजक्षितींद्र ॥ ३ ॥ श्रीमद्राजशिखामणेतुलयितुंधातान्व दीयंयशःकैलासश्चनिरीक्ष्यतत्रलघुतांतत्पूर्त्तयेपर्यधात्॥ उक्षा णंतदुपर्युमासहचरंतन्मूर्ध्नगंगाझरं । तस्याग्रेफणिपुंगवंतदु परिस्फारंसुधादीधितीं ॥ ४ ॥ अपायिमुनिनापुरापुनरमायि मर्यादया । अतारिकपिनापुरापुनरदाहिलंकारिणा ॥ अमं थिमुरवैरिणापुनरबंधिलंकारिणा । कनामवसुधापतेतवयशो बुधिःक्कांबुधिः ॥ ५ ॥ स्वस्तिश्रीभोजराजत्रिभुवनविजयी धार्मिकःसत्यवादी । पित्रातेमेगृहीतानवनवतियुतारत्नको टिर्मदीया॥तांत्वंमेदेहिशीघंसकलबुधजनैर्ज्ञायतेसत्यमेत । न्नो वाजानंतिकेचिन्नवकृतमितिचेद्देहिलक्षंततोमे ॥ ६ ॥ मागा मन्युपकारकातरधियावैमुख्यमाकर्ण्यमे । श्रीकर्णाट्वसुंधरा धिपसुधासिक्तानिसूक्तानिमे ॥ वर्ण्यंतेकतिनामनार्णवनदी भूगोलविंध्याट्वी । झंझामारुतचंद्रमःप्रभृतयस्तेभ्यःकिमाभं मया ॥ १७ ॥ ॥ इतिश्रीमहाकविकालिदासकृतंमहापद्य षट्कंसमाप्तं ॥ ३१ ॥

पद्यसंग्रहः

नत्वातांपरमेश्वरींशिवकरींश्रीभारतींभास्वतीं । गंगातीरनिवासिनासुकविनालोकोपकारार्थिना ॥ नानापंडितवक्त्र निर्गतवतांनिर्मीयतेकेनचित् । पद्यानामिहसंग्रहोऽमृतकथाप्र

स्तावविस्तारिणां ॥ १ ॥ काव्येभव्यतमेपिविज्ञनिवहैरास्वा द्यमानेमुहु । दोषान्वेषणमेवमत्सरजुषांनैसर्गिकोदुर्ग्रहः ॥ कासारेपिविकाशिपंकजचयेखेलन्मरालेपुनः । क्रौंचश्चंचुपुटेनकुंचितवपुःसंबूकमन्वेषते ॥ २ ॥ अतिरमणीयेकाव्येपिशुनोदूषणमन्वेषयति ॥ अतिरमणीयेवपुषिव्रणमिवमक्षिकानिकरः ॥ ३ ॥ कीर्त्तिःस्वर्गतरंगिणीभिरभितोवैकुंठमाप्लावितं । क्षोणीनाथतवप्रतापतपनैःसंतापितःक्षीरधिः ॥ इत्येवंदयितायुगेनहरिणात्वंयाचितःस्वाश्रयं । तत्पद्मंहरयेश्रियेस्वभवनंकंठंगिरेदत्तवान् ॥ ४ ॥ रवेःकवेःकिंसमरस्यसारं । रूपेभर्यंकिंकिमदंतिभृंगाः ॥ सदाभयंब्रह्मपदंचकेषां । भागीरथीतीरसमाश्रितानां ॥ ५ ॥ वासःकांचनपिंजरेनृपकरां भोजैस्तनूमार्जनं । भक्ष्यंस्वादुरसालदाडिमफलंपेयंसुधाभंपयः ॥ पाठःसंसदिरामनामसततंधीरस्यकीरस्यमे । हाहाहंततथापिजन्मविटपिक्रोडंमनोधावति ॥ ६ ॥ उदयतियदिभानुःपश्चिमेदिग्विभागे । विकसतियदिपद्मःपर्वतानांशिखाग्रे ॥ प्रचलतियदिमेरुःशीततांयातिवन्हि । र्नचलतिखलुवाक्यंसज्जनानांकदाचित् ॥ ७॥ वरमसिधारातरुतलवासो । वरमिह भिक्षावरमुपवासः ॥ वरमपिघोरेनरकेपतनं । नचधनगर्वितबांधवशरणं ॥ ८ ॥ कुग्रामवासःकुजनस्यसेवा । कुभोजनं क्रोधमुखीचभार्या ॥ मूर्खश्चपुत्रोविधवाचकन्या । विनाग्निनासंदहतेशरीरं ॥ ९ ॥ वरंमौनंकार्यंनचवचनमुक्तंयदनृतं । वरंक्लैब्यंपुंसांनचपरकलत्राभिगमनं ॥ वरंभैक्ष्याशित्वंनचपरधनास्वादनसुखं । वरंप्राणत्यागोनचपिशुनवादेष्वभिरतिः॥

॥ १० ॥ ख्यातःशक्रोभगांगोविधुरपिमलिनोमाधवोगोपजा
तो । वेश्यापुत्रोवसिष्ठःसरुजपदयमःसर्वभक्ष्योहुताशः ॥ व्या
सोमत्स्योदरीयःसलवणउदधिःपांडवाजारजाता । रुद्रःप्रेता
स्थिधारीत्रिभुवनवसतांकस्यदोषोनजातः ॥ ११ ॥ तुरगशत
सहस्रंगोगजानांचलक्षं । कनकरजतपात्रंमेदिनीसागरांतां ॥
विमलकुलवधूनांकोटिकन्याश्चदद्यात् । नहिनहिसममेतैरन्न
दानंप्रधानं ॥ १२ ॥कालिदासकवितानवंवयः । माहिषंदधि
सशर्करंपयः ॥ एणमांसमबलाचकोमला । संभवंतुममजन्मज
न्मनि ॥ १३ ॥ नाक्षराणिपठताकिमपाठि । पाठितोपिकिमु
विस्मृतएव ॥ इत्थमर्थिजनसंशयदोलाः । खेलनांखलुचकार
नकारः ॥ १४ ॥ लक्ष्मणसेनउवाच ॥ शैत्यंनामगुणस्तवैवत
दनुस्वाभाविकीस्वच्छता । किंब्रूमःशुचितांभवंत्यशुचयःस्प
र्शेनयस्याःपरे॥किंचातःपरमंतवस्तुतिपदंत्वंजीवनंदेहिनां ।त्वं
चेन्नीचपथेनगच्छसिपयःकस्त्वांनिरोद्धुंक्षमः ॥१५॥ बल्लाल
उवाच ॥ तापोनापगतस्तृषानचकृशाधौतानधूलीतनो । नं
स्वच्छंदमकारिकंदकवलःकानामकेलीकथा ॥ दूरोल्क्षिप्तक
रेणहंतकरिणास्पृष्टानवापद्मिनी । प्रारब्धोमधुपैरकारणम
होझंकारकोलाहलः ॥ १६ ॥ तत्पुत्रउवाच ॥ परीवादस्त
थ्योभवतिवितथोवापिमहता । मतथ्यस्तथ्योवाहरतिमहिमा
नंजनरवः ॥ तुलोत्तीर्णस्यापिप्रकटितहताशेषतमसो । रवेस्ता
दृकूतेजोनहिभवतिकन्यांगतवतः ॥ १७ ॥ राजोवाच ॥ सु
धांशोर्जातेयंकथामपिकलंकस्यकणिका । विधातुर्दोषोयंनच
गुणनिधेस्तस्यकिमपि ॥ सर्किनात्रेःपुत्रोनकिमुहरचूडार्चनम

णि । र्नवाहंतिध्वांतंजगदुपरिकिंवानवसति ॥ १८ ॥ ॥
॥ इतिश्रीकविभट्टकृतःपद्यसंग्रहःसमाप्तः ॥ ३२ ॥

पांडुरंगाष्टकं

महायोगपीठेतटेभीमरथ्या ॥ वरंपुंडरीकायदातुंमुनींद्रैः॥ समागत्यतिष्ठंतमानंदकंदं ॥ परब्रह्मलिंगंभजेपांडुरंगं ॥ १ ॥ तडिद्वाससन्नीलमेघावभासं ॥ रमामंदिरंसुंदरंचिन्प्रकाशं ॥ वरंन्विष्टिकायांसमन्यस्तपादं । परब्रह्म० ॥ २ ॥ प्रमाणंभवाब्धेरिदंमामकानां । नितंबःकराभ्यांधृतोयेनतस्मात् ॥ विधातुर्वसत्यैधृतोनाभिकोशः । परब्रह्म० ॥ ३ ॥ स्फुरत्कौस्तुभालंकृतंकंठदेशे । श्रियाजुष्टकेयूरकंश्रीनिवासं ॥ शिवंशांतमीड्यंवरंलोकपालं । परब्रह्म० ॥ ४ ॥ शरच्चंद्रबिंबाननंचारुहासं । लसत्कुंडलाक्रांतगंडस्थलांगं ॥ जपारागबिंबाधरंकंजनेत्रं । परब्रह्म० ॥ ५ ॥ किरीटोज्वलत्सर्वदिग्प्रांतभागं । सुरैरर्चितंदिव्यरत्नैरनर्घ्यैः ॥ त्रिभंगाकृतिंबर्हमाल्यावतंसं । परब्रह्म० ॥ ६ ॥ विभुंवेणुनादंचरंतंदुरंतं । स्वयंलीलयागोपवेषंदधानं ॥ गवांवृंदकानंददंचारुहासं । परब्रह्म० ॥ ॥ ७ ॥ अजंरुक्मिणीप्राणसंजीवनंतं । परंधामकैवल्यमेकंतुरीयं ॥ प्रसन्नंप्रपन्नार्तिहंदेवदेवं । परब्रह्म० ॥ ८ ॥ स्तवंपांडुरंगस्यवैपुण्यदंये । पठंत्येकचित्तेनभक्त्याचनित्यं ॥ भवांभोनिधितेपितीर्त्वांतकाले । हरेरालयंशाश्वतंप्रामुवंति ॥ ९॥
॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितंश्रीपांडुरंगाष्टकंसंपूर्णं ॥ ३३ ॥

गोविंदाष्टकं

सत्यंज्ञानमनंतंनित्यमनाकाशंपरमाकाशं । गोष्टप्रांगण रिंगणलोलमनायासंपरमायासं ॥ मायाकल्पितनानाकारम नाकारंभुवनाकारं । क्ष्मामानाथमनाथंश्रमणमतगोविंदंपरमा नंदं ॥ १॥ मृत्स्नामस्सीहेतियशोदाताडनशैशवसंत्रासं । व्या दितवक्त्रालोकिललोकालोकचतुर्दशलोकालं ॥ लोकत्रयपुर मूलस्तंभंलोकालोकमनालोकं । लोकेशंपरमेशंश्रमणमतगोवि दंपरमानंदं ॥ २ ॥ त्रैविष्टपरिपुवीरघ्नंक्षितिभारघ्नंभवरोगघ्नं । कैवल्यंनवनीताहारमनाहारंभुवनाहारं ॥ वैमल्यस्फुटचेतो वृत्तिविशेषाभासमनाभासं । शैवंकेवलशांतंश्रमणमतगोविंदंप रमानंदं ॥ ३ ॥ गोपालंभुलीलाविग्रहगोपालंकुलगोपालं । गोपीखेलनगोवर्द्धनधृतिलीलालालितगोपालं ॥ गोभिर्निग दितगोविंदस्फुटनामानंबहुनामानं । गोधीगोचरदूरंश्रमणमत गोविंदंपरमानंदं ॥ ४ ॥ गोपीमंडलगोष्ठीभेदंभेदावस्थमभेदा भं । शश्वद्गोखुरनिर्धूतोद्धतधूलीधूसरसौभाग्यं ॥ श्रद्धाभक्ति गृहीतानंदमचिन्त्यंचिंतितसद्भावं । चिंतामणिमणिमानंश्रमण मतगोविंदंपरमानंदं ॥ ५ ॥ स्नानव्याकुलयोषिद्वस्त्रमुपादा यागमुपारूढं । व्यादिग्संतिरथंदिग्वस्त्राउपदातुमुपकर्षंते ॥ निर्धूतद्वयशोकविमोहंबुद्धंबुद्धेरंतस्थं । सत्तामात्रशरीरंश्रमण मतगोविंदंपरमानंदं ॥ ६ ॥ कांतंकारणकारणमादिमनादिंका लघनाभासं । कालिंदीगतकालियशिरसिमुहुर्नृत्यंतमुनृत्यं

तं ॥ कालंकालकलातीतंकलिताशेषंकलिदोषघ्नं। कालत्रयग तिहेतुंप्रणमतगोविंदंपरमानंदं ॥७॥ वृंदावनभुविवृंदारकगणवृं दाराधितवंद्येहं। कुंदाभामलमंदस्मेरसुधानंदसुन्ददानंदं ॥वंद्या शेषमहामुनिमानसवंद्यानंदपदद्वंद्वं। वंद्याशेषगुणाब्धिप्रणमत गोविंदंपरमानंदं ॥ ८ ॥ गोविंदाष्टकमेतदधीतेगोविंदार्पित चेतायो। गोविंदाच्युतमाधवविष्णोगोकुलनायककृष्णेति ॥ गोविंदांघ्रिसरोजध्यानसुधाजलधौतसमस्तायो । गोविंदंपर मानंदाघृतमंतस्थंससमभ्येति ॥ ९ ॥ ॥ इतिश्रीमच्छंकरा चार्यविरचितंगोविंदाष्टकंसंपूर्णं ॥ ३४ ॥

श्रुतबोधः

छंदसांलक्षणंयेन । श्रुतमात्रेणबुध्यते ॥ तमहंसंप्रवक्ष्या मि । श्रुतबोधमविस्तरं ॥ १ ॥ संयुक्ताद्यंदीर्घं । सानुस्वारं विसर्गसंमिश्रं ॥ विज्ञेयमक्षरगुरुं । पादांतस्थंविकल्पेन ॥ २॥ आदिमध्यावसानेषु । भजसायांतिगौरवं ॥ यरतालाघवंयां ति । मनौतुगुरुलाघवं ॥ ३ ॥

॥ आर्याछंदः ॥

१२, १८. १२. १५ मात्राः
१ २ ३ ४ पादाः

यस्याःपादेप्रथमे । द्वादशमात्रास्तथातृतीयेपि ॥
अष्टादशद्वितीये । चतुर्थकेपंचदशसार्या ॥ ४ ॥

Digitized by Google

॥ गीतिछंदः ॥

१२, १८, १२, १८ मात्राः
१ २ ३ ४ पादाः

॥ आर्यापूर्वार्द्धसमं । द्वितीयमपियत्रभवतिहंसगते ॥
॥ छंदोविदस्तदानीं । गीतिंतामभृतवाणिभाषंते ॥५॥

॥ उपगीतिछंदः ॥

१२, १५, १२, १५ मात्राः
१ २ ३ ४ पादाः

॥ आर्योत्तरार्द्धतुल्यं । प्रथमार्द्धमपिप्रयुक्तंचेत् ॥
॥ कामिनितामुपगीतिं । प्रकाशयंतेमहाकवयः ॥ ६॥

॥ भगौ ॥ पंक्तिछंदः ॥

भ गण
ऽ । । ऽ ऽ लघु. गुरु.
१ २ ३ ४ ५ संख्या

आद्यचतुर्थं । पंचमकंचेत् ॥ यत्रगुरुःस्या।त्साक्षरपंक्तिः ॥७॥

॥ न्यौ ॥ शशिवदनाछंदः ॥

न य गण
। । । । ऽ ऽ ल.गु.
१ २ ३ ४ ५ ६ संख्या.

॥ अगुरुचतुष्कं । भवतिगुरुद्वौ ॥
॥ घनकुचयुग्मे । शशिवदनासौ ॥ ८ ॥

Digitized by Google

॥ म्सौगः ॥ मदलेखावृत्तं ॥

	म	स	गण.
	ऽ ऽ ऽ	। । ऽ	ऽ ल.गु.
	१ २ ३	४ ५ ६	७ संख्या.

॥ तुर्यपंचमकंचे । यत्रस्याल्लघुबाले ॥
॥ विद्वद्भिर्मृगनेत्रे । मोक्तासामदलेखा ॥ ९ ॥

॥ ग्जौ ॥ श्लोकछंदः ॥

	१.३		२.४	पादाः
	। ऽ ऽ		। ऽ ।	ल.गु.
	५ ६ ७		५ ६ ७	संख्या.

॥ श्लोकेषष्ठंगुरुज्ञेयं । सर्वत्रगुरुपंचमं ॥
॥ द्विचतुष्यादयोर्ह्रस्वं । सप्तमंदीर्घमन्ययोः ॥ १० ॥

॥ भ्नौल्गौ ॥ माणवकाक्रीडछंदः ॥

	भ	त		गण.
	ऽ । ।	ऽ ऽ ।	। ऽ	गु. ल.
	१ २ ३	४ ५ ६	७ ८	संख्या.

॥ आदिगतंतुर्यगतं । पंचमकंचांन्यगतं ॥
॥ स्याद्गुरुचेत्तत्कथितं । माणवकाक्रीडमिदं ॥ ११ ॥

॥ ज्रौल्गौ ॥ नगस्वरूपिणीछंदः

	ज	र		गण.	
	। ऽ ।	ऽ । ऽ	। ऽ	ल.गु.	यति. ५.२.
	१ २ ३	४ ५ ६	७ ८	संख्या.	

Digitized by Google

॥ द्वितुर्यषष्टमष्टमं । गुरुभयोजितंयदा ॥
॥ तदानिवेदयन्तितां । बुधानगस्वरूपिणी ॥ १२॥

॥ मौगौ ॥ विद्युन्मालाछंदः ॥

म	म		गण.
ऽ ऽ ऽ	ऽ ऽ ऽ	ऽ ऽ	ल.गु. यति. ४.४
१ २ ३	४ ५ ६	७ ८	संख्या.

॥ सर्वेवर्णादीर्घायस्यां । विश्रामःस्याद्वेदैर्वेदैः ॥
॥ विद्वद्दृंदैर्वीणावाणी । व्याख्यातासाविद्युन्माला ॥१३॥

॥ भ्मौस्गौ ॥ चंपकमालाछंदः॥

भ	म	स	गण.
ऽ । ।	ऽ ऽ ऽ	। । ऽ	ऽ ल.गु. यति.५.५
१ २ ३	४ ५ ६	७ ८ ९	१० संख्या.

॥ तन्विगुरुस्यादाद्यचतुर्थे । पंचमषष्टंचांत्यमुपांत्यं ॥
॥ इंद्रियबाणैर्यत्रविरामः । साकथनीयाचंपकमाला ॥१४ ॥

॥ भ्मौसः ॥ मणिमध्यछंदः ॥

भ	म	स	गण.
ऽ । ।	ऽ ऽ ऽ	। । ऽ	गु. ल. यति. ५.४.
१ २ ३	४ ५ ६	७ ८ ९	संख्या.

॥ चंपकमालायत्रभवे । दंत्यविहीनाप्रेमनिधे ॥
॥ छंदसिदक्षायेकवय । स्तन्मणिमध्यंतेब्रुवते ॥ १५ ॥

Digitized by Google

म्भौन्तौत्गौगः ॥ मंदाक्रांताछंदः ॥

	म		भ		न		त		त	
ऽ	ऽ	ऽ	ऽ	।	।	।	।	ऽ	ऽ	।	ऽ	ऽ	।	ऽ	ऽ
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७

यति४.६.७

। चत्वारःभाक्सुतनुगुरवोद्वादशैकादशौचेन् ।
॥ मुग्धेवर्णौतदनुकुसुमामोदिनिद्वादशांत्यौ ॥
। तद्वच्चांत्यौयुगरसहयैर्यत्रकांतेविरामो ।
॥ मंदाक्रांतांम्बरकवयस्तन्वितांसंगिरंते ॥ १६ ॥

॥ म्भौन्गौ ॥ हंसीछंदः ॥

	म		भ		न		गण.	
ऽ	ऽ	ऽ	ऽ	।	।	।	।	ऽ	गु.ल. यति.४.६
१	२	३	४	५	६	७	८	९	१० संख्या

॥ मंदाक्रांतांन्ययतिरहिता । सालंकारेभवतियदिसा ॥
॥ तद्विद्विर्घ्रुवमभिहिता । ज्ञेयाहंसीकमलवदने ॥ १७ ॥

॥ म्तौत्गौगः ॥ शालिनीछंदः ॥

	म		त		त		गण.	
ऽ	ऽ	ऽ	ऽ	ऽ	।	ऽ	ऽ	।	ऽ	ऽ	गु.ल. यति.४.७.
१	२	३	४	५	६	७	८	९	१०	११	संख्या

॥ ऱ्हस्वोवर्णोजायतेयत्रषष्ठः । कंबुग्रीवेतद्वदेवाष्टमांत्यः ॥
॥विश्रामंस्यात्तन्विवेदैस्तुरंगै।स्तांभाषंतेशालिनीछांदसीया १८

Digitized by Google

॥ भौभ्गौगः ॥ दोधकछंदः ॥

भ	भ	भ	गण.
ऽ । ।	ऽ । ।	ऽ । ।	ऽ ऽ लगु. यति.५.६.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ संख्या

॥ आद्यचतुर्थमहीननितंबे । सप्तमकंदशमंचतथांत्यं ॥
॥ यत्रगुरुप्रकटस्मरसारे । तत्कथितंननुदोधकमेतत् ॥ १९॥

॥ तौज्गौगः ॥ इंद्रवज्राछंदः॥

त	त	ज	गण
ऽ ऽ ।	ऽ ऽ ।	। ऽ ।	ऽ ऽ ल.गु. यति.५.६.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ संख्या

॥ यस्यांत्रिषट्सप्तममक्षरंस्या । द्धृस्वंसुजंघेनवमंचतद्वत् ॥
॥ गत्यावलज्जीकृतहंसकांते।तामींद्रवज्राब्रुवतेमुनींद्राः॥२०॥

॥ ज्तौज्गौः ॥ उपेंद्रवज्राछंद ॥

ज	त	ज	गण
। ऽ ।	ऽ ऽ ।	। ऽ ।	ऽ ऽ ल.ग. यति.५६.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ संख्या

॥यदींद्रवज्राचरणेषुपूर्वे । भवंतिवर्णालघवःसुवर्णे॥
अमंदमाद्यन्मदनेतदानी । मुपेंद्रवज्राकथितानरेंद्रैः ॥ २१ ॥

॥ तौज्गौगः / ॥ ज्तौज्गौगः ॥ उपजातिछंदः ॥

त	त	ज	गण
ऽ ऽ ।	ऽ ऽ ।	। ऽ ।	ऽ ऽ ल.गु १.३ पादौ
१ २ ३	४ ५ ६	७ ८ ९	१० ११ संख्या यति.५.६

Digitized by Google

ज , त , ज , गण. २.४ पादौ
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ ल.गु. यति५.६
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ संख्या

॥ यत्रद्वयोरप्यनयोस्तुपादा । भवंतिसीमंतिनिचंद्रकांते ॥
॥ विद्वद्भिराद्यैःपरिकीर्तितासा।मयुज्यतामित्युपजातिरेषा॥२२

॥ तौज्गौगः
॥ ज्तौज्गौगः ॥ आख्यानकीछंदः ॥

त , त , ज , गण
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ ल.गु. १ पादः
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ संख्या यति.५.६.

ज , त , ज , गण
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ ल.गु. २३४पादाः
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ यति५.६

॥आख्यानकीस्यान्मकटीकृतार्थै । यदींद्रवज्राचरणःपुरस्तात्
॥उपेंद्रवज्राचरणास्त्रयोन्ये। मनीषिणोक्ताविपरीतपूर्वा॥२३॥

॥ नौलौगः॥ रथोद्धताछंदः ॥

र , न , र , गण
ऽ । ऽ । । । ऽ । ऽ । ऽ ल.गु.यति.७.४.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ संख्या

॥ आद्यमक्षरमतस्तृतीयकं । सप्तमंचनवमंतथांतिमं ॥
दीर्घमींदुमुखियत्रजायते । तांवदंतिकवयोरथोद्धतां ॥ २४ ॥

Digitized by Google

॥ नौभ्गौगः ॥ स्वागतछंद ॥

र	न	भ	गण
ऽ । ऽ	। । ।	ऽ । ।	ऽ ऽ ल.गु.यति.७.४.
१ २ ३	४ ५ ६	७ ८ ९	१०११ संख्या

॥ अक्षरंचनवमंदशमंचे । द्व्यन्ययाद्भवतियत्रविनीते ॥
॥प्राक्तमेणनयनेयदिसैव।स्वागतेतिकविभिःकथितासौ॥२५॥

ज्सौज्सौ ॥ जलोद्धतगतिछंदः ॥

ज	स	ज	स	गण
। ऽ ।	। । ऽ	। ऽ ।	। । ऽ	ल.गु.यति.८.४.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या

। यदाभृतलतेक्षरंयममितं ।
॥ रसंवसुमितंततोविरतिजं ॥
। भवेद्रुरुतदामहाकविवरैः ।
॥ मियेनिगदिताजलोद्धतगतिः ॥ २६ ॥

॥ मौयौ ॥ वैश्वदेवीछंदः ॥

म	म	य	य	गण
ऽ ऽ ऽ	ऽ ऽ ऽ	। ऽ ऽ	। ऽ ऽ	ल.गु.यति.५.७
१ २ ३	४ ५ ६	७ ८ ९	१०११ १२	संख्या

। ऱ्हस्वोवर्णस्यान्सप्तमोयत्रबाले ।
॥ तद्वद्विवोष्टिन्यस्तएकादशाब्दः ॥
। बाणैविश्रामोनंतरस्यात्तुरंगै ।
॥ र्नाम्नानिर्दिष्टासुभ्रुसावैश्वदेवी ॥ २७ ॥

Digitized by Google

॥ सौसौ ॥ तोटकछंद ॥

स	स	स	स	गण
।।ऽ	।।ऽ	।।ऽ	।।ऽ	ल.गु.यति ६.६
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.

। सतृतीयकषष्टमनंतरते ।
॥ नवमंविरतिप्रभवंगुरुचेत् ॥
। घनपीनपयोधरभारभृते ।
॥ तनुतोटकवृत्तमिदंकथितं ॥ २८ ॥

॥ स्जौसौ ॥ प्रमिताक्षरछंदः ॥

स	ज	स	स	गण.
।।ऽ	।ऽ।	।।ऽ	।।ऽ	ल.गु.यति.६.६.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.

। यदितोटकस्यगुरुपंचमकं ।
॥ विहितंविलासिनितदक्षरकं ॥
। रससंख्यकंगुरुनचेदबले ।
॥ प्रमिताक्षरेतिकविभिःकथिता ॥ २९ ॥

॥ यौयौ ॥ भुजंगप्रयातछंदः ॥

य	य	य	य	गण.
।ऽऽ	।ऽऽ	।ऽऽ	।ऽऽ	ल.गु. यति. ६.६.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.

। यदाद्यंचतुर्थंतथासप्तमंचेत् ।

Digitized by Google

॥ तथैवाक्षरंचेद्ध्रस्वमेकादशाद्यं ॥
। शरच्चंद्रविद्वेषिवक्त्रारविंदे ।
॥ तदुक्तंकवींद्रैर्भुजंगप्रयातं ॥ ३० ॥

॥ न्भौभ्भौ ॥ द्रुतविलंबितछंदः ॥

न	भ	भ	र	गण.	
।।।	ऽ।।	ऽ।।	ऽ।ऽ	ल.गु.	यति.७.५
१२३	४५६	७८९	१०११	१२ संख्या.	

। अयिकुशोदरियत्रचतुर्थकं ।
॥ गुरुससप्तमकंदशमंतथा ॥
। विरतिजंचतथैवविचक्षणे ।
॥ द्रुतविलंबितमित्युपदिश्यते ॥ ३१ ॥

॥ सौस्लौगः ॥ न्भौभ्भौ ॥ हरिणिप्लुताछंदः ॥

स	स	स		गण.	
।।ऽ	।ऽ।	।ऽ।	ऽ	ल.गु.	१-३ पादौ
१२३	४५६	७८९	१०११	संख्या.	.यति.६.५

न	भ	भ	र	गण.	
।।।	ऽ।।	ऽ।।	ऽ।ऽ	ल.गु.	२-४पादौ
१२३	४५६	७८९	१०११	१२ संख्या.	य०७.५.

। प्रथमाक्षरमाद्यतृतीययो ।
॥ द्रुतविलंबितकस्यचपादयोः ॥
। अपिचेन्नतदाकमलेक्षणे ।
॥ भवतिसुंदरिसाहरिणिप्लुता ॥ ३२ ॥

Digitized by Google

॥ सौसौ ॥ तोटकछंद ॥

स	स	स	स	गण
।।ऽ	।।ऽ	।।ऽ	।।ऽ	ल.गु.यति ६.६
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.

। सतृतीयकषष्टमनंतरते ।
॥ नवमंविरतिप्रभवंगुरुचेत् ॥
। घनपीनपयोधरभारभृते ।
॥ तनुतोटकवृत्तमिदंकथितं ॥ २८ ॥

॥ स्जौसौ ॥ प्रमिताक्षरछंदः ॥

स	ज	स	स	गण.
।।ऽ	।ऽ।	।।ऽ	।।ऽ	ल.गु.यति.६.६.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.

। यदितोटकस्यगुरुपंचमकं ।
॥ विहितंविलासिनितदक्षरकं ॥
। रससंख्यकंगुरुनचेदबले ।
॥ प्रमिताक्षरेतिकविभिःकथिता ॥ २९ ॥

॥ यौयौ ॥ भुजंगप्रयातछंदः ॥

य	य	य	य	गण.
।ऽऽ	।ऽ ऽ	।ऽ ऽ	।ऽऽ	ल.गु. यति. ६.६.
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.

। यदाद्यंचतुर्थंतथासप्तमंचेत् ।

Digitized by Google

॥ तथैवाक्षरंह्रस्वमेकादशाद्यं ॥
। शरच्चंद्रविद्वेषिवक्त्रारविंदे ।
॥ तदुक्तंकवींद्रैर्भुजंगप्रयातं ॥ ३० ॥

॥ न्भौभ्रौ ॥ द्रुतविलंबितछंदः ॥

न	भ	भ	र	गण.	
। । ।ऽ	। । ऽ	। । ऽ	। ऽ	ल. गु.	यति.७.५
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.	

। अयिकुशोदरियत्रचतुर्थकं ।
॥ गुरुससप्तमकंदशमंतथा ॥
। विरतिजंचतथैवविचक्षणे ।
॥ द्रुतविलंबितमित्युपदिश्यते ॥ ३१ ॥

॥ सौस्लौगः ॥ न्भौभ्रौ ॥ हरिणिप्लुताछंदः ॥

स	स	स		गण.	
। ।ऽ।	। ऽ ।	। ऽ ।	ऽ	ल.गु.	१-३ पादौ
१ २ ३	४ ५ ६	७ ८ ९	१० ११	संख्या.	.यति.६.५

न	भ	भ	र	गण.	
। । ।ऽ	। । ऽ	। । ऽ	। ऽ	ल.गु.	२-४पादौ
१ २ ३	४ ५ ६	७ ८ ९	१० ११ १२	संख्या.	य०७.५.

। प्रथमाक्षरमाद्यतृतीययो ।
॥ द्रुतविलंबितकस्यचपादयोः ॥
। अपिचेन्नतदाकमलेक्षणे ।
॥ भवतिसुंदरिसाहरिणिप्लुता ॥ ३२ ॥

Digitized by Google

॥ जतौज्जौ ॥ वंशस्थछंदः ॥

ज , त , ज , र , गण.
। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ ल.गु. यति.८.४.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ संख्या.

। उपेंद्रवज्राचरणेषुसंतिचे ।
॥ द्रुपांत्यवर्णालघवःकृतायदा ॥
। मदोल्लसद्भृंगजितपुष्पकार्मुके ।
॥ वदंतिवंशस्थमिदंबुधास्तदा ॥ ३३ ॥

॥ तौज्जौ ॥ इंदुवंशाछंदः ॥

त , त , ज , र , गण.
ऽ ऽ । ऽ ऽ । । ऽ । ऽ । ऽ ल.गु. यति. ८.४.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ संख्या.

। यस्यामशोकांकुरपाणिपल्लवे ।
॥ वंशस्थपादागुरुपूर्ववर्णकाः ॥
। तारुण्यहेलारतिरंगलालसे ।
॥ तामिंदुवंशांकवयःप्रचक्षते ॥ ३४ ॥

॥ जतौज्जौ॥तौज्जौ॥रामणीयकछंदः॥

ज , त , ज , र गण
। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ ल.गु.१.३.पादौ.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ संख्या. यति.६.६.

Digitized by Google

त	त	ज	र	गण.
ऽ ऽ । ऽ ऽ । । ऽ । ऽ । ऽ				ल.गु. २.४.पादौ.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२				संख्या. यति.५.७.

। यदाह्यिवंशस्थशरीषवंशयो ।
॥ पादाभवेयुर्ननुपीवरस्तने ॥
। मृगेंद्रमध्येविबुधैर्निगद्यते ।
॥ चामीकराभिखलुरामणीयकं ॥ ३५ ॥

॥ त्भौस्जौगः ॥ प्रभावतीछंदः

त	भ	स	ज	गण.
ऽ ऽ । ऽ । । । । ऽ । ऽ । ऽ				ल.गु. यति. ४.९
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३				संख्या.

। यस्यांप्रियेप्रथमकमक्षरद्वयं ।
॥ तुर्यंतथागुरुनवमंदशांतिमं ॥
। सांत्यंभवेद्यतिरपिचेद्युगैर्यैहैः ।
॥ सालक्षितामृतलतेमभावती ॥ ३६ ॥

॥ म्नौज्नौगः ॥ प्रहर्षणीछंदः ॥

म	न	ज	र	गण.
ऽ ऽ ऽ । । । । ऽ । ऽ । ऽ				ल.गु.यति.३.१०.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३				संख्या.

। आद्यंचेत्त्रितयमथाष्टमंनवांत्यं ।
॥ द्वावंत्यौगुरुविरतौसुभाषितेस्यात् ॥
। विश्रामोभवतिमहेशनेत्रदिग्भि ।
॥ र्विज्ञेयाननुसुभगेमहर्षणीसा ॥ ३७ ॥

Digitized by Google

॥ जौज्रौ ॥ वंशस्थछंदः ॥

ज	त	ज	र	गण.
।ऽ।	ऽऽ।	।ऽ।	ऽ।	ऽ ल.गु. यति.८.४.
१	२ ३ ४	५ ६	७ ८	९ १०११ १२ संख्या.

। उपेंद्रवज्राचरणेषुसंतिचे ।
॥ दुपांत्यवर्णालघवःकृतायदा ॥
। मदोल्लसभ्रूजितपुष्पकार्मुके ।
॥ वदंतिवंशस्थमिदंबुधास्तदा ॥ ३३ ॥

॥ तौज्रौ ॥ इंदुवंशाछंदः ॥

त	त	ज	र	गण.
ऽऽ।	ऽऽ।	।ऽ।	ऽ।	ऽ ल.गु. यति. ८.४.
१	२ ३	४ ५	६ ७	८ ९ १०११ १२ संख्या.

। यस्यामशोकांकुरपाणिपल्लवे ।
॥ वंशस्थपादागुरुपूर्ववर्णकाः ॥
। तारुण्यहेलारतिरंगलालसे ।
॥ तामिंदुवंशांकवयःप्रचक्षते ॥ ३४ ॥

॥ जौज्रौ ॥ तौज्रौ ॥ रामणीयकछंदः ॥

ज	त	ज	र	गण
।ऽ।	ऽऽ।	।ऽ।	ऽ।	ऽ ल.गु.१.३.पादौ.
१	२ ३ ४	५ ६	७ ८	९ १० ११ १२ संख्या. यति.६.६.

Digitized by Google

त	त	ज	र	गण.
ऽ ऽ । ऽ ऽ । । ऽ । ऽ । ऽ				ल.गु. २.४.पादौ.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२				संख्या. यति.५.७.

। यदाह्यिवंशस्थशरीषवंशयो ।
॥ पादाभवेयुर्ननुपीवरस्तने ॥
। मृगेंद्रमध्येविबुधैर्निगद्यते ।
॥ चामीकराभिखलुरामणीयकं ॥ ३५ ॥

॥ भौरज्जौगः ॥ प्रभावतीछंदः

त	भ	स	ज	गण.
ऽ ऽ । ऽ । । । । ऽ । ऽ । ऽ				ल.गु. यति. ४.९
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३				संख्या.

। यस्यांप्रियेप्रथमकमक्षरद्वयं ।
॥ तुर्यंतथागुरुनवमंदशांतिमं ॥
। सांग्यंभवेद्यतिरपिचेद्युगैर्यहैः ।
॥ सालक्षितामृतलतेमभावती ॥ ३६ ॥

॥ म्नौज्जौगः ॥ प्रहर्षणीछंदः ॥

म	न	ज	र	गण.
ऽ ऽ ऽ । । । । ऽ । ऽ । ऽ ऽ				ल.गु.यति.३.१०.
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३				संख्या.

। आद्यंचेत्त्रितयमथाष्टमंनवांत्यं ।
॥ द्वावंत्यौगुरुविरतौसुभाषितेस्यात् ॥
। विश्रामोभवतिमहेशनेत्रदिग्भि ।
॥ विज्ञेयाननुसुभगेमहर्षणीसा ॥ ३७ ॥

Digitized by Google

॥ म्तौय्सौगः ॥ मत्तमयूरछंदः ॥

म	त	य	स	गण.
ऽ ऽ ऽ	ऽ ऽ ।	। ऽ ऽ	। । ऽ	ऽ ऽ .यति.४.९.
१ २ ३	४ ५ ६	७ ८ ९	१०११ १२ १३	संख्या.

। यत्रस्नेहेरक्तमनस्केकिलपूर्वे ।
॥ दीर्घावर्णाःपंचतथाचाष्टमएतत् ॥
। तस्मादंत्योद्वादशचांत्यौश्रुतिरंभै ।
॥ विश्रामस्यात्तत्कथितंमत्तमयूरं ॥ ३८ ॥

॥ त्भौजौगौ ॥ वसंततिलकाछंदः ॥

त	भ	ज	ज	गण.
ऽ ऽ ।	ऽ । ।	। ऽ ।	। ऽ ऽ	ल.गु.यति.८.६.
१ २ ३	४ ५ ६	७ ८ ९	१०११ १२ १३ १४	संख्या.

। आद्यंद्वितीयमपिचेद्गुरुतच्चतुर्थं ।
॥ यत्राष्टमंचदशमांत्यमुपांत्यमंत्यं ॥
। कामांकुशाकुशितकाममतंगजेंद्रे ।
॥ कांतेवसंततिलकांकिलतांवदंति ॥ ३९ ॥

॥ नौम्यौयः॥मालिनीछंदः॥

न	न	म	य	य	गण.
। । ।	। । ।	ऽ ऽ ऽ	। ऽ ऽ	। ऽ ऽ	ल.गु.यति.८.७
१ २ ३	४ ५ ६	७ ८ ९	१०११ १२ १३	१४ १५	संख्या.

। प्रथममगुरुषड्वि्धतेयत्रकांते ।
॥ तदनुचदशमंचेदक्षरंद्वादशांत्यं ॥

Digitized by Google

। गिरिभिरथतुरंगैर्यत्रकांतेविरामो ।
॥ सुकविजनमनोज्ञामालिनीसाभसिद्धा ॥ ४० ॥

॥ न्स्माःस्ल्गाः ॥ हरिणीछंदः ॥

न	स	म	र	स
।।।	।।ऽ	ऽऽऽ	ऽ।ऽ	।।ऽ
१२३	४५६	७८९	१०११	१२१३१४

।ऽ	ऽ
१५	१६१७

यति.५.४.८

। सुमुखिलघवःपंचमाच्यास्ततोदशमांतिकं ।
॥ स्तदनुललितालापेवर्णौमियेत्रिचतुर्दशौ ॥
। भवतिपुनर्यत्रोपांत्यस्फुरत्करकंकणे ।
॥ यतिरपिरसैर्वेदैरश्वैःस्मृताहरिणीतुसा ॥ ४१ ॥

॥ म्स्माःस्ल्गाः ॥ शिखरिणीछंदः ॥

य	म	न	स	भ
।ऽऽ	ऽऽऽ	।।।	।ऽऽ	।।ऽ
१२३	४५६	७८९	१०११	१२१३१४

।ऽ	ऽ
१५	१६१७

यति६.६.५.

। यदाभाच्योद्दस्वःकलितकमलेषष्ठकपरा ।
॥ स्ततोवर्णाःपंचमकृतिसुकुमारांगिरचिता ॥
। त्रयोन्येचोपांत्याःसुतनुजघनाभोगसुभगे ।
॥ रसैरोशैर्यस्याभवतिविरतिःसाशिखरिणी ॥ ४२ ॥

Digitized by Google

॥ उज्जाःस्यौल्गौ ॥ पृथ्वीछंदः ॥

ज , स , ज , स , य ,
। ऽ । । । ऽ । ऽ । । । ऽ । ऽ । ऽ
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७

यति.८.६.३.

। द्वितीयमलिकुंतलेयदिषडष्टमंद्वादशं ।
॥ चतुर्दशमथप्रियेगुरुगभीरनाभिन्हृदे ॥
। सपंचदशमांतिकंतदनुयत्रकांतेयति ।
॥ गिरींद्रफणिभृत्कुलैर्भवतिसुभ्रुपृथ्वीतिसा ॥४३॥

॥ न्जौभ्जौज्लौग् ॥ त्रुटकछंदः ॥

न , ज , भ , ज , ज ,
। । । । ऽ । ऽ । । । ऽ । । ऽ । । ऽ
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७

यति.७ ४.६

। यदिमुकुलेक्षणेक्षरमिदंगुरुपंचमकं ।
॥ तदनुशिवेवलोकनगुणेयदिसप्तमकं ॥
। त्रिपुररिपौचतुर्दशयुगेगुरुताकथिता ।
॥ वदपुनरंतिकेसुमुखितत्कथितंत्रुटकं ॥ ४४ ॥

॥ म्सौज्सौतौग् ॥ शार्दूलविक्रीडितछंदः ॥

म , स , ज , स , त , त ,
ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ ऽ । ऽ ऽ । ऽ
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

यति.८.४.७.

Digitized by Google

। आद्यश्चेद्गुरवस्त्रयःसियतमेषष्ठस्ताथाचाष्टमो ।
॥ नन्वेकादशतस्त्रयस्तदनुचेदष्टादशाद्यौततः ॥
। मार्त्तैर्मुनिमिश्चयत्रविरतिःपूर्णेंदुबिंबानने ।
॥ तद्वृत्तंप्रवदंतिकाव्यरसिकाशार्दूलविक्रीडितं ॥ ४५ ॥

॥ म्रौभ्रौयौयः ॥ स्रग्धराछंदः ॥

म । र । भ । न । य । य । य
ऽ ऽ ऽ । ऽ ऽ । । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ
१ २३ ४५६ ७८ ९१० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१
यति ७.७.७.

। चत्वारोयत्रवर्णाःप्रथममलघवःषष्ठकःसप्तमोपि।
॥ द्वौतावत्षोडशाद्यौष्वगमदमुदितेषोडशांत्यौतथांत्यौ ॥
। रंभास्तंभोरुकांतेमुनिमुनिमुनिभिर्यत्रकांतेविरामो ।
॥बालेवंद्यैःकवींद्रैःसुतनुनिगदितास्रग्धरासाप्तसिद्धा ॥ ४६ ॥

॥ गणनामदेवफलानि ॥

। मोभूमिःश्रियमातनोतियजलंवृद्धिरचाग्निमृति ।
॥ सोवायुःपरदेशदूरगमनंतव्योमशून्यंफलं ॥
। जःसूर्योरुजमाददातिविपुलंभेंदुर्यशोनिर्मलं ।
॥ नोनाकश्चसुखप्रदःफलमिदंमाहुर्गणानांबुधाः ॥ ४७ ॥

॥ सूत्रेणगणेनलघो । र्दीर्घस्ययथाक्रमेणसंमिश्रा ॥
॥ संख्यांकैर्यत्यंकै । र्पविनासांकेतिकीकृताटीका ॥४८॥

Digitized by Google

॥ अथगणसंख्यानामरूपदेवफलज्ञापकयंत्रं ॥

	गणनाम	रूपं	देवता	फलं	मित्रादि	फलं
१	मगण	ऽ ऽ ऽ	मही	लक्ष्मी	मित्रं	शुभं
२	नगण	। । ।	स्वर्गे	बुद्धिः	मित्रं	शुभं
३	भगण	ऽ । ।	शशी	यशः	दासः	शुभं
४	यगण	। ऽ ऽ	जलं	आयुः	दासः	शुभं
५	जगण	। ऽ ।	रविः	रुजं	उदासः	अशुभं
६	रगण	ऽ । ऽ	अग्निः	दाहः	शत्रुः	अशुभं
७	सगण	। । ऽ	वायुः	विदेशः	शत्रुः	अशुभं
८	तगण	ऽ ऽ ।	नभः	शून्यं	उदासः	अशुभं

॥इतिश्रीमहाकविकालिदासकृतश्रुतबोधः हीराचंदकानजी कृतसांकेतिकीटीकासहितः समाप्तः ॥ ३५ ॥

दुर्घटकाव्यं.

वीशेङ्कूधक्रिपुस्वर्वित्वदरिपरकोऽहःसृगृक्षेडजाड्दाःगाग्यस्वीड्गोवृडेकद्विजरुरुपरयाजांगजोऽघोघहाभीः॥ वाताद्धारोविषप्साःकलसदजसरिस्सस्वदःकंधिजादो । भादोनारारसंघावनतपदकरुट्सोऽव्यकाद्वोहरिद्वः ॥ १ ॥ वाश्वारेड्ध्वजधग्धूतोड्वधिपतिःकुभेड्जजानिर्गणेड् । गोराडारुडुरस्सरेडुरतरयैवेयकभ्राडरं ॥ उड्डीट्रुरुक्रकरकास्थिधृक्त्रिदृगिभेडाद्रींजिनेछश्चयः । सस्तादंबुमदंबुदालिगलरुक्देवोमुदेवोमृडः

Digitized by Google

॥ २ ॥ योऽयोमाडिनगोहरीडुडुपगोयुग्मकगधोपभी । भीम भ्वर्य्यसुकीरमारतरणेनाभ्यब्रुडासीनकः ॥द्योषच्चम्ववनम्यप न्सलिलजोवार्द्विस्वपोऽष्टार्धदो । राद्योगद्यसिवाडघारदमृतदः पायान्सवःकंदभा ॥ ३ ॥ खागीछासिपलेहपापडवडीक्षारो डभाजीगुणे। यद्भक्तोनिमिषीचबाकुलचणाःध्यायंतियेयोगि नः ॥ कालाभीलकरालभूषलमहादैन्यैंद्रमाथार्थिनी । सासा सूरयसातवाघदतयेस्तान्कर्णमोठीचिरं ॥ ४ ॥ लक्ष्मीवन्क तकूरसूरणदहिन्दूधकूक्षमःपापडी । लाडूढोकलघीवडांछन वडीखाजांबुदालीरुचीः ॥ मङ्गाशाकरखंडनोविविभुनाक्षी रावसातुल्यमां । सासूहालितडिन्निभागवसनोव्यान्सेवकंसा रवान् ॥ ५ ॥ गोश्रावःकिमयंगवाश्रयगतेकिंसुभुगांवीक्षसे। गोमध्येचरणेनकिंलिखसिगांगोस्त्रीनिभेदेहिगां ॥ गावोयां तिगृहेषुवासरमणेर्गावश्चदूरंगताः । गावस्त्वद्विरहेममासुहर णाएरेहियामोवयं ॥ ६ ॥ ॥ इतिश्रीमहाकविकालिदास कृतदुर्घटकाव्यंसमाप्तः ॥ ३६ ॥

विद्वद्विनोदकाव्यं.

श्रीगुरुंचप्रणम्यादौ । हेरंबंपवनात्मजं ॥ तत्कृपामतिसं पन्नंकुर्वेविद्वद्विनोदकं ॥ १ ॥ कश्चिद्वनंबहुवनंविचरन्वय स्थो । वश्यांवनात्मवदनांवनितांवनार्द्रां ॥ तर्वर्यरिप्रदमुदी क्ष्यसमुत्थिवंखे । नागामिमांमदकलःसकलांबभाषे ॥२ ॥ प श्याब्जदग्गिरितेषुकुमातृसाव्हा । न्भूदेवराजरिपुशत्रुसमा वधूतान् ॥ वैश्वानरारिजरिपुघ्नशराभिभूतै । र्दृक्श्रोत्रशत्रु

भिरुपासितपुष्पशोभान् ॥ ३ ॥ पश्याद्रिसारसदृशीभिरमू
भिरद्रि । राश्लावयन्यमरगुप्तधरणीमहिघ्नः ॥ अब्दःसिताभि
रसितःशबलःखगाभि । वार्ज्जैसितैरिवविभातिवनंप्रबुद्धैः
॥ ४ ॥ गोष्टंघृतंसुघृतवद्भिरमीभिरभ्यं । गोभिःसमुद्धरतिय
द्वहुधाहिमग्नः ॥ तद्वव्यमंबरगतंशिखिजात्मसंस्थं । विस्पंदमा
नमभिवर्द्धयतीयगोजान् ॥ ५ ॥ अब्रुट्पलाशनिभदग्धमजा
स्मवक्त्रा । वार्वस्वरेननिभगागजदोःसमोरु ॥ सीरध्वजप्रस
वतुल्यविषाण्हदासौ । व्रासंगतामप्रमुदितामसमीक्षवार्द्दम् ॥ ६॥
सूर्यांशुनामपतिरुन्नतदृग्गामी । वाकूनामभिःपरिवृतोविष
नामदाभिः ॥ उस्रावरःप्रमुदितःप्रतिनानदीति । गर्ज्जतमीक्षण
हितोच्चयतुल्यरूपं ॥ ७ ॥ एनंपयोदपतिरुन्नमितंप्रयोद । ख
स्थंमहीतलगतःप्रतिगर्ज्जतीव ॥ भिन्वावनींवनरुहाक्षिशिरोरु
हाभ्यां । संप्रस्थितोमृतधरैरभिषिच्यमानः ॥ ८॥ स्रोतोजवि
क्षतजभूधरधातुरूपाः । खस्थापयोजदलदृक्शुचिशुक्लमांसे॥
मासेनभस्यनभसोरतिसंपतंतः । तीव्रेविषंविषधराःपरिनिर्व
पंति ॥ ९ ॥ स्वयोनिभक्षध्वजसंभवानां । श्रुत्वानिनादंगि
रिगव्हरस्थः तमोरिबिंबप्रतिबिंबधारी । विरौतिकांतेपवना
शनाशः ॥ १० ॥ गोष्टश्वकुंकुमवपुःप्रतिराजतेसौ । सप्ताद्रि
दैन्यभुजगोतमशत्रुगोपः ॥ उर्वीधराभमविरोन्थितमंबरंखे ।
दृष्ट्वाहिहाप्रमुदितोहिमहाव्हयानः ॥ ११ ॥ कृष्णोंबरःक्षरति
तोयमसावजस्रं । मन्याविमौरणगताविववेभराजौ ॥ अन्ये
त्वमीद्विरदवृंदनिभाःक्षरंतः । मच्छादयन्यमरसिद्धविमानमा
र्गं ॥ १२ ॥ वार्द्धाखगाःक्षितिधरागमनप्रकाशा । नेमीभिरा

शभतुरंगमतुल्यघोषाः ॥ वाग्वीरिताखमवतप्रवनंक्षरंतो । वार्भिःक्षितंघृतधराःपरिनिर्वपंति ॥ १३ ॥ एषोंघ्रिपाशनरिपु घ्नसुतारिसाह्व । मारुह्यलिष्ठतिसुगात्रिभुजंगमारिः ॥ यस्य स्वनैःप्रमुदितस्यममाद्यबाले । तालध्वजावरजसूनुशराःपतंति ॥ १४ ॥ जस्राविषंस्थलगतोऽत्तितथैववाभ्यों । वार्जोद्विजःस्वपितृभीरुविषप्रहीणः ॥ वाताशनःखशयनःस्मरतिस्थलस्य । चक्षुःश्रवावनभयात्सुरशत्रुनामा ॥ १५ ॥ पक्ष्यश्व मेघतुरगप्रतिमोष्टवर्णो । वाद्दैनवच्छितिसमाह्वयतह्यहिघ्नः ॥ भेकस्तथैवखशयाशयतेद्यवाणिः । शब्दंकरोत्यतिमृशंविष राशिमग्नः ॥ १६ ॥ नाविष्करावणमुपेत्यकुमातृसाह्व । मा क्रीडतेमधुकलोंगनयासमेतः ॥ अन्यःस्वयंमणिवराभमुपेत्य गोजं । नारामयासहपयःपतिजांवृणीते ॥ १७ ॥ सूतंमहत्क्ष तजवर्णनिभंवरोसौ । बीभर्त्यमूनिचभिनत्तिसरोरुहाणि ॥ तज्ञेनचापिरजसावनितांवयस्थो । ष्यभ्युद्धरत्यविकिरत्यभि षिच्यमानः ॥ १८ ॥ पंकेनिमग्नमिभवृंदमदःसवारि । गर्जं तिमिक्षयदवृंदमिवावभाति ॥ वार्यात्मनामशतचित्रतनुःसुप र्णो । योषिद्धृतःसमदनःप्रतिरोरवीति ॥ १९ ॥ विस्फोटितां बररवेणरिरंसुरेव । संत्रासितोहरिरनोकहनिष्कुटीषु ॥ संलो यतेतडितमाभिमुखींचदृष्ट्वा । खात्संमहत्तरमसौसमनुप्रविष्टः ॥ ॥ २० ॥ एतावदुत्तमवचःसुमनाःसउक्ता । रंभादिनंसहतया प्रियया प्यदीनः ॥ युक्तंचतुर्भिरनडुद्भिरदीनवद्भि । रारुह्य यानमथसंप्रययौस्वगेहं ॥ २१ ॥ ॥ इतिमहाकविकालि दासविरचितंविद्वद्विनोदकाव्यंसमाप्तं ॥ ३७ ॥

Digitized by Google

॥ इतिश्रीकाव्यकलापेसमाप्तिंशद् ॥

॥ ग्रंथात्मकःप्रथमोंऽकः ॥

॥ समाप्तः ॥

Digitized by Google

Digitized by Google

જાહેરખબર.

નીચે લખેલા ગ્રંથ મુંબઈ મધ્યે બાહારકોટમાં મંબાદેવીની ચોફ્રીપાસે ગૌડશ્રીધરજીના જ્ઞાનસાગર છાપખાનામાંથી, તથા સુતારચાલીસામે મહાદેવ મોરેશ્વર પાઠકને ત્યાંહાંથી તથા પાંજરાપોળપાસે કુંભારવાડીમાં નાના ગોવિંદ જોશીના બીજા નંબરના ઘરમાં મારા મકાનમાંથી, તથા રાજકોટમાં ત્યાંહાની કન્યાશાળાના મહેતાજી ત્રિભુવન વાલજીને ત્યાંહાંથી, તથા જુનાગઢમાંથી ત્યાંહાંની જ્ઞાનગ્રાહક સભાના સેક્રેટરી આત્મ સુંદરજી વિષ્ણુ ખેરજી પાસેથી જે સાહેબોને જોઈતા હોય તેઓએ રોકડાં નાણાં મોકલી મંગાવી લેવા.

૧ જ્ઞાનમંજરી નામમાળા તથા અનેકાર્થમંજરી નામમાળા, વ્રજભાષામાં, મહાકવિ નંદદાસજીકૃત.

જહારા રચેલા ગ્રંથના નામ.

	રૂ૦	આ૦	પા૦
૧ ગાયનશતક ભાગ પહેલો.....	૦	— ૯	— ૦
૧ ગાયનશતક ભાગ બીજો.....	૦	— ૧૦	— ૦
૧ કુમારિકાબોધ	૦	— ૪	— ૦
૧ કુમારબોધ	૦	— ૨	— ૦

૧ પિંગળાદર્શ.
૧ નામાર્થ બોધ.
૧ ગુજરાતી અનેકાર્થ કોશ.
૧ સુધેરલ શાસ્ત્ર.
૧ ગુજરાતની ગાંડાઈ.

એ ગ્રંથ છપાવા માંડ્યાછે.

કવિ હીરાચંદ કાનજી.

Digitized by Google

KÁVYAKALÁPA.

Number Third.

Published by

HARIDAS HIRACHAND,

——oo——

काव्यकलापः

अंकस्तृतीयः

तत्र

विदग्धमुखमंडनंकाव्यंसटीकं

हरिदास वि॰हीराचंदेनाविद्वत्तः

शोधयित्वा

प्रथमावृत्तिः

मुंबय्यांवृत्तदीपमुद्रायंत्रेअंकीकृतः

संवत् १९२१ शाके १७८७

(Registered under Act XX. of 1847.)

BOMBAY:

PRINTED AT THE "VRUTTADEEP PRESS."

1865.

Digitized by Google

Mauvette Bernault

Digitized by Google

KÁVYAKALÁPA.

No. 3

CONTAINING.

VIDAGDHA MUKHA MANDANA,

OR

THE ORNAMENT OF THE MOUTH OF LEARNED

WITH NOTES AND EXPLANATIONS IN SANSKRIT.

——oo——

Published by

HARIDAS HIRACHAND,

BOMBAY:

PRINTED AT THE "VRUTTADEEP PRESS."

(Registered under Act XX. of 1847.)

1865.

PRICE RUPEES ONE.

Digitized by Google

HARVARD COLLEGE LIBRARY
CHARLES ROCKWELL LANMAN
MARCH 15, 1941

काव्यकलापः

अंकस्तृतीयः

तत्र

विदग्धमुखमंडनंकाव्यं

वा

पंडितजनानांमुखानामलंकारं

सटिकं

हरिदास वि० हीराचंदेन विद्वत्तः

शोधयित्वा

मुंबय्यां

नृत्नदीपमुद्रायंत्रे

अंकीकृतं

संवत् १९२१ शाके १७८७

सन १८४७ स्य विंशतिम आक्टानुसारेण रेजिष्टरःकृत

मुल्यंरौप्यैकं

Digitized by Google

To,

Javerilal Umayashanker Esq.,

Late Duxina-fellow, E. College, Bombay,
Member of the Bombay Branch of
the Royal Asiatic Society :

&c. &c.

THIS WORK

Is Dedicated,

With feelings of esteem and gratitude for his heart felt interest in the revival of Sanskrit Literature and his liberality in patronizing Sanskrit Authors and publishers ;

By his most obedient servant,

THE PUBLISHER.

Digitized by Google

सकळगुणगणालंकृत

राज्यश्री झवेरीलाल उमयाशंकर

मुंबइ पाठशाळाना माजी दक्षणा

फेलो, मुंबइनी रायल एशियाटिक

सोसाइटीनी शाखाना

सभासद,

एमनी

संस्कृत ग्रंथो उपर प्रीति तथा आवा

ग्रंथो प्रगट थवानी उत्कंठा पूर्वक

उदारता

जोइनेएमने

आ ग्रंथ प्रसिद्ध कर्तायें

नम्रता तथा आदर

सहित अर्पण

कर्यो छे.

Digitized by Google

PREFACE.

In the first number of this *Kavyakalapa*, (collection of Poems) are published 37 poems of ancient famous poets, such as Kàlidàsa &c.; in the second is published a poem in veneration of the Goddess *Laxmi*, named *Laxmisahasra*, made by *Venkatadhvari Acharya*, author of Vishvagunàdarsha and Hastigirichampù; and in this third number I have published *Vidagdha múkha mandana* made by a *Jain* follower named *Dhurmadása*.

The work contains different systems of adoring and tastifying poetry. It is very scarce, and I had been able to procure only one copy of a text with commentary, after much exertions.

I hope the readers will correct the errors and defects occured, owing to the manuscript being only one, as well as the press is newly established.

The fourth number of all works with commentary, has been sent to the press, and will come out in about two months.

In the fifth number will be admitted best poems like those published in the first number, and in the sixth will be introduced small *stotras* or Hymns of *Shri Shankaracharya* &c. relating to *Vedanta*.

H. H.

Digitized by Google

॥ प्रस्तावना. ॥

आ काव्यकलाप नामक ग्रंथना पहेला अंकमां कालिदासादिक कविकृत २७ काव्य छपावी प्रकट करीछे, बीजा अंकमां वेंकटाध्वर्याचार्यकृत लक्ष्मीसहस्रस्तोत्र छपावीप्रकट कर्युछे, अने आ त्रीजा अंकमां विदग्धमुखमंडन नामक ग्रंथसटीक छपावी प्रकट कर्योछे. ते विदग्ध जे पंडित,तेनामुखना मंडन अेटले घराणारूप आ ग्रंथछे. तेमां जे चित्रकाव्य केहेवायछे, तेना घणा चमत्कारिक अने कठण एवा भेदछे, ते जो मोटे होय, ने ते वखते विद्वानोनी सभामां कांइ श्लोको बोलाइने तेनी व्याख्या थाय, तो ते शांभळीनें विद्वानो वाह वाह करे एमां संदेह नथी. एटलावास्ते आ ग्रंथनुं नाम एवुं धरायुंछे

आ ग्रंथनो कर्त्ता धर्मदास एवे नामें बौद्ध धर्मी हतो ने तेनी टीकाना कर्त्तानुं नाम आमां नथी ने केटलाक एम के छेजे ए ग्रंथकारेज टीका करेलीछे

ते टीका छे तो थोडी पण तेणे चतुराइ एवी करीछे के, तेनो पदार्थ समझायाथी संघळो अर्थ खुली जायछे. ते सटीक पुस्तकनी प्रत मनें एकज मळी आवी हती, नें बीजी प्रतन मळ्यायी कांइक चूक रही आवीछे, अनें बीजुं आ छापखानुनवुं तेथी पण कांइंक चूको थइछे, ते पंडित जनोये क्षमा करवी.

हवे चोथो अंक छापखानामां आप्योछे, तेमां गीतगोविंद, रसमंजरी, राधाविनोद, वाग्भट्टालंकारभामिनीविलासादिक १० क ग्रंथ बधाय सटीक छपाइ प्रकट थाशे. अनें पांचमो अंक छापवा आप्योछे, तेमां पण पहेला अंकना जेवी केटलीक सुंदर काव्योछपाशे. अनें छठो अंक छपाववोछे तेमांश्रीशंकराचार्यादिकृत अध्यात्मस्तोत्रो नानां नानां प्रकट थाशे

Digitized by Google

अनुक्रमणिका

नाम	पृष्ठ
प्रथमपरिच्छेदः	
व्यस्तजातिः	३
द्विर्व्यस्तजातिः	४
व्यस्तसमस्तजातिः	५
द्विर्व्यस्तसमस्तजातिः	६
द्विःसमस्तकव्यस्तजातिः	७
एकालापकजातिः	८
प्रभिन्नक	
शब्दार्थलिंगप्रभिन्नकः	९
शब्दार्थविभक्तिभिन्न	१०
शब्दार्थवचनभिन्न	१०
शब्दार्थलिंगविभक्तिवचनभिन्न	११
शब्दार्थलिंगवचनभिन्न	११
शब्दार्थविभक्तिवचनाभिन्न	१२
शब्दार्थलिंगवचनाभिन्न	१२
प्रकारांतरेणप्रभिन्नकजातिः	१३
द्वितीयपरिच्छेदः	
भेद्यभेदकजातिः	१४
ओजस्व्यजातिः	१४
रूपकंसालंकारजातिः	१५
सकौतुकजातिः	१६
प्रश्नोत्तरसमजातिः	१७
पृष्टप्रश्नजातिः	१७
भग्नोत्तरजातिः	१८
आद्युत्तरजातिः	१९
मध्योत्तरजातिः	१९
अंत्योत्तरजातिः	२०
कथितापन्हुतिजातिः	२०
विषमजातिः	२०
वृत्तनामजातिः	२२
नामाख्यातजातिः	२३
तार्क्यजातिः	२८
सौत्रजातिः	२९
शाब्दीयजातिः	२९
शास्त्रजजातिः	३०
वर्णोत्तरजातिः	३१
वाक्योत्तरजातिः	३१
तृतीयःपरिच्छेदः	
चित्रजातिः	
श्लोकोत्तरजातिः	३२
खंडोत्तरजातिः	३४
पादोत्तरजातिः	३६
चक्रजातिः	३७

Digitized by Google

पद्मोत्तरजातिः ३८
काकपदजातिः ३९
गोमूत्रजातिः ४०
सर्वतोभद्रजातिः ४१
गतप्रत्यागतजातिः... ... ४२
वर्धमानाक्षरजातिः ४४
हीयमानाक्षरजातिः ४६
शृंखलाजातिः ४८
एकांतरितशृंखलाजातिः ...४९
नागपाशजातिः ... .५०
संस्कृतप्राकृतजातिः... ... ५१
संस्कृतापभ्रंशजातिः ५२
संस्कृतमागधिकं ५३
संस्कृतपैशाचिकं ५३
संस्कृतलौकिकं ५४

संशुद्धजातिः

शुद्धप्राकृतं ५५
शुद्धापभ्रंशं ५६
शुद्धमागधिकं ५७
शुद्धपैशाचिकं ५८
शुद्धलौकिकं ५९

चतुर्थपरिच्छेदः

प्रहेलिकाजातिः
आर्थीजातिः ६०
शाब्दीजातिः ६१
कालसारजातिः ६३
कालसरादिदृद्यजातिः... ... ६४
अजमारादिगूढजातिः
पादगूढजातिः ६७
अर्थगूढजातिः ६७
स्तुतिनिंदाजातिः ६८
द्व्यर्थजातिः ६८
अपन्हुतिजातिः ६९
बिंदुमज्जातिः ६९
क्रियागुप्तजातिः ७०

कारकगुप्तजातिः

कर्तृगुप्तं ७१
कर्मगुप्तं ७१
करणगुप्तं ७१
संप्रदानगुप्तं ७२
अपादानगुप्तं ७२
अधिकरणगुप्तं ७२
संबंधगुप्तजातिः ७२
आमंत्रितगुप्तजातिः ७३
समासगुप्तजातिः ७३
लिंगगुप्तजातिः ७३
सुब्वचनगुप्तं ७४
तिङ्वचनगुप्तं ७४
मात्राच्युतकजातिः ७४
बिंदुच्युतकजातिः ७५
विसर्गच्युतकजातिः... .... ७५
अक्षरच्युतकजातिः ७५
स्थानच्युतकजातिः ७६
व्यंजनच्युतकजातिः ७६
च्युतदत्ताक्षरजातिः... .. ..७७

॥ समाप्तोऽयमनुक्रमणिका ॥

Digitized by Google

॥ श्री ॥

परमात्मनेनमः

काव्यकलापः

अंक स्तृतीयः

तत्र

विदग्धमुखमंडनं सटीकंकाठ्यं,

॥ सिद्धौषधानिभवदुःखमहागदानां ॥
॥ पुण्यात्मनांपरमकर्णरसायनानि ॥
॥ प्रक्षालनैकसलिलानिमनोमलानां ॥
॥ शौद्धोदनेःप्रवचनानिचिरंजयंति ॥ १ ॥
॥ जयंतिसंतःसुकृतैकभाजनं ॥
॥ परार्थसंपादनसद्व्रतस्थिताः ॥
॥करस्थनीरोपमविश्वदर्शिना ॥
॥ जयंतिवैदग्ध्यभुवःकवेर्गिरः ॥ २ ॥
॥ आक्रांतेवमहोपलेनमुनिनाशप्तेवदुर्वाससा ॥
॥ सातत्यंबतमुद्रितेवजतुनानीतेवमूर्छाविषैः ॥
॥ बद्धेवातनुरज्जुभिःपरगुणान्वक्तुंनशक्ताऽसती ॥
॥ जिव्हालोहशलाकयाखलमुखेविद्धेवसंलक्ष्यते ॥ ३ ॥
॥ इहानेकेसत्यंसततमुपकारिण्युपकृतिं ॥
॥ कृतज्ञाःकुर्वंतोजगतिनिवसंत्येवसुधियः ॥

Digitized by Google

॥ कियंतस्तेसंतःसुकृतपरिपाकप्रणयिनो ॥
॥ विनास्वार्थंयेषांभवतिपरकृत्यव्यसनिता॥४॥
॥ एषोंजलिःसममसज्जनसज्जनैौ तौ ॥
॥ वंदेनितांतकुटिलप्रगुणस्वभावौ ॥
॥ एकंभियाऽभिनवसंहितवैरिभावं ॥
॥ प्रीत्यापरंपरमनिर्वृतिपात्रभूतं ॥५॥
॥ किंमेऽथवाहतखलप्रणताविहस्यात् ॥
॥ सस्वीकरोतुसुजनोयदिमांगुणज्ञः॥
॥ चंद्रेणचारुचरितेनविकाशितंयत् ॥
॥ संकोचितंभवतिकिंकुमुदंतमोभिः ॥ ६ ॥
॥ प्रीत्यैसतांतदनुभावगतावसादः ॥
॥ संत्यज्यगूढरचनांप्रतिभानुरूपं ॥
॥ क्षिप्रावबोधकरणक्षममीक्षितार्थं ॥
॥ वक्ष्येविदग्धमुखमंडनमप्रपंचं ॥ ७ ॥
॥ यद्यस्तिसभामध्ये। स्थातुंवक्तुंमनस्तदासुधियः ॥
॥ तांबूलमिवगृहीत्वा। विदग्धमुखमंडनंविशत ॥ ८ ॥
॥ प्राहुर्व्यस्तंसमस्तंच। द्विर्व्यस्तंद्विःसमस्तकं॥
॥ तथाव्यस्तसमस्तंच। द्विर्व्यस्तकसमस्तकं ॥९॥
॥ सद्विःसमस्तकव्यस्त। मेकालापंप्रभिन्नकं ॥ ।
॥ भेद्यभेदकमोजस्वि। सालंकारंसकौतुकं ॥१०॥
॥ प्रश्नोत्तरसमंपृष्ट। प्रश्नंभग्नोत्तरंतथा॥
॥ आदिमध्योत्तराख्येद्वे। अंत्योत्तरमतःपरं ॥ ११ ॥

Digitized by Google

॥ कथितापन्हुतिंचैव । विषमंवृत्तनामकं ॥
॥ नामाख्यातंचतार्क्ष्यंच । सौत्रंशाब्दीयशास्त्रजे ॥ १२ ॥
॥ वर्णवाक्योत्तरेतद्वत् । श्लोकोत्तरमतःपरं ॥
॥ खंडपादोत्तरेचक्रं । पद्मंकाकपदंतथा ॥ १३ ॥
॥ गोमूत्रींसर्वतोभद्रं । गतप्रत्यागतंबहु ॥
॥ वर्द्धमानाक्षरंतद्वद्धीयमानाक्षरंतथा ॥ १४ ॥
॥ शृंखलांनागपाशंच । चित्रंसंशुद्धमेवच ॥
॥ प्रहेलिकांतथाद्यंच । कालसारादिवर्णितं ॥ १५ ॥
॥ अजमारादिकंगूढं । पदपादार्थगूढकं ॥
॥ स्तुतिनिंदांतथाद्यर्थं । सहापन्हुतिबिंदुमत् ॥ १६
॥ क्रियाकारकसंबंध । गुप्तान्यामंत्रितस्यच ॥
॥ गुप्तंतथासमासस्य । लिंगस्यवचनस्यच ॥ १७ ॥
॥ मात्राबिंदुविसर्गाणां । च्युतकान्यक्षरस्यच ॥
॥ स्थानव्यंजनयोश्चापि । च्युतदत्ताक्षरंतथा ॥ १८ ॥

॥ इत्युद्देशकं ॥

॥ पृष्टंपदविभागेन । केवलेनैवयद्भवेत् ॥
॥ विदुर्व्यस्तंसमस्तंय । त्संमुदायेनपृच्छति ॥ १९ ॥
॥ पृथक् पृच्छते तत् व्यस्तंपृष्टं ॥
॥ पूजायांकिंपदंप्रोक्तमस्तनंकोबिभर्त्युरः ॥
॥ कआयुधतयाख्यातः । प्रलंबासुरविद्विषः ॥ २० ॥
॥ सुनासीरः ॥ इतिव्यस्तसमस्तजातिः ॥
॥ सुःपूजयां ॥ नापुरुषः ॥ सीरोहलं ॥

Digitized by Google

॥ कोदुराढ्यस्यमोहाय । काप्रियासुरविद्विषः ॥
॥ पदंप्रश्नवितर्कोकिं । कोदंतच्छदभूषणं ॥ २१ ॥

॥ रामानुरागः । इतिव्यस्तजातिः ॥

॥ राःधनं मालक्ष्मीः ॥ नुइति वितर्के ॥ रागःआरक्तत्वं ॥

॥ अपिसेविताद्विजिव्हैःकदापिकेनयांतिविकारं ॥
॥ विच्छिद्यमानतनवःस्वगुणैरधिकंविराजंते ॥ २२ ॥

॥ मलयतरवः ॥

॥ समुदायेन पृच्छ्यते तत्समस्तंपृष्टं ॥ मलयतरवश्चंदनवृक्षाः ॥
॥ अनिभृतकोकिलनिःस्वनमुखरितसहकारकाननःपुंसां ॥
॥ कोहरतितरांत्तदयंमधुकरझंकारिकंकेलिः २३ ॥

॥ मधुसमयः ॥ इतिसमस्तजातिः ॥

॥ मधोर्वसंतस्यसमयःकालः ॥

॥ व्यस्तंसमस्तमथवा । समासपदभंगतः ॥
॥द्विःपृष्ठंयत्तदेवस्या । द्विर्व्यस्तंद्विःसमस्तकं ॥ २४ ॥

॥ द्विवारं पृथक्पृच्छ्यते तद्विव्यस्तपृष्टं ॥ २४ ॥

॥ वर्षासुकाभवतिनिर्मधुकदृगब्जं ॥
॥ शेषंबिभर्त्तिवसुधासहितंकएकः ॥
॥आमंत्रयस्वधरणीधरराजपुत्रीं ॥
कोवाऽस्तिभस्मानिचितांगजनाश्रयःस्यात् ॥ २५ ॥

॥ कालिकापालिकमठः ॥

॥ कालिकाश्यामता ॥ अपगताअलयोभ्रमराःयस्मात्तदपालि ॥
॥ भ्रमररहितं ॥ केपानीयेमठःस्थानंयस्यसःकमठःकच्छपः ॥

Digitized by Google

॥ हेकालिहेपार्वति ॥ कपालैर्नरमुंडैर्विराजतेकापालि ॥
॥ कोयोगी ॥ तस्यमठःप्रसिद्धः ॥

॥ कीदृशंवदमरुस्थलंमतं । द्वारिकुत्रसतिभूषणंभवेत् ॥
॥ ब्रूहिकांतसुभटःसकार्मुकः । कीदृशोभवतिकुत्रविद्विषां ॥२६॥

॥ अवारितोरणे ॥ इतिद्विर्व्यस्तजातिः ॥

॥ नविद्यतेवारिजलंयस्मिन् तत्अवारि ॥ तोरणेसति ॥ बहिर्द्वारंतु ॥
॥ तोरणं ॥ रणेसंग्रामेअवारितः ॥ नवारयितुंशक्यतइत्यवारितः ॥

॥ पक्षिश्रेष्ठसखीबभ्रू । सुरावाच्याःकथंवद ॥
॥ ज्येष्टेमासिगताःशोषं ॥ कीदृशोऽल्पजलाभुवः ॥ २७ ॥

॥ विवरालीनकुलीराः ॥

। द्विवारंसमुदायेनपृच्छ्यतेतत्द्विःसमस्तंकेपृष्ठे । विवरालीनकुलीराः ।
। विःपक्षी । वरंश्रेष्ठं । आलीसखी । नकुलीनकुलस्त्री । इरामदिरा ।
। विवरेषुछिद्रेषुआलीनाःप्रविष्टाः । कुलीराःजलचरजीवविशेषाःयासुताः

॥ विश्वंभराप्रलंबघ्न ॥ व्रीहिमानुषसंयुताः ॥॥
॥ कथंवाच्याःभवंत्येता ॥ दिनांतेविकसंतिकाः ॥ २८ ॥

॥ कुवलयवनराजयः ॥

। कुवलयवनराजयः । कुःपृथ्वी । वलोबलभद्रः । वयेरैवयेय
। वोधान्यभेदः । नरोमनुष्यः । आजिःसंग्रामः । कुवलयानांकमला
। नांवनानांराजयःपंक्तयः

॥ पृष्टंपदविभागेन ॥समुदायेनयद्भवेत् ॥
॥ विदुर्व्यस्तसमस्तंतदुभयार्थप्रदर्शकं ॥ २९ ॥

॥ व्यस्तंचतत्समस्तंचव्यस्तसमस्तंपृष्टं ॥

॥ काप्रियेणरहितावरांगना ॥ धाम्निकेनतनयेननंदिता ॥
॥ कीदृशेनपुरुषेणपक्षिणां ॥ बंधनंसमभिलष्यतेसदा ॥ ३० ॥

॥ शकुंतलाभरतेन ॥

। शकुंतलानाम्नीऋषेःपुत्रीभरतनाम्नापुत्रेणनंदिताइत्यर्थः । शकुंतानां ।
। पक्षिणांलाभोद्देश्यापाशंनंतत्ररतआसक्तस्तेनशकुंतलाभरतेनव्याधेनेत्यर्थः

॥ कीदृशंत्वदयहारिकूजितं ॥
॥ कःसरवायशसिभूपतेर्मतः
॥ कस्तवास्तिविपिनेभयाकुलः ॥
॥ कीदृशश्चनभवेन्निशाकरः ॥ ३१ ॥
॥ कलंकविरहितःइतिव्यस्तसमस्तजातिः ॥

। कलंमधुरःशब्दः । कविः । राज्ञांकाव्यादिग्रंथरचनाकृत् । अहितःशत्रुः ।
कलंकेनमृगरूपाभिज्ञानेनविरहितः । नस्यादितिभावार्थः ।

॥ द्विर्व्यस्तमेवयत्पृष्टं ॥ समुदायेनयद्भवेत् ॥
॥ त्रिधाभिन्नंतदेवोक्तं ॥ द्विर्व्यस्तकसमस्तकं ॥ ३२ ॥

। द्विवारंव्यस्तीकृत्यपश्चात्समुदायेनपृच्छ्यतेतत्द्विर्व्यस्तकसमस्तकंपृष्टं ।

॥ कौशंकरस्यवलयावपयोधरःकः ॥
॥ कीदृक्परस्यनियतंवशमेतिभूपः ॥
॥ संबोधयोरगपतेर्विजयीचकीदृग् ॥
॥ दुर्योधनोनहिभवेद्वदकीदृशश्च ॥ ३३ ॥
॥ अहीनाक्षतनयः ॥

Digitized by Google

अहिःसर्पः । नागुमान् । क्षतनयःक्षतःखंडितोनयोन्यायोयेनसः । अन्यायवान् हेअहीन । अहीनांसर्पाणामिनस्वामिन् तत्संबोधनं । अक्षतनयः । नक्षतोनयोन्यायोयेनसःअखंडन्यायवान् । हीनेअक्षिणीयस्यासौहीनाक्षोअंधस्तस्यतनयःपुत्रः । नहीनाक्षतनयोअहीनाक्षतनयः । धृतराष्ट्रोहिहीनाक्षोऽधइतिशब्दार्णवकारः । तत्पुत्रोदुर्योधनोऽहीनाक्षतनयोनभवातीकिंतु । अंधपुत्रइत्यर्थः ।

॥ कोमोहायदुरीश्वरस्यविदितःसंबोधनीयोगुरुः ॥
॥ कोधात्र्यांविरलःकलोनवघनःकिंवन्नकीदृग्द्विजः ॥
॥ किंलेखावचनंभवेदातिशयंदुःखायकीदृक्खलः ॥
॥ कोविघ्नाधिपतिर्मनोभवसमोमूर्त्योपुमान्कीदृशः ॥३४
॥ राजीविसन्निभवदनः ॥ इतिद्विर्व्यस्तसमस्तजातिः ॥

राःद्रव्यं हेजीवहेगुरो॥ सन्सज्जनः । इभवत्हस्तिवत् । नाविद्यतेअःरुग्णोऽस्मीत्यितिअनः । ब्राह्मणोहिरुग्णरहितःकदाचिन्नस्यादित्यर्थः । राजीपंक्तिःवसन्निवासंकुर्वन् । इभवदनः इभवत्हस्तितुल्यंवदनंमुखंयस्यासौ । गणेशइत्यर्थः । राजीवेनकमलेनसन्निभंसदृशंवदनं । मुखंयस्यासौराजीवसन्निभवदनः ॥

॥ द्विःसमस्तंयदापृष्टं ॥ व्यस्तकेनपुनर्भवेत् ॥
॥ तत्द्विःसमस्तकव्यस्तं ॥ कथितंप्रश्नपंडितैः ॥ ३५ ॥

द्विवारंसमुदायेनदृष्ट्वापुनर्व्यस्तकेनपृच्छ्यतेतत्द्विःसमस्तकव्यस्तंपृष्टं ॥

॥ कीदृक्षोसकलजनोभवेत्सुराज्ञः ॥
॥ कःकालोविदितइहांधकारहेतुः ॥
॥ कःप्रेयान्कुमुदवनस्यकोनिहंति ॥
॥ भ्रातृव्यंवदशिरसाजितस्त्वयाकः ॥ ३६ ॥

Digitized by Google

॥ विधुरविरहितः ॥

विधुरविरहितः विधुरेणकष्टेनविरहितःसुखीत्यर्थः विधुश्चरविश्चेविधु रवीचद्रादित्यौ ताभ्यांरहितः विधुश्चंद्रः अविः ऊर्णायुः अहितःशत्रुः ॥

॥ संग्रामेस्फुरदसिनात्वयाजिताःके (हतास्त्वयाके) ॥

॥ केदुःखंवतनिरयेनरस्यकुर्युः ॥

॥ कस्मिन्नुद्भवतिकदापिनैवलोभः ॥

॥ ज्ञाताःकेजगतिमहालघुत्वभाजः ॥ ३७ ॥

॥ नरकरेणवःइतिद्विःसमस्तकव्यस्तजातिः ॥

॥ नरकरेणवः ॥ नराश्चकरेणवश्चमनुष्यहस्तिनः नरकस्यरेणवोधूल्यः अग्निरूपाः वालुकाइत्यर्थः नरकरेपुरुषाणांहस्ततले अणवः परमाणवः

॥ एकश्रुत्यावचोयत्रभिन्नार्थप्रतिपादकं ॥

॥ प्रभेदंद्विःसमस्तस्यात्तमेकालापकंविदुः ॥ ३८ ॥

द्विःसमस्तस्यप्रभेदंएकालापकंपृष्ठं ॥

॥ कीदृशीनिरयभूरनेकधा ॥

॥ सेव्यतेपरमपापकर्मभिः ॥

॥ प्रेतराक्षसपिशाचसेविता ॥

॥ कीदृशीचपितृकाननस्थली ॥ ३९ ॥

॥ नरकपालरचिता ॥

नरकपालरचिता नरकाणांपालाः नारकजीवरक्षकाःयमास्तैः रचिता उपस्कृता नराणांकपालानिकर्पराणितैःकृतारचिता इपशानभूमिस्तुम तुष्याणांमुंडैःसाहिताभवति ॥

॥ केसरद्रुमतलेपुसंस्थितः ॥

॥ कीदृशोभवतिमत्तकुंजरः ॥

Digitized by Google

॥ तत्वतःशिवमपेक्ष्यलक्षणै

॥ र्जुनःसमितिकीदृशोभवेत् ॥ ४० ॥

॥ दानवकुलभ्रमरहितः ॥ इत्येकालापकजातिः ॥

दानवकुलभ्रमरहितः दानेनमदेनवकुलानांवृक्षाणांभ्रमरेभ्यःसकाशात्हित हितकृदित्यर्थः ॥ दानवानांदैत्यानांकुलेयोभ्रमोदानवाअमीयुध्यंतीतिमिथ्या ज्ञानंतेनरहितः ॥

॥ शब्दार्थलिंगवचनैर्व्यस्तैर्यद्वासमस्तकैः ॥

॥ विभक्त्याचप्रभिन्नयत्तत्प्रभिन्नकमुच्यते ॥ ४१ ॥

शब्दार्थौलिंगेनवचनेनविभक्त्याचभेदंप्राप्तौयास्मिन्तत्प्रभिन्नकंपृष्टं ॥

॥ निर्जितसकलारातिःपृच्छति ।

॥ कोनेकोमृत्योर्भयमृच्छतिमेघात्ययकृताचिराशायाः

किंतिमिरक्षयकारिनिशायाः ॥ ४२ ॥

॥ विधुतारातेजः ॥

॥ हेविधुताराते विधुताःकंपिताः अरातयःशत्रवोयेनसः तत्संबोधनं अजः ब्रह्माकृष्णः शंभुरपिच विधुश्चंद्रः ताराः नक्षत्राणितासांतेजः प्रकाशः ॥

॥ विहगपतिःकंहत्वानाहेतं कीदृग्भवातिपुरंजनमाहेतं ॥

॥ किंकठिनंविदितंवदधीमन् ।

। यादःपतिरपिकीदृग्भयकृत् ४३ ॥

॥ अहिमकरमयः ॥ इतिशब्दार्थलिंगप्रभिन्नकं ॥

॥ अहिंसर्पं अकरं नास्तिकरोराजदंडोयस्मिन्नतत् अयोलोहं अहिमकरमयः अहयःसर्पाः मकराःमत्स्यविशेषास्तन्मयः ॥

Digitized by Google

॥ अनुकूलविधायिदैवतो विजयीस्याननुकीदशोनृपः ॥
॥ विरहिण्यपिजानकीवने निवसंतीमुदमादधौकुतः॥४४

॥ कुशलवार्द्धितः ॥

कुशलवार्द्धितः ॥ कुशलैःशुभसूचकशकुनैर्वर्द्धितोवर्द्धापितः कुशश्चलवश्च कुशलवौनामानौपुत्रौतयोर्ऋद्धिः संपत्तस्मात् ॥

॥ कुसुमंपतदैत्यनाकतो वदकस्मैस्पृहयंतिभोगिनः
॥ अधिगम्यरतंवरांगना क्वनुयत्नंकुरुतेसुशिक्षिता ॥ ४५

॥ सुरतरवे इतिशब्दार्थविभक्तिभिन्नं ॥

॥ सुरतरवे कल्पवृक्षायवांछंति सुरतस्यसंभोगस्यरवःशब्दस्तस्मिन् ॥

॥ कामुज्जहारहरिरंबुधिमध्यमग्नां ॥
॥ कीदृक्श्रुतंभवतिनिर्मलमानसानां ॥
॥ आमंत्रयस्ववनमग्निशिखावलीढं ॥
॥ तच्चापिकोदहतिकेमदयांतिभृंगान् ॥ ४६ ॥

॥ कुंदमकरंदबिंदवः ॥

॥ कुंपृथ्वीं दमकरं शमदमउपशमक्षमायुक्तंभवतीत्यर्थः ॥ हदविन् दानेवि द्यतेयस्मिन्ततत्दवि तत्संबोधनं दवोवनाग्निस्तेनयुक्तामित्यर्थः दावोवनाग्निः कुंदमकरंदबिंदवः कुंदानं पुष्पविशेषाणांमकरंदःपुष्परसोगंधस्तस्यबिंदव : कणाः

॥ वसतिकुत्रसरोरुहसंतति र्दिनकृतोननुकेतिमिराच्छिदः ॥
॥ पवनभक्षसपत्नरणोत्सुकं पुरुषमाह्वयकोजगतिप्रियः ४७

॥ कोकिरणोत्करः ॥ इतिशब्दार्थवचनभिन्नं ॥

Digitized by Google

॥ कपानीये किरणानांउत्करा समूहाः हेकेकिरणोत्क केकावाणोमयू
रस्येत्यमरः केकाविद्यतेयषांते केकिनः केकिनांमयूराण रणेशब्देउत्क
उत्सुकः तत्सबोधनं राःद्रव्यं ॥

॥ कीदृग्गृहंयाम्यगृहंमतस्य ॥
॥ कास्त्राणमंभस्तरणेजनानां ॥
भूषाकथंकंठनतेनुपृष्ठे मुक्ताकलापैरितिचोत्तरंकिं ४८

॥ हारावितावः ॥

॥ हारावि हाइतिखेदे हाइतिरावःशब्दोविद्यतेयस्मिन्तत् नावःनौकाः
हेहाराः वोयुष्मानूविना ॥

॥ कवयोवदकुत्रकीदृशाः कठिनंकिंविदितःसमंततः॥
॥ अधुनातववैरियोषितांल्दादितापःप्रबलोविहायकाः॥ ४९
॥गिरिसारमुखाः ॥ इतिशब्दार्थलिंगविभक्तिवचनभिन्नं ॥

॥ गिरिसारमुखाः ॥ गिरिवाण्यां। सारंप्रधानं। स्फुटोच्चारवन्मुखंवद नेय
षांतेगिरिसारंलोहं उखाः स्थालीः अन्नरंधनरहंडिकाः ॥ ४९ ॥

॥ मेघात्ययेभवतिकिंसुभगावगाहं ॥
॥ कावाविडंबयतिवारणमल्लवेश्याः ॥
॥ दुर्वारवीर्यविभवस्यभवेद्रणेकः ॥
॥ काः स्मेरवक्त्रसुभगास्तरणिप्रभाभिः ॥ ५०

॥ सरोजराजयः ॥

॥ सरस्तडागं। जरावयोहानिः। जयः प्रसिद्धः। सरोजराजयः। सरोजा-
नांकमलानांराजयःश्रेण्यः ॥ ५० ॥

॥ पृच्छातिशिरसिरुहोमधुमथनं ॥
॥ मधुमथनस्तंशिरसिरुहंच ॥
॥ कः खलुचपलतयाभुविविदितः ॥
॥ काननुयानतयागविगदिताः॥ ५१ ॥
॥ केशवनौकाः ॥ इतिशब्दार्थलिंगवचनभिन्नं ॥

हेकेशहेवाल वनौकाः वनेओकोगृहंयस्यासौवनौकःवानरः हेकेशव हेहरे नौकाःनावः

॥ नभवतिमलयस्यकीदृशीभूः ॥
॥ कइहकुचंनाबिभर्तिकंगताश्रीः ॥
॥ भवदरिनिवहेषुकाऽस्तिनित्यं ॥
॥ बलमथनेनविपद्वधायिकेषां ॥ ५२ ॥
॥ विपन्नगानां ॥

विपन्नगा विगताःपन्नगाःसर्पायस्याःसाईदशान किंतु पन्नगसहितैव नापुमान् अंकृष्णं विपत्सपदोऽभावः अलक्ष्मीःदरिद्रता नगानांपर्वतानां

॥ समयमिहवदंतिकंनिशीथं ॥
॥ शमयतिकान्वदवारिवाहवृंदं ॥
॥ वितरतिजगतांमनः सुकीदृक् ॥
॥ मुदमतिमात्रमयंमहातडागः॥ ५३ ॥
॥ अरविंदवान् ॥ इतिशब्दार्थविभक्तिवचनभिन्नं ॥

॥ अरविं । नास्तिरविः सूर्योयस्मिन्सः अरविस्तं । दवानलदावानलान् । अरविं दवान् । अरविंदानिकमलानिविंदतेयस्मिन्सो ऽरविंदवान् । मत्वंतः ॥

॥ कीदृक्षंसमितिबलंनिहंतिशत्रुं ॥

॥ विष्णोः कामनसिमुदंसदातनोति ॥
॥ तुच्छंसच्छरधिमुखंनिगद्यतेकिं ॥
॥ पंचत्वैः सममपमानएवकेषु ॥ ५४ ॥
॥ अभिमानिषु ॥

॥ अभिनास्तिभीर्भयंयस्यतत् । मालक्ष्मीः । अनिषु । नविद्यतेइषवोबाणाः यास्मिन्ततत् । अभिमानिषुगर्यवत्सु ॥

॥ घनसमयेशिखिषुस्यान्नृत्यं कीदृक्षुकिंघनात्पतति ॥
॥ प्रावृषिकस्यनगमनं मानसगमनायकीदृशाहंसाः ॥ ५५ ॥
॥ समुत्सुकमनसः ॥ इतिशब्दार्थलिंगवचनभिन्नं ॥
॥ इतिप्रभिन्नकजातिः

॥ समुत्सु । मुदाहर्षेणसहवर्त्तमानाः समुदस्तेषु । कंपानीयं अनसः शकटस्य समुत्सुकमनसः संसम्यक् उत्प्राबल्येन । सुअतिशयेन यत्उत्पन्नंतत्समुत्सुकं इष्टार्थोशुक्तउत्सुकइत्यमरः समुत्सुकंउत्कंठायुक्तंमनोयेषांते ॥

॥ अर्थमात्रैकभेदेन भिन्नंबभ्रंतिकेचन ॥
॥ सुकुमारधियस्तच्च विदग्धैर्नादृतंयथा ॥ ५६ ॥
॥ आनंदयतिकोत्यर्थं सज्जनानेवभूतले ॥
॥ प्रबाधयातिपद्मानि तमांसिचानिहांतिकः ॥ ५७ ॥
॥ मित्रोदयः ॥

मित्रोदयः मित्राणांसखीनांउदयोवृद्धिः मित्रस्यसूर्यस्यउदयउद्गमनं ॥

॥ अटवीकीदृशीप्रायो दुर्गमाभवतिप्रिये ॥
॥ प्रियस्यकीदृशीकांता तनोतिसुरतोत्सवं ॥ ५८ ॥

Digitized by Google

॥ मदनवती ॥ इतिप्रकारांतरेणप्रभिन्नकजातिः ॥

मदनवती मदनामदनवृक्षाः विद्यंतेयस्यासा अतिगहनत्वाद्दुर्गमा मदनःकामोविद्यतेयस्याःसा सयौवनाइत्यर्थः ॥

॥ भिन्नावश्यंकर्तव्यौ शब्दार्थौप्रश्नपंडितैः ॥
॥ लिंगादिषुयथाशक्ति भेदमाहुर्मनीषिणः ॥ ५९ ॥
॥ इतिप्रथमः परिच्छेदः ॥ १ ॥

॥ विशेषणंविशेष्येण यत्रप्रश्नेविधीयते ॥
॥ भेद्यभेदकमाहुस्तं प्रश्नंप्रश्नविदोयथा ॥ १ ॥

॥ यस्मिन्पृष्टेविशेष्येणयुक्तंविशेषणंक्रियतेतत्भेद्यभेदकं भेद्यंचभेदकंच भेद्यभेदके भेद्यभेदकेयस्मिन्ततत्भेद्यभेदकंपृष्टं

॥ कीदृक्किंस्यान्नमत्स्यानां हितंस्वेच्छाविहारिणां ॥
॥ गुणैःपरेषामत्यर्थं मोदतेकीदृशःपुमान् ॥ २ ॥
॥ विमत्सरः ॥

विमत्सरः वयः पक्षिणोविद्यतेयस्मिन्ततत्विमत् ईदृशंसरस्तडागंविगतोमत्सरोअहंकारोयस्यसः

॥ अगस्त्येनपयोराशेः कियत्किंपीतमुच्छ्रितं ॥
॥ त्वयावैरिकुलंवीर समरेकीदृशंकृतं ॥ ३ ॥
॥ सकलंकं ॥ इतिभेद्यभेदकजातिः

सकलंसमस्तंकंपानीयंपीतंमूत्रंच सकलंकं कलंकेनानिंदालांछनेनसहवर्त्तमानंकृतं

॥ दीर्घवृत्तेनयत्पृष्ट मुत्तरंकियदक्षरं ॥
॥ तदोजस्वीतिविख्यात मूर्जितंचेतिकेचन ॥ ४ ॥

Digitized by Google

यत्पृष्टं दीर्घश्लोकेनपृच्छ्यते । तस्योत्तरंस्तोकैरक्षरैर्भवेत्ततओजस्विपृष्टं

॥ कामिन्यास्तनभारमंथरगतेर्लीलाचलच्चक्षुषः ॥
॥ कंदर्पैकविलासनित्यवसतेः कीदृक्पुमान्वल्लभः ॥
॥ हेलाकृष्टकृपाणपाटितगजानीकात्कुतस्तेऽरयः ॥
॥ श्वासायासविशुष्ककंठकुहरानिर्यांतिजीवार्थिनः ॥ ५ ॥

१ ॥ समरतः ॥

समरतः समंतुल्यंरतंभोगक्रियायस्यसः समरतःसंग्रामात् ॥

॥ दैत्यारातिरसौवराहवपुषाकामुज्जहारांबुधेः ॥
॥ कारूपंविनिहंतिकोमधुवधूवैधव्यदीक्षागुरुः ॥
॥ स्वच्छंदंनवशल्लकीकवलनैःपंपासरोमज्जनैः ॥
॥ केविंध्याद्रिवनेवसंत्यभिमतक्रीडाभिरामास्थिताः ॥ ६ ॥

॥ कुंजराः ॥ इत्योजस्विजातिः ॥

कुंपृथ्वीं । राजशृद्धत्वे ॥ अःकृष्णः कुंजराः हस्तिनः ॥ ॥

॥ उपमादिरलंकारोबहुधापरिकीर्तितः ॥
॥ यत्नेनकथ्यतेसार्धंसालंकारंतदुच्यते ॥ ७ ॥

॥ अलंकारैः सहवर्तमानंसालंकारंपृष्टं ॥

॥ कल्याणवाक्त्वमिवकिंपदमत्रकांतं ॥
॥ सद्भूपतेस्वमिवकः परितोषकारी ॥
॥ कः सर्वदावृषगतिस्त्वमिवातिमात्रं ॥
॥ भूत्याश्रितः कथयपालितसर्वभूतः ॥ ८ ॥

Digitized by Google

॥ शंकरः ॥

॥ शंसुखं करोराजभागः शंकरोमहादेवः ॥

॥ सूर्यस्यकांतिमिरकुंजरवृंदसिंही ॥

॥ सत्यस्यकासुछंतवारिधिचंद्रलेखा ॥

॥ पार्थश्चकीदृगरिदावहुताशनोभूत् ॥

॥ कामालतीकुसुमदामहरस्यमूर्ध्नि ॥ ९ ॥

॥ भागीरथी ॥ रूपकंसालंकारजातिः ॥

॥ भाकांतिः गीः वाणी रथीरथोविद्यतेयस्यसः भगीरथेनआनी-
ताभागीरथीगंगा ॥

॥ लघुवृत्तेनयत्पृष्टंप्रभूताक्षरमुत्तरं ॥

॥ सकौतुकमितीच्छंतितद्विदस्तदिदंयथा ॥ १० ॥

॥ लघुश्लोकेनयत्पृष्टं पृच्छ्यते तस्योत्तरंबव्हक्षरैर्भवेत् तत्सकौतुकंपृष्टं ॥

॥ केस्थिराः केप्रियाः स्त्रीणांकोऽप्रियोनक्तमाव्हय ॥

॥ नृत्यभूः कीदृशीरम्यानदीकीदृग्घनागमे ॥ ११ ॥

॥ अगाधवारिपूरजनिततरंगा ॥

अगाः पर्वताः धवाः भर्तारः रिपुः शत्रुः हेरजनि ततरंगा ततोविस्तीर्णोरंगोनर्तनमंडपोयस्याः सा अगाधवारिपूरजनिततरंगा अगाधेनअतलस्पर्शेनवारिपूरेणजलसमूहेनजनिताः उत्पादितास्तरंगाः लहर्योयस्यांसा ॥

॥ काकुताविष्णुनाकीदृग्योषितांकः प्रशस्यते ॥

॥ असेव्यःकीदृशःस्वामी ॥ कोनिहातानशातमः ॥ १२ ॥

॥ कुमुदवनबांधवोदयः ॥ इतिसकौतुकजातिः ॥

कोः पृथिव्याः मुत्कुमुत् पृथिव्याः मध्येप्रीतिः कृतेत्यर्थः अवनंरक्षणं विद्यतेयस्यासौ अवनवान् रक्षाकरः धवोभर्ता सविशेषणमुत्तरंअत्रकृतं । नास्तिदयायस्यसःअदयः दयारहितः अथवादयदाने नास्तिदयोदानं यस्यसः अदयोऽदाता ॥ कुमुदवनबांधवोदयः कुमुदानाचंद्रविकाशि कमलानां वनानांबांधवोभ्राताचंद्रस्तस्योदयः प्रकटभावः ॥

॥ प्रश्नवर्णविधेस्तुल्ययत्रस्यादुत्तरंवरं ॥
॥ प्रश्नोत्तरसमंतज्ज्ञास्तदाहुःश्रूयतांयथा ॥ १३ ॥

॥ प्रश्नश्चउत्तरंचप्रश्नोत्तरे ताभ्यांसमंयुगपद्वचनमेकीभूतंप्रश्नोत्तरसमंपृष्टं ॥

॥ कंदर्पमदजनकंप्राहुःकाचघटीगदिताच्छतमेह ॥
॥ इत्यादिप्रश्नेयुक्तंयब्दूततदुत्तरमाशुविचिंत्य ॥१४॥

॥ कंदर्पकामं काचघटी काचःप्रसिद्धोऽतिनिर्मलस्तस्यघटीकुपिका ॥

॥पथिकस्तिष्ठतिकष्टंविरहीनाविकआस्तेतत्कुतरक्षः ॥
॥ इत्यादिप्रश्नेयुक्तंयब्दूहितदुत्तरमुत्तमपुरुष ॥ १५ ॥

॥ इतिप्रश्नोत्तरसमजातिः ॥

॥ पथिमार्गेचलतिसः पथिकः नाविकः पोतवाहः ॥

॥ यस्मिन्नुत्तरमुच्चार्यप्रश्नस्तस्यैवपृच्छयते ॥
॥ पृष्टप्रश्नंतदिच्छंतिप्रश्नोत्तरविदोयथा ॥१६॥

॥ यस्मिन्प्रश्नविषयेप्रथममुत्तरस्योच्चारकत्वात्तस्यैवोत्तरस्यपुनःप्रश्नःपृच्छयते तत्पृष्टप्रश्नंनामपृष्टं ॥

॥ लक्ष्मणेत्युत्तरंयत्रप्रश्नःस्यात्तत्रकीदृशः ॥

Digitized by Google

॥ ग्रीष्मेद्विरदवृंदायवनालीकीदृशीहिता ॥ १७ ॥

॥ कासारसाहिता ॥

॥ अत्रकासारसाहिताइतिप्रश्नः प्रथमवारमेव द्वितीयवारंतूत्तरं सारसस्यप क्षिणोहिताप्रियाकाइतिप्रश्नः हंसस्ययोषिद्वरटासारसस्यतुलक्षणेत्यमरः का सारेणअखातसरोवरेणसाहितासहवर्तमाना ॥

॥ चादयइतियत्रस्यादुत्तरमथतत्रकीदृशःप्रश्नः ॥

॥ कथयत्वरितंकेस्युर्नीकायाहनोपायाः ॥ १८ ॥

॥ केनिपाताः ॥ इतिपृष्टप्रश्नजातिः ॥

अत्रापिकेनिपाताइतिप्रश्नः प्रथमवारमेव द्वितीयवारंतूत्तरं निपाताः केभवंतीतिप्रश्नः ॥ चादयोनिपातसंज्ञाः केपानीयेनिपतंतितेकेनिपातः ॥ अलुक्समासःहालिसाइतिभाषा ॥

॥ कथयामुकमित्यादिभंक्त्वाकायत्रोत्तरंभवेत् ॥

॥ भग्नोत्तरंतदिच्छंतिकाकुमात्रेणगोपितं ॥ १९ ॥

अनिर्दिष्टंपृष्टंभंक्त्वाकायत्रोत्तरंभवेत् ततू भग्नोत्तरं भग्नं उत्तरं यस्मिन्तत तृभग्नोत्तरंपृष्टं ॥

॥ भवतइवातिस्वच्छंकस्याभ्यंतरमगाधमतिशिशिरं ॥

॥ काव्यामृतरसमग्नस्त्वमिवसदाकःकथयसरसः ॥ २० ॥

शब्दविकारमात्रेणगोपितं उत्तरभंगपदे सरसस्तडागस्य रसेनशृंगारादि नासहवर्त्तमानःसरसःपुमान् ॥

॥ वीरेसरुषिरिपूणांनियतंकात्दयशायिनीभवति ॥

॥ नभसिप्राप्स्थितजलदेकाराजतिहंतवदतारा ॥ २१ ॥

Digitized by Google

॥ इतिभग्नोत्तरजातिः ॥

अत्राप्युत्तरमंतपदे आराचर्मप्रभेदिनी शत्रूणांमनसिदुःखरूपाआरातारा नक्षत्रमृक्षंभतारा ॥

॥ यत्पृष्टंप्रश्नवाक्येस्यादादिमध्यांतसंस्थितं ॥
॥ उत्तरंतत्त्रिधाप्रोक्तमादिमध्यांतसंज्ञितं ॥ २२ ॥

॥ प्रश्नानांपदसमुदायेआदौपदुत्तरंभवेत् तत्आद्युत्तरंपृष्टं ॥

॥ भ्रमरहितःकीदृक्षोभवतितरांविकसितःपद्मः ॥
॥ ज्योतिषिकःकीदृक्षःप्रायोभुविपूज्यतेलोकैः ॥ २३ ॥

॥ भ्रमरहितः भ्रमराणां भृंगाणां हितोहितकृत् भ्रमेणमिथ्यामत्यारहितःशुद्धज्ञानवान् ॥

॥ प्रभवःकोगंगायानगपतिरतिसुभगशृंगधरः ॥
॥ केसेव्यंतेसेवकसार्थैरत्यर्थमर्थरतैः ॥ २४ ॥

॥ इत्याद्युत्तरजातिः ॥

॥ प्रभवःउत्पत्तिस्थानं प्रभवोमहांतः ईश्वराः आद्युत्तरजातिरिति प्रश्नानांपदसमुदायमध्येयदुत्तरंभवेत् तत्मध्योत्तरंपृष्टं ॥

॥ अयमुदितोहिमरश्मिर्वनितावदनस्यकीदृशःसदृशः ॥
॥ नीलादिकोपलंभःस्फुरतिप्रत्यक्षतःकस्य ॥२५॥

सदृशःसमानइवदृश्यतेऽसौतुल्यइत्यर्थः दृशानेत्रेणसहवर्त्तमानःसदृक्तस्यदृशःसनेत्रस्यमनुष्यस्य ॥

॥ गैरिकमनःशिलादिःप्रायेणोत्पद्यतेकुतोनगतः ॥
॥ यःखलुनचलतिपुरुषःस्थानादुक्तःसकीदृक्षः ॥ २६ ॥

Digitized by Google

॥ इतिमध्योत्तरजातिः ॥

॥ नगतःनगात्पर्वतात् नगतःसन्नगात्यर्थः ॥ प्रश्नानांपदसमुदायोभंते यदुत्तरंभवेत्तत्अंतोत्तरंपृष्टं ॥

॥ कस्मिन्वसंतिवदमीनगणाविकल्पं ॥
॥ किंवापदंवदतिकिंकुरुतेविवस्वान् ॥
॥ विद्युल्लतावलयवान्पथिकांगनानाम् ॥
॥ उद्वेजकोभवतिकःखलुवारिवाहः ॥ २७ ॥

वारिवाहः वारिजले वाविकल्पार्थे अहर्दिनं वारिवाहोमेघः ॥

॥ शब्दःप्रभूगतइतिप्रचुराभिधायी ॥
॥ कीदृग्भवेद्वदतशब्दविदोविचिंत्य ॥
॥ कीदृग्बृहस्पतिमतेविदिताभियोगः ॥
॥ प्रायःपुमान्भवतिनास्तिकवर्गमध्यः ॥ २८ ॥

॥ इत्यंतोत्तरजातिः ॥

नास्तिकवर्गमध्यः नआस्तिनविद्यो कवर्गोगकारोमध्येयस्यसःकवर्गमध्य प्रभूगतोऽयंशब्दः कोऽर्थःयदाप्रभूगतस्यमध्यात्कवर्गीयोगकारोलुप्यते तदा प्रभूतइत्येवावशिष्यते प्रभूतःप्रचुरवाची नास्तिकानांअपुनर्जन्मवादिनांवर्गः समूहस्तस्यमध्येऽतर्वर्ती नास्तिपरलोकेमतिर्येषांतेनास्तिकाइतिव्युत्पत्याते षांमतंभिन्नमेवास्ति ॥

॥ पदांतरादिसंबंधात्प्रश्नवाक्येपिसंस्थितं ॥
॥ कथितापन्हुतिःसास्याल्लक्ष्यतेयत्रनोत्तरं ॥ २९ ॥

यत्पृष्टंप्रश्नवाक्येसंस्थितमपिपदांतरेषुगोपनात्तूत्तरंनज्ञायते तत्कथि तापन्हुतिपृष्टं ॥

Digitized by Google

॥ पृथ्वीसंबोधनंकीदृक्कविनापरिकीर्तितं ॥
॥ केनेदंमोहितंविश्वंप्रायःकेनाप्यतेयशः ॥ ३० ॥

कथितस्यभाषितस्यापिअपन्हुतिर्निन्हवनंयस्मिन्ततत् कविनाइतिउत्तरं हेकोहिपृथ्वि इनाकामेन कविनाकाव्यकर्त्रा

॥ कस्यमरौदुरधिगमः कमलेकः कथयविरचितावासः ॥
॥ कैस्तुष्यतिचामुंडारिपवस्तेवदकुतोभ्रष्टाः ॥ १ ॥

॥ इतिकथितापन्हुतिजातिः ॥

कस्यइत्युत्तरं कंजलंतस्य कोब्रह्माइत्युत्तरं कैर्मस्तकैरित्युत्तरं कुतः पृथ्व्याः सकाशादित्युत्तरं पृथ्व्याधिकारात्पतिताइत्यर्थः

॥ यत्रभंगस्यवैषम्यं विषमंतन्निगद्यते ॥
॥ वृत्तनामोत्तरंपृष्टंभवेत्तद्वृत्तनामकं ॥ ३२ ॥

यत्रप्रश्नेभंगस्यरचनायाः दुः करत्वंभवति ततूविषमंपृष्टं

॥ कीदृग्वनंस्यान्नभयायपृष्टेयदुत्तरंतस्यचकीदृशस्य ॥
॥ वाच्यंभवेदीक्षणजातमंबुकंचाधिशेतेगविकोर्चनीयः ॥ ३३ ॥

॥ अहिंस्रमहिमः ॥

अहिंस्रं नसंतिहिंस्राः घातुकाजीवविशेषाः यस्मिन्ततत् ॥ अहिमः न विद्यतेहिमअहिमूतस्यअहिमः सतः कोऽर्थः यदाअहिंस्रशब्दात्हिमूदूरीकियते तदाअस्रंइतितिष्टेत अस्रंनेत्रजलंअश्रुपातः अहिंशेषनागं अः कृष्णः पूज्यः सन्अधिशेते ॥

॥ प्रायःकार्येनमुह्यंति नराःसर्वत्रकीदृशाः ॥
॥ नाथाइतिभवेच्छब्दो नौवाचीवदकीदृशः ॥ ३४ ॥

Digitized by Google

॥ सावधानाः ॥ इतिविषमजातिः ॥

सावधानाः सहअवधानेनसमाधिनावर्तंतइतिसावधानाः समाधिर्नियमेध्या नेइत्यमरः अव्यग्रचित्ताइत्यर्थः सौ अधा ना त् इतिपदच्छेदः । अस्यार्थः औकारेणसहवर्तमानः सौ नधाअधा धारहितः एवंविधः ना इतिशब्दः सकारस्यविसर्गः नोः इतिनौवाचि भवेदितियोजना अस्यायं विधिः ना इत्यत्र ना धा इतिभिन्नौलिख्येते नाइतिसौ औकारे णसहितः क्रियते तदानौइतिस्यात् अधा धाइतिदूरीक्रियते सइत्यस्य विसर्गः क्रियते नौःइत्येवंसिध्यति नौकावाचीजातः ॥ वृत्तानांछंदसांनाम यस्मिन्उत्तरेतत्वृत्तनामकंपृष्टं ॥

॥ गतक्लेशायासाः विमलमनसः कुत्रमुनयः ॥
॥ तपस्यंतिस्वच्छाः सुररिपुरिपोः काचदयिता ॥
॥ कविप्रेयः किंस्यान्नवलघुयुतैरष्टगुरुभिः ॥
॥ बुधावृत्तंवर्णैः स्फुटघटितबंधंकथयत ॥ ३५ ॥

॥ शिखरिणी ॥

शिखराणिविद्यंतेयस्मिन्नसौशिखरीतस्मिन् शिखरिणीपर्वतेईलक्ष्मीः शिख रिणीछंदः ॥

॥ उरसिमुरभिदः कागाढमालिंगितास्ते ॥
॥ सरसिजमकरंदामोदितानंदनेका ॥
॥ गिरिसमलघुवर्णैर्वाख्यातिसंख्यै ॥
॥ गुरुभिरपिकृताकाछंदसांवृत्तिरम्या ॥ ३६ ॥

॥ मालिनी ॥ इतिवृत्तनामजातिः ॥

मालक्ष्मीः अलिनी भ्रमरी मालिनीनामछंदोवृत्तं ॥

॥ एकमेवोत्तरंयत्र सुश्लिष्टत्त्वाद्विधाभवेत् ॥
॥ सुप्तिगंतप्रभेदेन नामाख्यातंतदुच्यते ॥ ३७ ॥

सुबंततिङंतयोर्भेदेनसुगुप्तत्वाद्विधाभवेत् यत्रप्रश्नेरेकमेवोत्तरं तत्नामाख्यातंपृष्टं ॥

॥ समरशिरसिसैन्यंकीदृशंदुर्निवारं ॥
॥ विगतघननिशीथेकीदृशेव्योम्निशोभा ॥
॥ कमपिविधिवशेनप्राप्ययोग्याभिमानं ॥
॥ जगदखिलमनिंद्यंदुर्जनः किंकरोति ॥ ३८ ॥

॥ अभिभवति ॥

नामचख्यातंचनामाख्याते तेविद्येतेऽस्मिन्ततत् अभि नास्तिभीर्यस्यत त् भयरहितं भवति भानिनक्षत्राणिविद्यंतेयस्मिन् तत् भवत् तस्मिन् भवति नक्षत्रयुक्ते अभिभवति पराभवति नीचोवृद्धिगतोदुःखदायक एवभवेदितिनीतिः प्रथमपुरुषैकवचनं ॥

॥ पदमनंतरवाचिकिमिष्यतेकपिपतिर्विजयीननुकीदृशः ॥
॥ परगुणंगदितुंगतमत्सराः कुरुतकिंसततंभुविसज्जनाः ॥ ३९ ॥

॥ अनुसरामः ॥ लट् ॥

॥ अनुपश्चाद्वाचि रामेणसहवर्तमानः सरामः अनुसरामः वयंपरमगुण प्रतिअनुसरणंकुर्मः उत्तमपुरुषबहुवचनं लट् ॥

॥ वदतिराममुष्यजघन्यजो वसतिकुत्रसदालसमानसः ॥
॥ अपिचशक्रसुतेनतिरस्कृतो रविसुतःकिमसौविदधेत्वया ४० ॥

॥ अनुजगृहे ॥

॥ हेअनुजभ्रातः गृहेवसति रामआह मयाअनुजगृहे अनुजगृहितः ॥

Digitized by Google

॥ भवतिगमनयोग्याकीदृशिभूरथानां ॥
॥ किमतिमधुरमम्लभोजनांतेप्रदेयं ॥
॥ प्रियतमवदनीचामंत्रणेकिंपदंस्यात् ॥
॥ कुमतिकृतविवादाश्चक्रिरेकिंसमर्थैः ॥ ४१ ॥
॥ समादधिरे ॥ लट् ॥

॥समाअविषम दधिक्षीरजंरेइतिनीचसंबोधनेदीयते रेदास समादधिरे समानत्वेनस्थापिताः विवादस्यवासमाधानंकृतं ॥ लिट्

॥ वदतानुत्तमवचनंध्वनिरुच्चैरुच्यतेसकीदृक्षः ॥
॥ तवसुत्प्रदोगुणनिवैहरिपुनिवहंकिंनुकर्तारः ॥ ४२ ॥
॥ अवमंतारः ॥

॥ अवमंनीचार्थवाचकं तारः तारोऽत्युच्चैर्ध्वनिः अवमंतारः ॥ अस्मिन्मित्राणिरिपूणामपमानंकरिष्यंतीत्यर्थः तारसइत्यस्यरूपं ॥

॥ कीदृक्तोयंदुस्तरंस्यात्तितीर्षोः ॥
॥ कापूज्यास्मिन्खण्डमामंत्रयस्व ॥
॥ दृष्ट्वाधूमंदूरतोमानविज्ञाः ॥
॥ किंकर्तास्मिप्रातरेवात्प्रयावसं ॥ ४३ ॥
॥ अनुमातासे ॥ लुट्लकारः ॥

नविद्यतेनौयत्रतत्अनु नौकारहितमित्यर्थः माताजनित्री हेअसे हेखङ्ग अनुमातासे त्वमनुमानंकरिष्यसि लुट् ॥

॥ कामुकास्युः कयानीचाः सर्वकस्मिन्प्रमोदते ॥
॥ अर्थिनः प्राप्यपुण्याहंकरिष्यध्वेवसूनिकिं ॥ ४४ ॥

Digitized by Google

॥ दास्यामहे ॥

॥ दास्यादासीचात्रक्रीत्वेनक्रीतोवश्यावागृह्यते महेमहोत्सवे महउद्भवउत्सवइत्यमरः वयंदास्यामहे दानंदास्यामः ॥

॥ कोदुः खसिर्वकार्यपुकिंभृशार्थस्यवाचकं ॥

॥ योयस्माद्विरतोनित्यंततः किंसकरिष्यति ॥ ४५ ॥

॥ प्रयास्यति ॥ लृट् ॥

प्रयासआगासोऽस्यास्तिसः प्रयासी अतिअयमर्थे प्रसिद्धः प्रयास्यति प्रकर्षेणतत्स्थानंविमुच्यगमिष्यति लृट् ॥

॥ विद्यंतइतिसमानार्थः शब्दः कोचिरयतिमुद्रांकिं ॥

॥ कथमपियदितेकोपः स्यात्त्वांमुजनकिंकरोतुवद ॥

॥ संत्यजतु ॥

संतिविद्यंते अजतु अलंक्षा लाक्ष्यतिरिक्तमन्यत्किंचिदपिमुद्रिकामणिं स्थापयितुंनचशक्नोति अयंभावार्थः संत्यजतु सः मांसंत्यजदूरेणगच्छतु इत्यर्थः

॥ मेघात्ययेभवतिकासुभगावग्राहा ॥

॥ वृत्तंवसंततिलकाकियदक्षराणां ॥

॥ भोभोकदर्यपुरुषाविपुवद्दिनंच ॥

॥ वित्तंचवःसुबहुतत्क्रियतांकिमेतत् ॥ ४७ ॥

॥ नदीयतां ॥ लोट् ॥

नदीप्रसिद्धा इयतां एतत्परिमाणमेषां तानिइयंतेतेषां एतावदक्षराणामेव

भवति अस्मद्भिर्नदीयतां लोट् ॥

॥ कामार्थतिमकरंदैस्तनयंकमसूतजनकराजसुतां ॥
॥ कथयकृपाविलसस्यंपक्कंकिमचीकरस्त्वमापि ॥ ४८ ॥

॥ अलीलवं ॥

अलिःभ्रमरः लवं लवनामानंपुत्रं अहंअलीलवं छेदनमकार्यं

॥ पृच्छतिपुरुषःकेऽस्यांसमभूवन्वज्रकृत्तपक्षतयः ॥
॥ बहुभयेशंजिगमिषुरेकाकीवार्यतेसकथं ॥ ४९ ॥

॥ मानवनगाः ॥ लुट् ॥

हेमानव नगाःपर्वताः इंद्रेणहिपर्वतानांपक्षछेदःकृतःइतिपौराणिकाव दंति मानवनगाः हे अनवन नविद्यतेअवनंरक्षणंयस्यसः अनवनः तत्संबोधनं हे अरक्षक त्वंमागाःगमनंमाकुर्याः लुङ् ॥

॥ किमकरवमहंहरिर्महीध्रं ॥
॥ स्वभुजबलेनगवांहितंविधित्सुः ॥
॥ प्रियतमवदनेनपीयतेकः ॥
॥ परिणतबिंबफलोपमःप्रियायाः ॥ ५० ॥

॥ अधरः ॥

हेकृष्ण त्वंगोवर्द्धनपर्वतं अधरः हस्तेधृतवान् अधरःओष्ठः

॥ परिहरतिभयात्तवाहितःकं ॥
॥ कमथकदापिनाविंदतीहमतिः ॥
॥ कथयकिमकरोरिमांधरित्रीं ॥

Digitized by Google

॥ नृपतिगुणैर्नृपतेवरत्वमेकः ॥ ५१ ॥

॥ समरंजयं ॥ लङ् ॥

समरंसंग्रामं जयंजयवादं अहंसमरंजयं रागिणांपृथ्वीमकरवं लङ् ॥

॥ कीदृक्सेनाभवतिरणेदुर्वारा ॥

॥ वीरःकस्मैस्पृहयतिलक्ष्मीमिच्छन् ॥

॥ कासंबुद्धिर्भवतिभुवःसंग्रामे ॥

॥ किंकुर्वीध्वंसुभटजनाःभ्रातृव्यान् ॥ ५२ ॥

॥ पराजयेमहि ॥

पराउत्कृष्टा उत्कृष्टाएवसेनाजयंप्राप्नुयादित्यर्थः आजयेसंग्रामाय हेमहिहे पृथ्वि वयंपराजयेमहि जयेमः ॥

॥ कंसारातेर्वदगमनंकेनस्यात् ॥

॥ कस्मिन्नुत्कृष्टिंलभतेस्वल्पेच्छुः ॥

॥ कंसर्वेषांशुभकरमूचुर्द्वीराः ॥

॥ किंकुर्यास्त्वंसुजनसशोकंलोकं ॥ ५३ ॥

॥ विनोदयेयं ॥

॥ लिङ् ॥

विनागरुडेन उदयेसति परस्योन्नतौसत्यां अयेभाग्यं अयमित्यकारांत शब्दस्यद्वितीयैकवचनं अहंतंविनोदयेयं विनोदेनयुक्तंकुर्यामित्यर्थः विधिसंभावनयोर्लिङ्

॥ वारणेंद्रोभवेत्कीदृक्प्रीतयेभृंगसंहतेः ॥

॥ यद्यद्भ्यंतदास्मैकिमकरिष्यमहंधनं ॥ ५४ ॥

॥ समदास्यः ॥

समदास्यः समदंमदसहितंभास्यंमुखंयस्यसः भ्रमरः हिमवानांमदमाघा यत्दृष्यति समदास्यः त्वंदानष्यतिदिष्यः

॥ कालेदेशेयथायुक्तंनरःकुर्वन्नुपैतिकां ॥
॥ भुक्तवंतावल्प्सेतांकिमन्नमकरिष्यतां ॥ ५५ ॥
॥ अहास्यतां ॥ लृङ्- ॥ इतिनामाख्यातजातिः ॥

अहास्यतां हास्यस्यभावोहास्यता नहास्यताऽहस्यतातां युक्तक्रियांकुर्वतो नकश्चिद्दसेदित्यर्थः अहास्यतां ओहाक्त्यागेक्रियाऽतिमन्तोस्यपू तदन्तं वत्यक्ष्यतामित्यर्थः लृङ् ॥

॥ ज्ञेयंतार्क्यदृशातार्क्यसौत्रंसूत्रोक्तरैस्तथा ॥
॥ शाब्दीयंशब्दसंज्ञाभिः शास्त्रजंशास्त्रभाषया ॥५६ ॥

तर्कशास्त्रेभवंतार्क्यंपृष्टं

॥ हिमानीस्थगिरौस्यातां कीदृशौशाशिभास्करौ ॥
॥ कःपूज्यःकःप्रमाणेभ्यो नप्रभाकरसंमतः ॥ ५७ ॥

॥ अभावः ॥

अभौ नास्तिभादौनिर्यस्तौ कांतिरहितौ अः कृष्णःअभावःप्रमाणशास्त्रेप्रसिद्धः अभावोनामसप्तमःपदार्थः प्रभाकरास्तुअभावरूपंसप्तमंपदार्थंप्रमाणत्वेननमन्त्यो

॥ केप्रवीणाःकुतोहीनंजीर्णवासोंशुमांश्चकः ॥
॥ निराकरिष्णवोबाह्यंयोगाचाराश्चकीदृशाः ॥ ५८ ॥

Digitized by Google

॥ विज्ञानवादिनः इतितार्क्यजातिः ॥

विज्ञाः विशेषेणजानंतीति चतुराः नवान्नूतनान् जीर्णाहवस्त्रनवान् हि नमुल्यंस्यादित्यभिप्रायः इनः सूर्यः विज्ञानवादिनः विशेषेणज्ञानस्यतत्वार्थज्ञानस्यवादोविद्यते येषुते विज्ञानवादिनइतिपदंतर्कशास्त्रेप्रसिद्धत्वात् तार्क्यजातिरिति सूत्रेभवंसौत्रंपृष्टं

॥ कोनयतिजगदशेषंक्षयमथविभरांबभूवकंविष्णुः ॥
॥ नीचःकुत्रसगर्वःपाणिनिसूत्रंचकीदृक्षं ॥ ५९ ॥

॥ यमोगंधने ॥

यमःकृतांतःअंगंपारिशेष्याद्धोवर्द्धनं धने यमोगंधनेपाणिनियव्याकरणमध्येइदंसूत्रमस्ति

॥ किंस्याद्विशेष्यनिष्ठंकासंख्यावदतपूर्णाभवति ॥
॥ नीचः केनसवर्गः सूत्रंचंद्रस्यकीदृक्षं ॥ ६० ॥
॥ विशेषणमेकार्थेन ॥ इतिसौत्रजातिः ॥

विशेषणं एका शून्यानांसंख्यापूरकंएकमेवभवति एकादिअंकोलिख्यते बिंदूनांसाफल्यंस्यादन्यथाशून्यमेव अथवाएकद्वित्र्यादिकासंख्या अथवा ऊनानामेकत्रिंशादीनांपूरण्येकाएवसंख्यासमसंज्ञाकर्त्रीभवेदित्याकूतंअर्थेन द्रव्येण विशेषणमेकार्थेन इदंचंद्रव्याकरणसूत्रमस्तीति ॥ शब्दानामिदं शाब्दोयंव्याकरणं ॥ शाब्देभवंशाब्दीयंपृष्टं ॥

॥ नश्श्राघतेखलः कस्मैसुप्तिङंतंकिमुच्यते ॥
॥ लादेशानांनवानांचतिङांकिनामकथ्यतां ॥ ६१ ॥

॥ परस्मैपदं ॥

परस्मै आत्मव्यतिरिक्तः परः अन्यस्मैनस्तौतिपदं पदसंज्ञं सुप्तिङंतं

पदं परस्मैपदं नवानांआपितेङातिप्रथम अंतिइत्यादीनांपरस्मैपदसंज्ञा ॥

॥ सततंश्लाघतेकस्मैनीचोभुविकिमुत्तमं ॥

॥ कर्त्तर्यापरुचादीनांधातूनांकिंपदंभवेत् ॥ ६२ ॥

॥ आत्मनेपदं ॥

आत्मनेस्वस्मै पदप्रतिष्ठास्थानं आत्मनेपदं ते आते अंते इत्यादीनिनववचनानिभवंतीतिभावार्थः

॥ किमव्ययतयाख्यातंकस्यलोपोविधीयते ॥

॥ ब्रूतशब्दविदोज्ञात्वासमाहारःकउच्यते ॥ ६३ ॥

॥ स्वरितः इतिशाब्दीयजातिः ॥

स्वर स्वरम्यपंस्वर्गेनिपातः इतः इत्संज्ञकस्यस्रितः ह्रस्वादयस्त्रयः स्वराःप्रत्येकमुदात्तानुदात्तस्वरितसंज्ञाःसमाहारःस्वरितइतितात्पर्यार्थः

॥ शास्त्राज्जातंशास्त्रजंपृष्टं ॥

॥ मेघात्ययेभवतिकःसमदःसुभगंचाकिंकमधरन्मुराजित् ॥

॥ कटुतैलमिश्रितगुडोनियतंविनिहंतिकंत्रिगुणसन्नादिनैः ६४

॥ श्वासरोगं ॥

श्वासशब्दः तेषुदिनेषुमैथुनेच्छोभवेत् सरस्तडागं अगंगोवर्द्धनपर्वतं श्वासरोगं

॥ कीदृक्प्रातर्दीपवर्त्तेःशिखास्यात् ॥

॥ उष्ट्रःपृच्छत्याभजंतेमृगाःकिं ॥

॥ देवामात्येकिंगतेप्रायशोऽस्मिन् ॥

॥ लोकःकुर्यान्नोविवाहंविविक्तः ॥ ६५ ॥

Digitized by Google

॥ विभाकरभवनं इतिशास्त्रजजातिः ॥

विभा विगताभाकांतिर्यस्यांसा हेकरमेउष्ट्र वनं विभाकरभवनं विभाकरस्यनूर्धस्यभवनंगृहंततूसिंहराशिंगतेजीवेलोकाःविवाहादिशुभकार्याणिनकुर्वंति सिंहस्याधिपतिसूर्यः ॥

॥ वर्णएवोत्तरंयत्र तद्वर्णोत्तरमुच्यते ॥
॥ वाक्यंयत्रोत्तरंतत्तु वाक्योत्तरमितिस्मृतं ॥ ६६ ॥

वर्णःएकाक्षरमेवउत्तरंयस्मिन्ततत्वर्णोत्तरंपृष्टं

॥ कौविख्याताघहेःशत्रू शोकंवदतिकिंपदं ॥
॥ कोऽभीष्टोऽतिदरिद्रस्यसेव्यंतेकेचभिक्षुभिः ॥ ६७ ॥

॥ वीहाराः ॥

अहेःशत्रूइतिपाठे विश्वविश्ववी गरुडमयूरौ कौशत्रूभुवंविख्यातावितिपाठे उश्वइश्वावे ईश्वरकंदर्पौ हा इतिखेदे राःद्रव्य वीहाराःतीर्थभूमयः प्रासादाःदेवायतनानिवा

॥ किंमुंचंतिपयोवाहाःकीदृशीहरिवल्लभा ॥
॥ पूजायांकिंपदंकोऽग्निःकःकृष्णेनहतोरिपुः ॥ ६७

॥ कंसासुरः ॥ इतिवर्णोत्तरजातिः ॥

कंजलं सा एनकृष्णेनसहवर्त्तमाना लक्ष्मी सुपूजायां रोऽग्निः कंसासुरः कंसासुरनामादैत्यः वाक्यंएवउत्तरंयस्मिन्ततत्वाक्योत्तरंपृष्टं ॥

॥ दधौहरिःकंशुचिकीदृगभ्रं ॥
॥ पृच्छत्यकःकिंकुरुतेससोकः ॥
॥ श्लोकंविधायापिकिमित्युदारः ॥

Digitized by Google

॥ कविर्नतोषंसमुपैतिभूयः ॥ ३८ ॥

॥ अगमकमकरोदिति ॥

इतेङ् सुवंतंचयोवाक्यमित्यमरः अगंगोर्वद्धनपर्वतं नविद्यतेकंजलंयत्रतत् अकं हेअक नविद्यतेकंसुखंयस्यसः हेदुःखिन् रोदितिरोदनंकरोति अगमकमकरोदिति एनंश्लोकंअगम्यंअकरोत्इतिविचारयन्तुष्टोनभवति इदंवृत्तंमयाऽपिदुर्बोधं

॥ लक्ष्मीधरःपृच्छतिकीदृशःस्यात् ॥

॥ नृपःसपत्नैरपिदुर्निवारः ॥

॥ अकारिकिंब्रूहिनरेणसम्यक् ॥

॥ पितृत्वमारोपयितुंस्वकीयं ॥ ६९ ॥

॥ समजनितनयः इतिवाक्योत्तरजातिः ॥ १ ॥

हेसम मालक्ष्मीस्तयासहवर्तमानः समः हेलक्ष्मीधर हेधनवन् वा हेकृष्ण जनितः कृतोनयोन्यायेनसः जनितनयः सजमनितनयः तनयः पुत्रः समजनिउत्पादितः

॥ इतिद्वितीयः परिच्छेदः ॥ २ ॥

॥ श्लोकएवोत्तरंयत्रतत्श्लोकोत्तरमुच्यते ॥

॥ खंडोत्तरंभवेदर्धश्लोकात्पादात्तदुत्तरं ॥

॥ श्लोकएवोत्तरंयत्रतत् श्लोकोत्तरंपृष्टं ॥

॥ कंदेवंकेर्चयंतिस्फुटरुचिनिशिकिंकीदृशीदुःखिनीस्त्री ॥

॥ कीदृक्चक्रंसदास्तेकचतवविजयीप्रावृषंकीदृशंखं ॥

Digitized by Google

॥ कामाहुः प्रेतयोग्यांकथयसुकृतिनः कीदृशाः स्युः पुमांसः
॥ कंधत्तेकंचधत्तेगगनतलमलंप्रेक्षणीयंजनानां ॥ २ ॥

॥ प्लक्षःकीदृक्चकास्तिस्फुटनवकुसुमाशोकमासाद्यकालं ॥
॥ किंमुंचंत्यंबुवाहाभवदरिनिवहेसंज्वरः किंभवश्च ॥
॥ किंनेत्रप्रावृतिस्यादतिशयलघवः केचकोव्रीहिभेदः ॥
॥ प्रायेणप्रावृषेण्याःप्रियतमदिवसाः कीदृशाःकीदृशास्युः ॥३

॥ अंजनाभमहावारिवाहौघनिचितांबराः ॥
॥ कदंबकंदलीकंदरजः पक्ष्मलवायवः ॥ ४॥

अंकृष्णं जनाः लोकाः भंनक्षत्रं नास्तिहावोमुखविकारोयस्याः साभहा वा अराणिविद्यंतेयास्मिन्ततत्अरि बाहौहस्ते घनोमेघोऽस्यास्तिततूघ नि चितां वाराः श्रेष्ठाः एकंकदं कंजलंददातिसःकदोमेघस्तं इति यंबकपक्षिणं दलानिपर्णानिविद्यंतेयस्यसः दली कंजलं दराद्भयाज्जा तोदरजः पक्ष्यस्यान्नेत्ररोमणि लवाः ह्रस्वकणाः यवोधान्यभेदः अंज नाभमहावारिवाहौघनिचितांबराः अंजनाभाःकज्जलवर्णायेमहावारिवाहाः मेघास्तेषामोघेनसमूहेनानिचितंव्याप्तं अंबरंआकाशंयेषुदिवसेषुते कदंब कंदलीकंदरजःपक्ष्मलवायवः ॥ कदंबानांवृक्षविशेषाणांकंदलीकंदानांचवन स्पतिविशेषाणांवरजोभिः परागैः पक्ष्मलाः पुष्टाः वायवोयेषुते ॥

॥ कुर्यादुद्वेगवंतंकमपिनिशिसरः कीदृशंकास्तिवक्त्रे ॥
॥ वक्तानिंद्यःकयास्यात्परिषदिनियतंमंदसंबोधनंकिं ॥
॥ वर्णोपांत्यंकमूचुःकिमसुररिपुणानंदगोपालयेऽस्तं ॥
॥ कःप्रालेयाद्रिपुत्रीकुचकलशलुठत्पाणिरेणांकमौलिः ॥ ५

Digitized by Google

॥ कीदृक्कस्येहबंधुः सुकृतमपहरत्प्रेयसकिायुगांते ॥
॥ कीदृग्भीतिंविधत्तेधनुरवनिरुहंकंचिदामंत्रयस्व ॥
॥ दैत्यःकंसद्विषाकःकथयविनिहतोगद्गदः कः प्रतीतः ॥
॥ कीदृक्कीदृग्वसंतः प्रियतमभवतः प्रीतयेनित्यमस्तु ॥ ६ ॥
॥ कोकिलालापवाचालसहकालमनोहरः ॥
॥ अशोकस्तवकालीनमत्तालिमधुरस्वरः ॥ ७ ॥
॥ इतिश्लोकोत्तरजातिः ॥

॥ कोकि कोकाश्चक्रवाकाःपक्षिणोविद्यंतेयस्मिन्ततत् लाला लालइतिप्रसिद्धं अथवाच हीनवाप्या हेअलस हकारं मात्रिकायां शषसह इतिहकार स्यांतत्वं अनःशकटं हरोरुद्रः अशोक शोकरहितोभ्राता तवभवतो भवति काली संहारकर्त्रीदेवी नमत् नमनशीलं हेतालि ताडनाम प्रसिद्धं मधुःनामादैत्यः अस्वरः शब्देनरहितः कोकिलालापवाचालस हकारमनोहरः कोकिलानांपिकानांआलापेनान्योन्यजल्पनेनवाचालाः स शब्दाः येसहकाराः आम्रवृक्षास्तैर्मनोहरतिसः अशोकस्तबकालीनमत्ता लिमधुरस्वरः अशोकानांवृक्षावेशेषःणांस्तबकेगुंछेआलीनाअधिव्याप्ताः येम त्ताअलयोभ्रमरास्तेषांमधुरोऽतिमिष्टः स्वरोध्वानिविशेषोयस्मिन्सः ॥

॥ खंडमर्द्धमेवउत्तरंयस्मिन्ततत्खंडोत्तरंपृष्टं ॥

॥ काचक्रेहरिणाधनेकृपणधीःकीदृग्भुजंगेस्तिकिं ॥
॥ कीदृक्कुंभसमुद्भवस्यजठरंकीदृग्यियासुर्वधूः ॥
॥ श्लोकःकीदृगभीप्सितःसुकृतिनांकीदृङ्नभोनिर्मलं ॥
॥ क्षोणीमाह्वयसर्वगंकिमुदितंरात्रौसरःकीदृशं ॥ ८ ॥
॥ कुमुदवनपरागरंजितांभौ ॥
॥ विहितगमागमकोकमुग्धरेखं ॥

Digitized by Google

कुमुद् पृथ्व्याःहर्षोकारि पृथ्वीउद्धृताइत्यर्थः अवनंपरा अवनंरक्षणंध नस्यगोपनंतत्रपरासावधाना गरंविषं जितानिपीतानिअंभांसिजलानिये नतत्जितांभः विहितगमा विहितःकृतोगमोगमनंययासा गमकः अ र्थाभिप्रायेणगम्यतेप्राप्यतेसःगमकः अकमुक् कंपानीयंमुंचंतितेकमुचोमे घाः नविद्यंतेकमुचोयस्मिन्ततत्अकमुक् मेघैरहितमित्यर्थः हेधरेहेपृथ्वी खंआकाशं कुमुदवनपरागरंजितांभोविहितगमागमकोकमुग्धरेखं कुमुदा नांचंद्रविकाशिकमलानांवनानितेषांपरागेणसुष्ठुगंधेनार्किंजल्केनवारंजितरंग युक्तंकृतं अंभोजलंयस्मिन्ततत् ईदृशंसरः प्रथमविशेषणं पुनःकीदृशं विहितौनिष्पादितौगमागमौगमनागमनेयाभ्यांतौविहितगमागमौ तौचतौ कोकौच ताभ्यांकृत्वामुग्धासुंदररेखापंक्तिर्यस्मिन्ततत् यतस्तौचक्रवाकी चक्रवाकावन्योन्यंवियुक्तौसंतौरात्रौमिलनायतीरात्रीरंपर्यटतः तयोर्गमना गमनेनजलरेखायाःभवात्रात्रौसरईदृशंइतिभावः ॥

॥ मुंडःपृच्छतिकिंमुरारिशयनंकाहंतिरूपंनृणां ॥
॥ कीदृग्वारिजनश्चकोऽतिगहनःसंबोधयावंचितं ॥
॥ काधात्रीजगतोबृहस्पतिवधूःकीदृक्कविःकादृतः ॥
॥ कोऽर्थःकिंभवताकृतंरिपुकुलंकीदृक्सरोवासरे ॥ ९ ॥

॥ विकचवारिजराजिसमुद्भवो ॥
॥ च्छलितभूरिपरागविराजितं ॥

॥ इतिखंडोत्तरजातिः ॥

हेविकच विगताःकचाःकेशायस्यसः तत्संबोधनं हेवालरहित वारि जलं महाप्रलयेहरिःशेषशय्यायांसमुद्रजलेशेतेजिरावृद्धत्वं आजिसमुद् आ जौसंग्रामेसमुत्सहर्षः भवःसंसारः हेअच्छलित हेअवंचित भूःपृथ्वी इप

रा इःकामस्तेनपराउत्कृष्टा नित्ययौवनवती गाविवाण्यां राःद्रव्यं जितंसुगमं विकचवारिजराजिसमुद्भवोच्छलितभूरिपरागविराजितं विकचानांप्रफुल्लितानांवारिजानांकमलानांराजिःपंक्तिस्तस्याःसमुद्भवउत्पन्नउच्छलितोयोभूरिःप्रचूरःपरागःसौगंध्यंतेनविराजितंशोभितं ॥

॥ पादःश्लोकचतुर्थांशएवउत्तरंयस्मिन्तत्पादोत्तरंपृष्टं ॥

॥ बिभर्तिवदनेनाकिंकइहसत्वपीडाकरं ॥

॥ कुलंभवतिकीदृशंगलितयौवनंयोषितां ॥

॥ बभारहरिरंबुधेरुपरिकांचकेनस्तुते ॥

॥ हतःकथयकस्त्वयानगपतेर्भयंकीदृशात् ॥ १० ॥

॥ विषमपादनिकुंजगताहितः ॥

विषंगरलं अपात्सर्पः नश्यंतिपादाश्चरणायस्यसः अनि नास्तिइःकामो यास्मिन्तत्अनि कंदर्परहितं कुंपृथ्वीं जगतासंसारेण अहितःशत्रुः विषमपादनिकुंजगताहितः विषमानांदुर्गमाणांपादानांप्रत्यंतपर्वतानांनिकुंजेषुगहनस्थानेषुगताःअहयःसर्पाःयस्मिन्सःविषमपादानिकुंजगताहिस्तस्मात यत्रपर्वतशिलायाअधस्तात्सर्पाःनिर्गच्छंतिततःपर्वताद्बिभीयते ॥

॥ हरिर्वहतिकांत्यवास्त्यरिपुकागताकंचका ॥

॥ कमर्चयतिरोगवान्धनवतांपुरीकीदृशी ॥

॥ हरिःकमधरद्बालिप्रभृतयोधरांकिंव्यधुः ॥

॥ कयासदसिकस्त्वयाबुधजितोऽबुधिःकीदृशः ॥ ११ ॥

॥ कुंभीरमीनमकरागमदुर्गवारिः ॥

॥ इतिपादोत्तरजातिः ॥

कुंपृथ्वीं भीःभयं ईलक्ष्मीः अंविष्णुं गता इनंसूर्यं अकरा नास्तिकरोराजदंडोयस्यांसा अगंगोवर्द्धनपर्वतं अदुःददतिस्म गवावाण्या वादेनकृत्वाऽरिःप्रतिवादीजितः कुंभीरमीनमकरागमदुर्गवारिः कुंभीराः

नक्राश्चमीनाःमत्स्याश्चमकराश्चकुंभीरमीनमकरास्तेषांआगमौआगमनगम
नेताभ्यांकृत्वादुर्गं दुस्तरंवारिजलंयस्यासौ ईदृशः समुद्रोभवति ॥

॥ चत्वार्यराणिपादाभ्यांनेमिपादद्वयेनच ॥
॥ लिखित्वादक्षिणावर्त्तंचक्रंप्रश्नमवेहिमे ॥ १२ ॥

चक्रेणरथपादेनसदृशंश्लोकबंधंविधायप्रश्नःक्रियते इत्यतश्चक्रप्रश्नं ॥

॥ कंचौरस्यच्छिनत्तिक्षितिपतिरनघःकिंपदंवक्तिकुत्सां ॥
॥ क्षोणीसंबोधनंकिंवदतिकमलभूःकाचविश्वंबिभर्त्ति ॥
॥ चक्रांगामंत्रणंकिंकथमपिसुजनःकिंनकुर्यादनार्यं ॥
॥ कीदृग्भोक्तुःपुरंस्यात्पयसिवदकुतोमीनपंक्तिर्बिभेति ॥ १३
॥ किंस्वच्छंशारदंस्याद्वदतिवृषगतिःकोंशुमालीपवित्रः
॥ कोस्मिन्किंजीवनंकांविरचयतिकविर्वन्हिसंबोधनंकिं
॥ नाकांक्षंतिस्त्रियःकंतनुरसुररिपोःकीदृशीकश्चमूकः ॥
॥ सम्यक्प्रीतिंतडागःप्रियतमतनुतेकीदृशःकीदृशस्ते ॥ १४
॥ करंकुकोककुररकलहंसकरंबितः ॥
॥ सरोजकोमलोद्गारनीरसंसक्तमारुतः ॥ १५ ॥

॥ इतिचक्रजातिः ॥

करंहस्तं कु कुशब्दोनिंदार्थः कुपुरुषः हेको हेपृथ्वि हेक हेब्रह्मन् कुःथ्वी हेअर आराइतिलोकभाषा कलहं वाग्युद्धं सकरं दंडु उक्तं वित्तःबकादिपक्षिणःसकाशात् सरस्तडागं हेअज हेशंभो कःसूर्यः अमलःमलरहितः निर्मलइत्यर्थः गाःवाणी हेर हेअग्ने नीरसं निर्गतोरसःशृंगारात्मकोयस्मात्सःनीरसस्तंसक्तमासक्तालमामालक्ष्मीर्यस्यां सा अरुतः नाविद्यतेरुतंशब्दोजल्पनंयस्मिन्सः करंतुकोककुररकलहंसकर

बितः करंकवःपक्षिविशेषाश्चकोकाश्चक्रवाकश्चकुरराःक्रौंचाश्चकलहंसाःहं सविशेषाश्चएतैःपक्षिसमूहैःकरंबितोव्याप्तस्तडागःप्रीतिकरोभवेदित्याशयः पुनःकीदृशस्तडागःसरोजकोमलोद्गारनीरसंसक्तमारुतःसरोजानांकमलो ऽधिकसौरभ्यवान्यउद्गारःउद्गिरणंनिःश्वासस्तदृशंयस्मिन्ततत् अर्थात्परिमलव त्पयसीरंजलंतेनसक्तोमारुतोवायुर्यस्मिन्तडागेसः

॥ वर्णद्वयद्वयैकैकदलभूतदलाष्टकं ॥
॥ सर्वोत्तराद्यवर्णेनपद्मंस्यात्कृतकर्णिकं ॥ १६ ॥

॥ अष्टदलैर्नालेनचसहितंपद्मंप्रश्नोत्तरं ॥ ॥

॥ पुण्यात्मावदकीदृशःसरसिजैःकेमोदिताःकीदृश ॥
॥ स्त्वद्वैरीगतचक्षुषःकुलमभूत्कीदृक्त्वयाकेजिताः ॥
॥ बद्धालिःसलिलाशयःकथयभोःकीदृक्चआक्षेपवाक् ॥
॥ शद्धःकुत्रनतस्करादिकभयंदत्तेभवेत्प्रायशः १७ ॥
॥ आप्तिंगविकीदृशंनिगदितोमुक्तःपुमान्कीदृशः ॥
॥ कस्माद्बिभ्यतिकौशिकाभुविकृतःकीदृक्त्वयातस्करः ॥
॥ हस्तीस्यान्ननुकीदृशोबहुमतःशोच्योरणःकीदृशः ॥
॥ कीदृक्षःपुरुषःपराप्रतिहतःकीदृग्भवेद्वासुकिः ॥ १८ ॥
॥ अलयःअपश्यत्अबंधःअहस्तःअगजःअहीनः ॥

॥ इतिपद्मोत्तरजातिः ॥

अलयःएकृष्णेलयोध्यानाविशेषोयस्यसः अलयोभ्रमराःअपश्यत् शीङ् स्वप्ने अदभक्षणे शयनंअत् शीश्वअच्चश्यति अपगतेश्यतीशयनभक्ष णेयस्यासौअपश्यत् मच्छत्रुः रात्रौशयनंदिवसेचादनंनकरोति भयभीत त्वात् नपश्यतिविलोकयतितत्अपश्यत् अरयःशत्रवःअरयःनास्तिरयो

वेगोयस्यसःअररे अरेइत्यर्थेअररेइतिपातः अरेनीच हीनसंबोधनेदीय ते अररेकपाटे कपाटमररंतुल्येइत्यमरः अर्थात्कपाटेदत्तेसतिगृहांतस्त स्करादेर्भयंनभवेदित्यभिप्रायः अबंधःअपांपानीयानांअंधोभक्षणंयस्यतत् सकारांतः नास्तिबंधोरज्ज्वादेर्बंधनंयस्यासौअबंधः बंधनरहितइत्यर्थ अ हस्तःदिवसात् नास्तिहस्तौयस्यासौअहस्तःहस्ताभ्यांरहितः अगजः अ गेषुपर्वतेषुजातोऽगजःपर्वतसंबंधी नविद्यंतेगजाःहस्तिनोयस्मिन्सःअगजः हस्तिरहितासेनाशोभांनलभतेइत्यर्थः अहीनं नहीनोऽहीनः समर्थइत्य र्थः अहीनः अहीनांसर्पाणांइनःस्वामी ॥

॥ काकस्येवपदंत्र्यस्रंयत्तत्काकपदंमतं ॥
॥ तिर्यगंधोन्यरेखाभिर्गोमूत्रीद्विपदीद्वये ॥ १९ ॥

॥ काकस्यपदंचरणाकृतिरिवत्र्यस्रंपदंआकारोयस्मिन्तत्काकपदंप्रश्नोत्तरं ॥

॥ कुतःकःस्यात्कीदृक्कथयविषवैद्यस्फुटमिदं ॥
॥ रिपोःकःकीदृक्षोभवतिवशगःकश्चकरभः ॥
॥ प्रवीणःसंबोध्यःसुभगवदकौरत्नवचनौ ॥
॥ सुरूपेविख्यातिंजगतिमहतीकामतवती ॥ २० ॥
॥ नागदरतः नागतनयः नागरमणी ॥

॥ इतिकाकपदजातिः ॥

नागदरतः नागानांसर्पाणांदरोभयंतस्मात् ना पुमान् गदरतः गदे षुविषापहारेषुतूषधेषुरतःआसक्तः अयमभिप्रायः यदानागेभ्योभयंभवेत्त दामनुष्योगदरतोविषवैद्यःस्याज्जांगुलीविद्याविशारदःस्यात् कुतश्चित्सर्प कीलनमंत्रपठेत् ना पुमान् गतनयः गतस्यक्तोनयोन्यायोनीतिरूपं येनासौ नागतनय नागानांहस्तिनांतनयः पुत्रः हेनागर हेविचक्षण

मणी चंद्रकांतिप्रमुखौहीरकौ नागरमणी नागानांनागकुमारदेवाविशेषा णांरमणीस्त्री तासांतौसौंदर्यविशेषणश्लाघ्यते ॥
॥ गोर्वृषभस्यमूत्रंवक्रगत्याजायतेतद्वद्वंधोयस्याः सागोमूत्रीप्रश्नोत्तरं ॥

॥ कामाद्दुर्युवतीममंगलवतीकीदृग्महाणांगतिः ॥
॥ संबोध्यावदमत्स्यवेधनपरः कीदृग्भवेत्पामरः ॥
॥ कीदृग्वाल्मिकवेश्मकोस्तनमुरोधत्तेसुरैरुच्यते ॥
॥ गीः कीदृक्नकदापिकंबुरहितंवांछंतिकंयोषितः ॥ २१ ॥
॥ कीदृक्पांथकुलंतमोहरतिकाकिंचक्रसंबोधनं ॥
॥ रम्याचंपकशाखिनः कथयकाकश्चाटचोऽर्थेभवेत् ॥
॥ किंक्षिप्तंबलिवैरिणामुरारिपोःकाष्ठाश्मशानेस्तिका ॥
॥ क्ष्माकीदृग्भवतिस्मपूर्वमधुनाकीदृक्पुनर्वर्त्तते ॥ २२ ॥
॥ अजरामशुभाचारवलिशीलविनोदिता ॥
॥ भुजंगमनिभासारकलिकालजनोचिता ॥ २३ ॥

॥ इतिगोमूत्रजातिः ॥

अजरां नास्तिजराबृद्धत्वंयस्याःसातां अशुभा शुभकारिणीनभवति हेचार हेगते वलिशी वलिशमस्यास्तिसः बडिशंमत्स्यवेधनमित्यमरः लवि लवोनामासीतारामयोःपुत्रः लवोविद्यतेयस्मिन्ततत्लवि ना पुमान् उदिता उदयंप्राप्ता यस्यपुरुषस्ययादृशउदयोभवतितस्यतादृशीदेव वाणीभवेदितिभावः भुजंहस्तं गमनि गमनंचलनंपर्यटनंविद्यतेयस्यतत् इनंतः भा कांतिः हेसार सहअरैस्तिर्यक्काष्ठविशेषैर्वर्त्तमानंसारं तत्सं बोधनं कलिका कोरकः अविकसितकलीत्यर्थः अलज्प्रत्ययः आ लजाटचौबहुभाषिणी अनःशकटं हेअ हेरुण्ण चिताप्रसिद्धाअजरा

मशुभाचारबलिःशीलावेनोदिता अजश्चरामश्चाजरामौ अजोदशरथपि
ना रामश्चसीतापतिः तयोःशुभेनआचरेण तथाबलिराजाप्रसिद्धः वा
मनेनयोयाचितः तस्यशीलेनआचरेणचवेनोदिताहर्षप्रापिता इतिपूर्वम।
सीत् अधुनाकीदृशीपृथ्वी भुजगमनिभासारकलिकालजनोचिता भु
जंगमैः सर्पैर्निभास्तुल्याःवक्रगतयोयेऽसाराः निःसत्वाःकलिकालजनाः कलि
युगमनुष्यास्तेषांमनुष्याणामुचितायोग्या

॥ वर्णेनैकेनचद्वाभ्यांसर्वैर्वासर्वादिग्गतैः ॥
॥ उत्तरंसर्वतोभद्रंदुष्करंतदिदंयथा ॥ २४ ॥

॥ सर्वतःसमंतात्वर्णस्वरान्संगृह्यप्रश्नोत्तरंक्रियतेऽतःससर्वतोभद्रप्रश्नोत्तरं ॥

॥ कस्त्यागेधातुरुक्तस्तवरिपुत्दादिकाभूषणंकेस्तनानां ॥
॥ कोदुःखीकश्चशब्दोवदतिवदशुचंकौरिपूख्यातवीर्यौ ॥
॥ शृंगारीकीदृशःकारणशिरसिभयाद्भंगमाप्नोतिसेना ॥
॥ कोदानार्थाभिधार्यीशिरासिशिरासिकौयुद्धयतः संप्रत्दत्य २५
॥ कीदृक्कोयार्थिनीस्त्रीभवतिमदकरः प्रायशःकोदुराढ्यो ॥
॥ कस्मिन्मंदायतेसौनियतमुडुपतिः प्रेयसीकामुरारेः ॥
॥ विख्यातौबाहनौकौद्रुहिणमुरभिदोः कीदृगाखेटकस्त्री ॥
॥ कीदृंगैवाचिराभासमितिगतभयाः केगतौकश्चधातुः २६

॥ हारावी ॥ इतिसर्वतोभद्रजातिः ॥

कस्त्यागइतिश्लोकद्वयेएकोनविंशतिपृष्ठानिसंति हरावीत्यक्षरत्रयेष्वेकोनविं
शत्युत्तराणिज्ञेयानिधीमद्भिः हारावीत्यतएवहइति ओहाक्त्यागे ॥ १ ॥
आरा आराचर्मप्रभेदिका चर्मकाराणांचर्मवेधनशस्त्र शत्रूणांत्रादिआरासद्द
शंदुःखंवर्तते ॥ २ ॥ हाराः पुष्पाणांमुक्तानांचहाराः प्रसिद्धाः ॥ ३ ॥

अहावी नविद्यतेहावोमुखविकारोयस्यासौअहावी दुःखिनोजनस्यमुखेहावो हास्यादिविक्रियानभवेदित्यभिप्रायः ॥ ४ ॥ हा हाइतिखेदे ॥ ५ ॥ वी उथइश्वरी उः ईश्वरः इः कामः ईश्वरानंगयोर्वैरंप्रसिद्धमेवास्तिअनंगो हिरुद्रेणदग्धः ॥ ६ ॥ हावी मुखविक्रियाहास्यादियुक्तः ॥ ७ ॥ अवीरा वीरैः सुभटैः रहिता अवीरासेनाभनक्ति ॥ ८ ॥ रा रोदने रा इत्ययं धातुर्दानेऽस्ति ॥ ९ ॥ अवी मेषी ऊर्णायू ॥ १० ॥ श्लोक ॥ २५ ॥ अवीहा अश्रुजलेईहावांछायस्याः साअवीहा ॥ ११ ॥ राः द्रव्यं ॥ १२ ॥ राहौ निधं ओदे ग्रहे ॥ १३ ॥ ई लक्ष्मीः ॥ १४ ॥ वी विश्वविश्वर्व पक्षिणौ हंसगरुडावित्यर्थः ब्रह्मणोवाहनंहंसः कृष्णस्यवाहनंगरुडइतिप्र सिद्धं ॥ १५ ॥ वीहा विषुपक्षिषुईहावांछायस्यासा ॥ १६ ॥ वीरा विग ताइराजलंयस्यांसावीरा जलरहितानभवतीत्यर्थः ॥ १७ ॥ वीराः यो द्धारः ॥ १८ ॥ हाओहाङ्गतौ ॥ १९ ॥ एतेसर्वेऽप्यर्थाःहारावीएते ष्वेववर्णेशुभवंत्यतएव सर्वतोभवतीतिसर्वतोभद्रंनामयथार्थं ॥

॥ प्रतिलोमानुलोमाभ्यामुत्तरेणगतागतं ॥

॥ मध्यवर्णाविलोपेनतच्चानेकप्रकारकं ॥ २७ ॥

गतंचप्रत्यागतंचगतप्रत्यागते तेविद्येतेयस्मिन्ततद्गतप्रत्यागतंप्रश्नोत्तरं

॥ वदवल्लभसर्वत्र साधुर्भवतिकीदृशः ॥

॥ गोविंदेनासिक्षिप्ते नंदवेश्मनिकाऽभवत् ॥ २८ ॥

॥ क्षीरनदी ॥

॥ अनेकप्रकारकंभवति क्षीरनदी एतच्चपदप्रतिलोमंवाच्यं प्रतिलोमं वामावाचनाअनुलोमोदाक्षणवाचनाच दीनरक्षीइत्येवंस्यात् अस्यायमर्थः दीन न् दुः स्थान् भिक्षाचरादीन् रक्षतइत्येवंशीलोदीनरक्षी दीनपा

श्लकइत्यर्थः क्षीरनदो क्षीरंदुग्धंतस्यनदीजाता द्वितीयवारंअनुलोमंवाच्यं ॥

॥ यत्नादन्विष्यकाग्राह्यालेखकैर्मसिमल्लिका ॥
॥ घनांधकारनिःशंकंमोदतेकेनबंधकी ॥ २९ ॥

॥ नालिकेरजा ॥

॥ नालिकेरजा ॥नालिकेराज्जातानालिकेरजा ॥ नालिकेरफलंप्रसिद्धं ॥ तद्वृक्षसक्तपत्रांतःशलाकायाः ॥ लेखिनीसमीचीनाभवेत् ॥ एतदेवप्रतिलोमंवाच्यते ॥ जारकेलिना ॥ उपपतिस्तुजारस्यात् ॥ जारेणसहकेलिः क्रीडातया ॥

॥ असुरसुरनरेंद्रेरुह्यतेकाशिरोभि ॥
॥ स्तनुरपिशुचिवस्त्रेकातिविस्तारमेति ॥
॥ वदतिकमलयोनिः सेव्यतेकेनपुष्पं ॥
॥ मधुरमसृणमृद्वीकाभवेदुत्पलस्य ॥ ३० ॥

॥ मालिका ॥ कालिमा ॥

मालिका मालाएवमालिका पुष्पादिमालादेवामाशिरसिशाश्वतीभवत्येव तदेवप्रतिलोमंवाच्यं कालिमा श्यामता उज्ज्वलेवस्त्रेमषीबिंदुरेषाऽपि बहुविस्तारंप्राप्नुयादितिभावः कालिना हेक हेब्रह्मन् अलिनाभ्रमरेण तदेवप्रतिलोमंवाच्यं नालिका नालीएवनालिका नालं इदंचप्रश्नचतुष्टयमंथानाकृत्यालिखित्वावाचनोयंतथाकृतेमध्यस्थोलिकारश्चतुरोवारान्वाच्यते

॥ हिमांशुखंडंकुटिलोज्ज्वलप्रभं ॥
॥ भवेद्वराहप्रवरस्यकद्दिशं ॥
॥ विहायवर्णपदमध्यसंस्थितं ॥

॥ नकिंकरोत्येवजिनःकरोतिकिं ॥ ३१ ॥

॥ दंष्ट्राभं ॥

दंष्ट्राभं दंष्ट्रादाढा दंष्ट्रावत्आभाशोभायस्यतत् अथवा दंष्ट्राइवभा तिदीपतेतत् द्वितीयायामुदयंप्राप्तश्चंद्रोवक्रोज्ज्वलगुणेनसूकरदंष्ट्रयासहो पमीयते दंष्ट्राभमित्यत्रमध्यस्थः ष्ट्राइतिवर्णस्त्यज्यते पश्चाद्गतप्रत्यागत रीत्यावाच्यं तच्चदंभमितिस्यात् जिनोदंभंकपटंनकरोति ।विपरीतवाच नयाभंदामितिस्यात् जिनोभंदंकल्याणंकरोति भदिकल्याणे एवंमध्य स्थितवर्णलोपेनगतप्रत्यागतंदर्शितं ॥

॥ वसंतमासाद्यवनेपुकीदृशाः ॥

॥ पिकेनराजंतिरसालभूरुहाः ॥

॥ निरस्यवर्णद्वयमत्रमध्यमं ॥

॥ तवद्विषांकांत्यतमातिथिश्चका ॥ ३२ ॥

॥ कांतगिरा ॥ इतिगतप्रत्यागतजातिः ॥

कांतगिरा कांतामनोहरागीर्वाणीयस्यासौकांतगीःतेनकांतगिरा अत्रोत्तर मध्यादनुस्वारअयंहिमंथानाकृतिचित्रबंधः मंथानं रवाइनुंफूलइतिभाषा तस्यकृतिराकारः तद्वच्चित्रबंधः तकारगिकारस्वंवर्णद्वयंत्यत्वाच्यं कारावंदिगृह वामवाचनया राका राकापूर्णेनिशाकरे पूर्णेमासेजा तत्वाद्राकापूर्णमासी अनेकप्रकारकंदर्शितं

॥ आदौमध्येतथांतेवावर्द्धतेवर्णजातयः ॥

॥ एकाद्वित्रादयोयत्रवर्द्धमानाक्षरंहितत् ॥ ३३ ॥

वर्द्धमानानिअक्षराणियस्मिन्तत्वर्द्धमानाक्षरंप्रश्नोत्तरं

॥ किमनंततयाख्यातंपादेनव्यंगमाह्वय ॥

Digitized by Google

॥ जनानांलोचनानंदंकेतन्वंतिघनात्यये ॥ ३४ ॥

खं आकाशं आकाशस्यसर्वत्रवर्त्तमानत्वादंतोनास्ति हेखंज हेखोड खंजनाः मध्यदेशेपोदनोनामपक्षिविशेषःखंजनउच्यते अत्रत्वेकैकाक्षरवृध्याउत्तरत्रपंक्तं

॥ उरःस्थलंकोत्रविनापयोधरं ॥

॥ बिभर्त्तिसंबोधयमाहृताशनं ॥

॥ वदंतिकंपत्तनसंभवंजनाः ॥

॥ फलंचकिंगोपवधूकुचोपमं ॥ ३५ ॥

॥ नागरंगं ॥

ना पुमान् हेनाग हेसर्प नागर नगरे भवोनागरस्तं नागरंगं नारंगीफलं अत्रैकैकाक्षरवृद्ध्याप्रश्नोत्तराणिद्रष्टव्यानि

॥ प्रायेणनीचलोकस्यकःकरोतीहगर्वतां ॥

॥ आदौवर्णद्वयंदत्वाब्रूहिकेवनवासिनः ॥ ३६ ॥

॥ शबराः ॥

राःद्रव्यं शबराःभिल्लाः इतिपाश्चादक्षरप्रदानेनोत्तरंदर्शितं

॥ सानुजःकाननंगत्वानैकषेयान्जघानकः ॥

॥ मध्येवर्णत्रयंदत्वारावणःकदृशोवद ॥ ३७ ॥

॥ राक्षसोत्तमः ॥

रामःदाशरथिः एतस्यएवोत्तरस्यरकारमकारयोर्मध्येत्रीण्यक्षराणिक्षसोत्तइतिलिखित्वावाच्यं राक्षसोत्तमइतिस्यात् राक्षसानांमध्येउत्तमःश्रेष्टः इत्येवंमध्येवर्णप्रदानेनवर्द्धमानंदर्शितं

॥ धत्तेवियोगिनीगंडस्थलपांडफलानिका ॥

Digitized by Google

॥ वदवर्णौविधायांतेसीत्यत्दृष्टाभवेत्कया ॥ ३८ ॥

॥ लवलीलया ॥

लवली लताविशेषःअस्यैवोत्तरस्यांतेवर्णौद्वौलयाइतिकृत्वावाच्यं लवलील या लवोनामपुत्रस्तस्यलीलाक्रीडातया इत्येवमंतेवर्णप्रदानेनवर्द्धमानंदर्शितं

॥ विष्णोःकावल्लभादेवीलोकत्रितयपाविनी ॥
॥ वर्णावाद्यंतयोर्दत्वाकःशब्दस्तुल्यवाचकः ॥ ३९ ॥
॥ समानः ॥ इतिवर्द्धमानाक्षरजातिः ॥

मालक्ष्मीः एतस्यैवादौसकारोअंतेनकारश्चएतौवर्णौदत्वावाच्यं समानः तुल्यः इत्येवमादावंतेचवर्णप्रदानेनवर्द्धमानंदर्शितं

॥ आदितोमध्यतोंताद्वाहीयंतेवर्णजातयः ॥
॥ एकद्वित्र्यादयोयत्रहीयमानाक्षरंहितत् ॥ ४० ॥

हीयमानानिअक्षराणियस्मिन् ततूहीयमानाक्षरंप्रश्नोत्तरं

॥ वसंतमासाद्यवनेपुराजतेविकाशिकिंवल्लभपुष्पमुच्यतां ॥
॥ विहंगमंकंचपरिस्फुटाक्षरंवदंतिकंपंकजसंभवंविदुः ॥ ४१ ॥

॥ किंशुकं ॥

किंशुकं किंशुकःपलाशःखाखरो किंशुकेभवंकिंशुकं केसूडंफूल अत्र तदेवआदिमवर्णपरिहारेणवाच्यं शुकंकीरं शुकपक्षीशुद्धंवदति अत्रापि द्वितीयस्यापिवर्णस्यत्यागेनवाच्यं कंब्रह्माणं विष्णोर्नाभिकमलेब्रह्माजातः कःशब्दोब्रह्मवाचकःप्रसिद्धः

॥ समुद्यतेकुत्रनयातिपांसुलासमुद्यतेकुत्रभवंभवेज्जलात् ॥
॥ समुद्यतेकुत्रतवापयात्परिःप्रहृणिसंबोधनवाचिकंपदं ४२ ॥

॥ हिमकरे ॥

हिमकरेचंद्रेउद्गतेसति उद्योतत्वादन्यत्रयातीदृश्यतेअतोनयाति तद्विधानांतासांत्वंधकारएवसमीचीनः उक्तोत्तरमध्यात्हिइतिप्रथमाक्षरत्यागेनरुत्वोच्यते मकरे मकर मत्स्येउत्पन्नेसतिद्वितीयाक्षरत्यागेनवाच्यते करेहस्ते सायुधेउद्धृतेसतिशत्रुर्भज्यते तृतीयाक्षरत्यागेनवाच्यते रे रेदासइतिचामत्रणे एवमादितएकैकाक्षरहान्याहीयमानंदर्शितं

॥ तपस्विनोत्यंतमहासुखाशया ॥
॥ वनेपुकस्मैस्पृहयंतिसत्तमाः ॥
॥ इहापिवर्णद्वितयंनिरस्यभोः ॥
॥ सदास्थितंकुत्रचसत्वमुच्यतां ॥ ४३ ॥

॥ तपसे ॥

तपसे तपोगुणाय तपस्विनांहितपरत्वप्रियंभवति वर्णद्वयत्यागारेइत्यवशिष्यते सकारभावःसकारेवर्त्तते अत्राक्षरद्वयहान्याहीयमानाक्षरोदाहरणं दर्शितं

॥ पुरुषःकद्विशोवेत्तिप्रायेणसकलाःकलाः ॥
॥ मध्यवर्णद्वयंत्यक्त्वाब्रूहिकः स्यात्सुरालयः ॥ ४४ ॥

॥ नागरिकः ॥

नागरिकः नगरनिवासीचतुरोवा एतस्यैवमध्यात्गरीतिवर्णद्वयंत्यज्यते तदानाकइतिस्यात् नाकःस्वर्गः अत्रमध्यवर्णद्वयहानिर्दर्शिता

॥ यजमानेनकःस्वर्गहेतुःसम्यग्विधीयते ॥
॥ विहायाद्यंतयोर्वर्णौगोत्वंकुत्रस्थितंवद ॥ ४५ ॥

॥ यागविधिः ॥ इतिहीयमानाक्षरजातिः ॥

Digitized by Google

यागविधिःयजनंयागःयज्ञोदानंवा तस्यविधः यस्यप्रोक्तकरणंविधिः होमदानविधिरित्यर्थः यागविधिरित्येतन्मध्यात्प्रथमांतिमवर्णंत्यज्यतेतदाग विइतितिष्ठति गविशब्देगोत्वंवर्त्तते एवमाद्यंतवर्णयोस्त्यागेनहीयमानाक्षरं दर्शितं

॥ अन्योन्याक्षरवर्त्तिन्याचैकांतरतयाऽथवा ॥
॥ शृंखलाबंधइत्युक्तोग्रंथिमान्नागपाशकः ॥ ४६ ॥

शृंखलायाःइवशृंखलाकारेणबंधोरचनाविशेषःशृंखलाबंधःप्रश्नोत्तरं

॥ पवित्रमतितृप्तिकृत्किमिहकिंभटामंत्रणं ॥
॥ ब्रवीतिधरणीधरश्चकिमजीर्णसंबोधनं ॥
॥ हरिर्वदतिकोजितोमदनवैरिणासंयुगे ॥
॥ करोतिननुकःशिखंडिकुलतांडवाडंबरं ॥ ४७ ॥

॥ पयोधरसमयः ॥

पयोजलं पश्चात्यवर्णत्यागात् अग्रेतनवर्णग्रहणेनवाच्यते हेयोध अत्र पकारस्यक्तः अग्रेतनधकारोगृहीतः पश्चात्यरीत्या हेधरहेपर्वत हेरस हेअजीर्ण पर्वतंप्रतिअजीर्णसंबोधनं उक्तं हेसम मालक्ष्मीस्तयासहवर्त्त मानःसमः तत्संबोधनंहेहरे मयः मयोनामाकश्चिदैत्यविशेषोहरेणहतइ तिभावार्थः पथोधरसमयः पयोधरस्यसमयःकालः मेघागमेहिमयूराःवि शेषेणनृत्यंति

॥ भवतिजयिनीकाजैसेनाव्हयाधरभूषणं ॥
॥ वहतिकिमहिःपुष्पंकदिक्षुसंभसमुद्भवं ॥
॥ महतिसमरेवैरीवीरित्वयावदकिंकृतः ॥
॥ कमलमुकुलेभृंगःकदिक्पिवन्मधुराजते ॥ ४८ ॥

॥ परागरंजितः ॥ इतिशृंखलाजातिः ॥

Digitized by Google

पराउत्कृष्टा हेराग पूर्ववदत्रापिपाश्चात्योवर्णस्त्यज्यतेऽग्रेतनोगृह्यते रागोआरक्तत्वं अधरस्यआरक्ततैवप्रशस्यते गरं गरलं रंजि रंजतीत्येवं शीलंतत् रंगयुक्तं रंजरागे सुगमं परागरंजितः परागेणकेसरेणरंजितः प्रीणितमनाः लोहमयीशृंखलाकटकवत्अन्योन्यंअक्षराणिसंकल्पंतेऽतः.

शृंखलाजातिः

॥ आव्हानंकिंभवतिहितरोःकस्यचित्प्रश्नविज्ञाः ॥
॥ प्रायःकार्यंकिमापिनकुलौकुर्वतेकेपरेषां ॥
॥ पूर्णंचंद्रंवहतिननुकापृच्छतिम्लानचक्षुः ॥
॥ केनोदन्याजनितमसमंकष्टमामोतिलोकः ॥ ४९ ॥

॥ नीरापकारेण ॥

॥ नीरापकारेणेत्यस्मिन्नेकाक्षरपरिहारेण अत्रद्वितीयोराइतिवर्णः परित्यज्यते हेनीप हेवृक्षविशेष प्राग्वदेकांतरितवर्णग्रहणेन परे अन्ये आत्मनःकार्याणिसर्वेकुर्वंति परकार्यंकुत्रचिरलः राका पूर्णिमा अत्रपूर्वयेवर्णाः परित्यक्तास्तएवयोज्यंते हेकाण एकाक्ष सर्वैरेवाक्षरैः नीरापकारेण नीरस्यजलस्यअपकारोअभावस्तेन नीरंविनातृषाकष्टंददाति

॥ कासंबुद्धिःसुभटभवतोब्रूहिपृच्छामिसम्यक् ॥
॥ प्रातःकीदृग्भवतिविपिनंसंप्रवृद्धैर्विहंगैः ॥
॥ लोकःकस्मिन्पृथयतिमुदंकात्वदीयाचजैत्री ॥
॥ प्रायोलोकेस्थितामिहसुखंजंतुनाकीदृशेन ॥ ५० ॥
॥ वीहारसेविना ॥ इतिएकांतरितशृंखलाजातिः ॥

हेवीर अत्रापिप्राग्वदेकांतरिताएववर्णागृह्यंते रविरवःशब्दोविद्यतेयस्मिन्ततत् रवि शब्दयुक्तं त्यक्ताक्षरसंयोजनयाउत्तरंकर्त्तव्यं हासे हास्ये

सेना सैन्यंवीहारसेविना वीहारउपवनादिषुखेलनं देवायतनं जिना लयंवा वीहारंसेवतेइत्येवंशीलोवीहारसेवी तेन अथवा वीहारस्यसेवाविद्यतेयस्यासौ तेन वीहारसेवायुक्तेनमनुष्येण सुखमनुभूयतइत्यर्थः एकांतरि तवर्णगृहणेनात्रशृंखलाबंधस्यद्वितीयोभेदः

॥ ग्रंथिमान्नागपाशकःयस्मिन्नागपाशबंधेग्रंथिर्बध्यतेसःग्रंथिमान् नागा नांसर्पाणांपाशबंधएवनागपाशकःप्रश्नोत्तरं ॥

॥ गोष्ठीविदग्धजनवत्यपिशोचनीया ॥

॥ कीदृक्भवेत्तरणिरश्मिषुकासदास्ति ॥

॥ दुर्वारदर्पदलितामरनायकापि ॥

॥ कीदृश्यकारिसुरशत्रुचमूगृहेण ॥ ५१ ॥

॥ तारकविरहिता ॥

प्रथमाक्षरद्वयत्यागेनवाच्यते कविरहिता कविनापंडितेनरहिता अंत्याक्षरद्वयत्यागेनपश्चादनुपूर्व्यावाच्यते रविकरतारवेःसूर्यस्यकरताकिरणभावः अत्रप्राक्कविरहितेत्युत्तरंकृत्वा पश्चात्तरविकरताइत्युत्तरंकृतं एवंकविरवि एतयोर्मध्येवेइतिवर्णोनागपाशबद्धः तत्बद्धत्वंचबंधदर्शनात्ज्ञेयंप्रश्नार्थविद्व द्भिरिति तारकविरहिता तारकनामादैत्यस्तेनविरहितावियुक्ताकृता

॥ कीदृक्परैरुपहतोभवतिक्षितीशः ॥

॥ पृच्छत्यनुज्ञइहकिंविदितंपवित्रं ॥

॥ विच्छिन्नपाणिचरणोजनकोयदीयः ॥

॥ कीदृक्परैरभिहितःसपुमान्पुनःस्यात् ॥ ५२ ॥

॥ व्यंगतनयः ॥ इतिनागपाशजातिः ॥

अत्राप्येकाक्षरपरिहारेणवाच्यते गतनयः गतस्त्यक्तोनयोन्यायोयेनासौ अन्यायीराजा अंत्याक्षरैकत्यागेनपश्चादनुपूर्व्यावाच्यते हेनत हेअप्रांशो

त्रामन गव्यं गोरेदंगव्यं गोमूत्रंगोमयंक्षीरंदधिसर्पिः इतिपंच व्यं गतनयः विगतानिअंगानिहस्तादीनियस्यासौव्यंगस्तस्यायंतनयःपुत्रःइत्यु च्यपारैः अत्रापिगतनत एतयोर्मध्यस्थतकारोग्रंथिगत्याबाध्यते ऽतएव

नागपाशः नागपाशजातिरिति

॥ भाषाभिश्चित्रितंयत्स्यात्संस्कृतप्राकृतादिभिः ॥
॥ संतश्चित्रंतदिच्छंतिसंशुद्धंत्वेकभाषया ॥ ५३ ॥

संस्कृतप्राकृतादिभिर्भाषाभिर्यच्चित्रितंरचितंस्यात् तत्पृष्ठंचित्रंनाम संस्कृ तंप्राकृतंचैवसौरसेनीचमागधी पैशाचीचाप्यपभ्रंशोषड्भाषाःविबुधैःस्मृताः

॥ किंनस्यात्कीदृक्षंमहतोपिचतादृशस्यजलराशेः ॥
॥ दिणमणिकिरणाफंसणपडिबुब्भंहोइकिंगोसे ॥ ५४ ॥

॥ कमलवणं ॥

कंपानीयं अलवणं लवणं क्षाररसस्तेनरहितंनभवति समुद्रस्यजलंक्षा रमेवभवेत् सप्तानामपिसमुद्राणांमध्येप्रथमोलवणसमुद्रः लवणक्षीरदध्या ज्यसुरेक्षुस्वादुवारयःइतिसप्तसमुद्राः इतिसंस्कृतेनपृष्टंसंस्कृतेनोत्तरंदत्तं अ थप्राकृतेनपृच्छतिप्राकृतेनैवोत्तरंददाति दिणमणिति अस्यसंस्कृतंलि ख्यते दिनमणिकिरणस्पर्शनप्रतिबुद्धंभवतिकिंप्रातः इति उत्तरं

कमलवणं कमलानांवनं यणमितिप्राकृतभाषा

॥ मत्स्यहितंबुकीदृक्पृच्छातिरोगानिशासुकिंभाति ॥
॥ कोऽनंगोवदातिमृगःखेगम्मकेरिसारइणा ॥ ५५ ॥
॥ अविसामभमिरेण ॥ इतिसंस्कृतप्राकृतजातिः ॥

अवि नविद्यंतेवयःपक्षिणोयस्मिन्ततत् पक्षिरहितं बकादिपक्षिणोमत्स्या न्ग्रंति हेसाम हेसरोग आमोरोगस्तेनसहवर्त्तमानः तत्संबोधनं भंन क्षत्रं हेएण हेमृग ईःकामः अनंगः अग्रेप्राकृतरीत्याचोच्यते खेग-

म्मइकेरिसारविणा अस्यसंस्कृत आकाशेगम्यतेकीदृशेनसूर्येणइति उ० ॥ अविसामभमिरेण अविश्रामभ्रमिणा अविश्रामाविश्रामरहिताभ्रमिर्भ्रमणं यस्यसःतेन भ्रमिशद्धस्यभमिरइत्यादेशःप्राकृतभाषायां विश्रामरहितभ्रमणशीलोसूर्योगगनेभ्रमन्कुत्रापितिष्ठतीतितात्पर्यं इतिसंस्कृतयुक्तप्राकृतोदाहरणं

॥ प्रायोबिभ्यतिकीदृशादरिगजाद्दंतप्रहीणागजाः ॥
॥ पृथ्वीसंप्रतिकीदृशीनृपतिनाराजन्वतीराजते ॥
॥ प्रायःप्रावृषिकीदृशीगिरितटीधत्तेचकःकज्जले ॥
॥ मब्भान्नच्चलिएघणुच्चयदिणेजादंसरोकेरिसं ॥ ५६ ॥
॥ सरदादवताविदबाहिरं ॥

सरदात् रदाभ्यांदंताभ्यांसहवर्त्तमानःसरदस्तस्मात्निर्दंतेनगजेनसदंतहस्तिनासहयोद्धुमशक्यमितिभावः अवता अवरक्षपालने अवतीत्यवनतेन अवतारक्षता विदवा विगतोदवोवनवान्हिर्यस्यांसा अहिःशेषनागः अं विष्णुं अग्रेअपभ्रंशभाषया मब्भन्नेइत्यादि अस्यसंस्कृतं मध्यान्हेचलितेघनात्ययदिनेजातंसरःकीदृशं उ० सरदादवताविदबाहिरं शरदातपतापितबाह्यं शरदआतपेनतापितंबाह्यंबहिर्भागोयस्यतत्

॥ कुत्तंकीदृशमंगंदंतभवंकंवदंतिविद्वांसः ॥
॥ अतिलघुवाचिपदंकिंकेरिसुसुयणेसुहोइजणो ॥ ५७ ॥
॥ विस्रतमणु ॥ इतिसंस्कृतापभ्रंशजातिः ॥

विस्रं पूतिगंधस्तुदुर्गंधोविस्रंस्यादामगंधियदित्यमरः पूतिगंधमदित्यर्थः तं तकारं लृतुलसानांदंताः इतिवचनात्तकारोदंत्यः अअणु स्तोकं वा अणुःपरमाणुः अग्रेचतुर्थपदेऽपभ्रंशभाषा केरिसइति अस्यसंस्कृतं

कीदृशःस्वजनेषुभवतिजनः उ० विस्रंतमणु विश्रांतंविश्वस्तंमनोयस्या सौ इतिसंस्कृतयुक्तापभ्रंशोदाहरणं

॥ किंसुखमाहुःप्रायःकेशयिकारंचकाहरिर्दयिता ॥
॥ कथमाभाकस्मिन्निशिकोलुच्चद्रवीलपुलिशाणं ॥ ५८ ॥

॥ शमलकम्मालंभे ॥

शसुखं अलकं अलकाश्चूर्णकुंतलाइत्यमरः मालक्ष्मीः अलंअतिशयेन भे नक्षत्रे अतःपरंमागधीभाषा कोलुच्चइवीलपुलिशाणमिति अस्यसंस्कृतं कारोचतेवीरपुरुषेभ्यः उ० शमलकम्मालंभे समरकर्मारंभः समरस्यसंग्रामस्यकर्मकार्यं तस्यआरंभः वीरपुरुषाणामिष्ठोभवति वीरपुरिसाणमितिचतुर्थ्यर्थेषष्ठि मागधीभाषायांसकारस्यशकारः तथारकारस्यलकारइतिभावः

॥ कःस्तंबेरमसुतइतिविख्यातःपृच्छतिस्फुटंहरिणः ॥
॥ अहिणवणयलीलन्नोअसाहुणोकेणउज्जुडइ ॥ ५९ ॥

॥ कलभएण ॥ इतिसंस्कृतमागधिकं ॥

हेएण हेमृग कलभःहस्तिपुत्रः द्वात्रिंशद्वार्षिकोहस्तीकलभइति अत्रोत्तरार्द्धेमागधीभाषा अहिणवेति अस्यसंस्कृतं अभिनवनगरीलोकोऽसाधोःकेनत्यजाति ॥ उ० कलभएण करस्यदंडस्यभयेन राज्ञोदंडभयेन लोकाउज्जडंति नपश्यंतीत्यर्थः इतिसंस्कृतयुक्तमागधीभाषोदाहरणंदार्शितं

॥ कोपारुणंकिमरुणाग्रसरस्यपूर्व ॥
॥ काष्ठाग्रनिष्ठिततनोरुपमानपात्रं ॥
॥ पत्तंखणेणमरणंसअरःसरण्णं ॥
॥ पुत्तेहिकिंपविसिउण्णतुरंगमत्थं ॥ ६० ॥

Digitized by Google

॥ कपिलपणं ॥

कपिलपनं कपेर्मर्कटस्यलपनंमुखं कपिवदनमथारक्तंभवति अग्रेपैशाचीभाषा पत्तमित्यादि अस्यसंस्कृतं प्राप्तंक्षणेनमरणंसगरस्यराज्ञः पुत्रैर्विंशद्भिरिहकिंचतुरंगमार्थं उ० कपिलपनं कपिलनाम्नऋषेर्वनं तत्प्रतिप्रवेशंकुर्याद्भिस्तैः तत्क्षणात्एवमरणंप्राप्तमित्यर्थः कपिलपनमित्यत्रपैशाच्यांवनशब्दस्यआदिवकारस्यपकारत्वेनश्रवणात्पनमितिस्यात्

॥ कंप्रीणयंतिजलदाःसैन्यंकीदृक्पलायतेसमरात् ॥
॥ धत्तेशिरोधराकिंरुत्तशिरंकेरिसंहोइ ॥ ६१ ॥

॥ चातकंकातरंगं ॥ इतिसंस्कृतपैशाचिकं ॥

॥ चातकंबप्पीहं कातरं भीरु कं मस्तकं चतुर्थपदपैशाचीरुत्तेति अस्यसंस्कृतं रुद्रशिरःकीदृशंभवति उ० चातकंकातरंकं जातगंगातरंगं जाताउत्पन्नाः गंगायास्तरंगाः लहर्योयस्मिन्नतत् रुद्रस्याशिरसःसकाशात् एवगंगानिःसरति अत्रपैशाच्यांजकारस्थानेचकारगकारस्थानेककारोदर्शितः इतिसंस्कृतयुक्तपैशाचीभाषोदाहरणंदर्शितं ॥

॥ कोवर्णाद्यःक्कचजलधिसुताकंचदीर्घादिसंज्ञं ॥
॥ प्राहुर्बुद्धाःकमजयदसौतार्किकैःकेक्रियंते ॥
॥ आमंत्र्योविःकथयविदितंकिंपदंहेतुवाचि ॥
॥ जाणच्चेडंमहइमहिलासाविबोल्लेइकीसे ॥ ६२ ॥

॥ अरोचम्मारंवादावेहि ॥

अः अकारः मात्रिकायांद्विपंचाशद्वर्णेषुस्वराणांमध्येप्रथमोऽकारः स्वरएवास्ति यथा अइउण् ऋलृक् इत्यादिषुपाठः ए अःशब्दःकृष्णवाचकस्तस्मिन् ए कृष्णे चं चकारं मारं कंदर्पं प्रायेजिनेनैवकंदर्पोजितः जिनस्यसर्वथाऽपस्त्रीसंगोनास्ति अतएवेदमुक्तंमदाः अन्योन्यंसंस्कृतजल्पना

दिशास्त्रकलहाः हवे हेपाक्षिन् यतोऽर्थोअतोऽग्रेलौकिकभाषा जाण चीएइतिअस्यार्थः जाया महिला स्त्री हि णच्ची नर्त्तायेतुं ए एत्य इमइआ याति सा वि अपिनिश्चितं कीदृक् बोल्लेइ जल्पति उ० अएचम्मा वादाहेवी अएइतिआमंत्रणे चाम्मारंढोलं वादावेहिवादय अस्यसंस्कृत अयेमृदंगंवादय अहंनर्त्तयामि त्वंवादयवादयेतिजल्पंतीआगच्छेत्

॥ शङ्खःकःस्यात्पुरुषवचनंकुंडलीकौस्मरारेः ॥
॥ कामंभोयेहरिरुदहरद्वीवधःपृच्छतीदं ॥
॥ हांडीकुंडीअणिसिनरडाकीसअल्लारएत्थं ॥
॥ जापुच्छिल्लासपुणपरिहारुत्तरंकिसदेइ ॥ ६३ ॥
॥ नाहीकुंभार ॥ इतिसंस्कृतलौकिकं ॥ इतिचित्रजातिः ॥

नापुमान् अही सर्पौ कुंपृथ्वीं हेभार अग्रेलौकिकभाषा हांडीकुंडा इत्यादि नरडाइतिनरसंबोधनं अल्लारएत्थमस्मदर्थौ हांडीकुंडीलोक भाषा हंडिकाःभांडानि कुंडिकाःकुंडानि कीसकथं अणिसि ना नयासे इत्येवंजोपुच्छिल्ला यःपृच्छेत् तस्यसपुण सःश्रोता तंपुनः प रिहारुत्तरं प्रत्युत्तरं कीसदेइ कीदृक्ददाति अस्यारकीभूंतसंस्कृतं हे नर अस्मदर्थंहंडिकाःकुंडिकाःकथंचनआनयसि एवंयःपृच्छेत् तस्यसःश्रो ता तंप्रति पुनःप्रत्युत्तरंकीदृक्ददाति उ० नाहीकुंभार नास्तिकुंभा रः कुंभकारंविनाभांडानिकुतआनयामीत्युत्तरंदीयते इतिसंस्कृतयुक्तलौ-

किकभाषोदाहरणंदर्शितं
॥ एकभाषायासंशुद्धंप्रश्नोत्तरं ॥

॥ कोनिवसइसच्छंदंसुंदरागिरिगहणकुंजमब्भम्मि ॥
॥ सहअजुणेणजोब्भुंसिहिगमणोकेरिसोहोइ ॥ ६४ ॥
॥ सरभससवराहवग्गो ॥

अथशुद्धप्राकृतं कोनिवसइइति व्याख्या हेसुंदर सुभग गिरेर्गहनेपर्वतस्यकठिनेकुंजमध्ये स्वच्छंदंस्वेच्छया कोनिवसति उ० समग्रेण सरभससवराहवग्गो सरभाअष्टापदाः शशाःप्रसिद्धाः वराहाः सूकराः तेषांवर्गसमूहः कुंजेनिलीनस्तिष्ठति निकुंजकुंजौवाङ्कीबेलतादिपिहितोदरेइत्यमरः तथासहअज्जुणेणेति शिखीमयुरोगमनंयस्यसःशिखिगमनः कार्त्तिकेयोऽर्जुनेनसहयोद्धुंयुद्धंकर्तुंकीदृशोभवति उ० तैरेवाक्षरैः सरभसाः वेगवंतः ईदृशाःपेशबराः भिल्लास्तैःसार्द्धं आहवंसंग्रामेगच्छतीतिआहवगः आहवग्योऽग्रगामीवा ॥

॥ काहरइमणंपइणोगुणगणजुव्वणसलाहणिजुस्स ॥
॥ कयचडचडत्तिसद्दाहुयासाकेरिसाहुंति ॥ ६५ ॥
॥ सरिसवहुया ॥ इतिशुद्धप्राकृतं ॥

काहरइइति गुणानांगणेनसमूहेन यौवनेनच श्लाघ्यस्य चपुनरार्यस्यश्रेष्ठकुलेजातस्य आर्यपुत्रस्येत्यर्थः ईदृशस्यपइणो पत्युर्मनःकाहरति उ० सरिसवहुया सदृशीसमानवयोगुणावधुका स्नुषाभर्तुर्मनोहरतीतिभावार्थः तथोकयचडइति कृतःचटचटदितिशब्दोयैस्ते हुताअग्नयःकीदृशाभवंति उ० तैरेवाक्षरैर्भिन्नार्थेन सरिसवहुया सर्षपैर्हुताः सिद्धार्थैर्हुतोहुताश नश्चटचटायते चटचटच्छब्दंकुरुते

॥ पाणिग्गहणणियंसणुसोहइकाहिंमंडिउं ॥
॥ साहसवदुविवीरपइरिपुबलकाहिंखंडिउं ॥ ६६ ॥
॥ समरंगणेहि ॥

अथशुद्धाऽपभ्रंशीभाषादर्श्यते पाणिग्गहणेति पाणिग्रहणस्यविवाहस्यनिवसनंवस्त्रंकैर्मंडितंशोभितं उ० समानरंगकरणैः तुल्यरंगप्रदानेन तथाहेवीर साहसवदुवि साहसेनयुक्तमपि प्रतिरिपुबलंसैन्यं कैःकृत्वाखंडितंछेदितं त्वयेतिशेषः उत्तरंतदेव समरंगणेहिं संग्रामांगणैः मयावैरिबलंभग्नमितिभावार्थः

॥ रासिअहकेणउच्चाडणुकिज्जइ ॥
॥ जुयइहमाणसुकेणउविज्जइ ॥
॥ तिसियलोउखणिकेणसुहिज्जुइ ॥
॥ एहपहमहभुवणेगिज्जइ ॥ ६७ ॥
॥ नीरसराएण ॥ इतिशुद्धापभ्रंशं ॥

रासिअहकेणइति रसिकानांशृंगारादिनवरसविज्ञानां अथवा श्रीरागादिषट्त्रिंशद्रागरसविज्ञानां केनोच्चाटनमुद्विग्नचित्तताक्रियते उ० नीरसराएण नीरसश्चासौरागश्चनीरसरागस्तेन दुःस्वरेणरसिकाउद्विजंति उद्वेगंप्रामुवंतीत्यर्थः तथायुवत्याःनवयौवनायाः स्त्रियामानसचित्तंकेनोद्विज्यते उ० नीरसरागेण नीरसेनशृंगारादिरसरहितेनयोरागःसंबंधस्तेन अथवा निर्गतोरसोबलंपुरुषार्थत्वं वा नीरसोवृद्धः तस्यरागेण युवत्यैतुवृद्धोनरोचते तथातृषितोलोकःक्षणंक्षणमात्रंस्तोककालंकेनसुखीक्रियते उ० नीरशरावेण नीरस्यजलस्यशरावः पात्रंकोशिकातेन कोशिकाप्रमाणमपि जलंतृषितस्यक्षणंमुखयति तथाएहपहोति एतदयंममप्रश्नःभुवनेकेनगीयत जगत्त्रितयमध्येगीयतइत्यर्थः उ० नीरसरागेणनितरांरसोनीरसः विशेषेणरसयुक्तोरागः सौकंठ्यंयत्रासौनीरसरागस्तेन अतिसुकंठरागेणमनोहरेगीयतइत्यर्थः एवमस्यार्थचतुष्टयंज्ञायते ॥

॥ सुयलोमेहंपुच्चइमेहोवितंतहासुयलं ॥
॥ केणहयासयलसुयाकेणजणोविसइपायालं ॥ ६८ ॥
॥ बलाहकविलेण ॥

अथशुद्धमागधीभाषामाह सुयलोमेहमित्यादि शूकरोमेघंपृच्छति तथामेघोपितंशूकरंपृच्छति उभयोःप्रश्नमाह सगरसुताःसगरचक्रवर्त्तिनःपुत्राःकेनहताइतिशूकरेणमेघःपृष्टः मेघःकथयति उ० बलाहकविले

ण हेवराह हेशूकर कपिलेनऋषिणा तथामेघःशूकरंपृच्छति के णजणोविसइपायालं जनोलोकः पातालमधोलोकंकेनविशति शूकरःक थयति उ० हेबलाहक हेमेघ बिलेनभूमिवारेण भूमिवारेणपाता ललोकेप्रविश्यते

॥ धवलुज्जलेहिंकेहिंसोहइधरणीमसाणदेसस्य ॥
॥ नरयस्सरच्चाइंनाकहिंसमप्यतिनिहितंकताइपि ॥६९॥

॥ नलकलंकेहिं ॥ इतिशुद्धमागधिकं ॥

धवलुज्जलेहिमिति स्मशानदेशस्यधरणीपृथ्वीधवलोज्ज्वलैःकैःशोभते उ० नलकलंकेहिं नराणांमनुष्याणांकरंकैरस्थिपंजरैः अत्ररकारस्थानेलकारः तथानरकस्यरक्षपालाःकैःपरिवेष्टिताःभवंति तै रेवाक्षरैःनरकस्यरंकैर्वराकैः

॥ पेरीपुच्चदिककनेरावतिकसनोखनोकहिंख ॥
॥ कच्चाइंनाकहिंसमप्यतिनिहितंकताइपि ॥ ७० ॥

॥ अहितपरकेहिं ॥

अथशुद्धपैशाचीभाषोच्यते पेरीपुच्चदिइत्यादि वैरीपृच्छति कृष्णः इया मांघनोमेघोगमनेआकाशेकैःकृत्वाराजति इतिपृष्टे उ० अहितपरकेहिं हेअहित हेशत्रो परकेहिं पक्षीहिंतिसंस्कृतं पक्षिभिरिति बलाका प्रभृतिपक्षिभिःशोभते तथाकच्चाइंइतिनिहितंनिश्चितं कृतान्यपिकृत्यानि कार्याणिकैर्नसमाप्यंते अयंभावार्थः संजातमपिकार्यंकैर्भंगमापद्यते नस माप्यते समाप्तभावंनापद्यते अत्रोत्तरं तदेव अहितपक्षिभिः शत्रुपक्षीयै रेवार्थाः भज्यंते ॥

॥ पत्तूनकिंफटचनोनिचतेहताना ॥
॥ अत्थासनंफचतिचंफानिसूतनस्स ॥

॥ फोत्तूनखोरतरतुक्खसताइपावा ॥

॥ मोहांधकारगहनंलयाकिंलफंति ॥ ७१ ॥

॥ विसमरणं ॥ इतिशुद्धपैशाचिकं ॥

पत्तूनकिमित्यादिवसंततिलकाछंदःअस्यभाषाश्लोकस्यसंस्कृतश्लोकोलिख्यते प्राप्यार्थकिंभटजनोनिजदेहदानादर्द्धासनंभजतिजंभनिषूदनस्य भुक्त्वाघोरतरदुःखशतानिपापाःमोहांधकारगहनंवदकिंलभंते ॥ १ ॥ भाषश्लोकस्यव्याख्या फट्टचनो भटजनः निजतेहतानाा निजस्यात्मनोदेहस्य दानात् किंपत्तून किंप्राप्य चंफनिमूतनस्त जंभनिषूदनस्य इंद्रस्य अत्यासनं अर्द्धासनं फचति भजाति इत्येवंशब्दार्थः उ० विसमरणं विषमंचतत्तरणंसंग्रामश्चविषमरणं तत्विषमरणं रणशब्दोनपुंसकालिंगेऽप्युक्तः कठिनसंग्रामंप्राप्ययोद्धाइंद्रस्यार्द्धासनंसेवते संग्रामेदेहदानात्स्वर्गप्राप्तिरितिपौराणिकायदंति तथापावा पापाः खोरतरतुक्खसताइ घोरतरदुःखशतानि फोत्तून भुत्का मोहांधकारगहनं मोहोअज्ञानमेवांधकारस्तेनगहननिाबिडं किंलफंति किंफलंति प्राप्नुवंति हेविद्वन् त्वं लप वद अयमर्थः पापिनोघोरंदुःखंभुक्तात्वंतेकिंफलंलभंते उ० विसमरणं विषेणमरणंनाशांविषमरणं पापिनोऽतेविषंभुक्ताम्रियंतेऽयमभिप्रायः

॥ जानीयाणइनिंदेभिंभलासाकिसवुच्चइबोल्लरेसंभलि ॥

जोतिलसरिसवपीडइजाणाकिसिभार्णज्जइसोविन्नाणी ॥ ७२

॥ सुत्तेल्ली ॥ इतिशुद्धलौकिकं ॥ इतिसंशुद्धजातिः ॥

अथशुद्धलौकिकभाषापाह जानीयाणइइत्यादि यास्त्रीनिद्रयाभिंभलाव्याकुलाकिंचित् नीयाणइ नजानाति संभलि हेसखि इतिश्रुत्वाप्रश्नोत्तरत्वं बोल्लरेवेद साकिसवुच्चइ साकीदृशीउच्यते उ० सुत्तेल्ली सासुप्तोत्थिताउच्यते तयाजोतिल० योज्ञात्वातिलांश्चसर्षपांश्च पीलय

ति घाणियंत्रेणतैलादिनिष्कासयांत सोविन्नाणी सोऽपिज्ञानीशिल्पि
कःकीदृक्भण्यतेउच्यते अत्राप्युत्तरं सुतेल्ली धूसरश्चाक्किकस्तेलीइति
वचनात् लोकेघांचीतेलीइतिनामप्रसिद्धं

॥ एतावताऽपिदिङ्मात्रंप्रश्नानांदर्शितंमया ॥
॥ येनयेनहिमार्गांतिताद्विदस्तत्तदूह्यतां ॥ ७३ ॥
॥ इतितृतीयःपरिच्छेदः ॥

॥ व्यक्तीकृत्यकमप्यर्थंस्वरूपार्थस्यगोपनात् ॥
॥ यत्रबाह्यांतरावर्थौकथ्यंतेताःप्रहेलिकाः ॥ १ ॥

प्रहेलिकानामपृष्ठं

॥ साद्विधार्थीचशाद्वीचविख्याताप्रश्नशासने ॥
॥ आर्थीस्यादर्थाविज्ञानाच्छाब्दीशब्दविभागतः ॥ २ ॥
॥ तरुण्यालिंगितःकंठेनितंबस्थलमाश्रितः ॥
॥ गुरूणांसन्निधानेपिकःकूजतिमुहुर्मुहुः ॥ ३ ॥

॥ पानीयकुंभः ॥

॥ साद्विधा आर्थीशाद्वीचद्विप्रकारायाउदाहरणं श्लोकोक्तविशेषणैरुपे
त :सःकःस्यात् हेविद्वन्त्वंब्रूहि किमुत्तरंदातव्यं विचार्यतामिति एवंविशे
षणानांभावेविचार्यमाणे ईदृशोयुवत्याःभर्त्ताज्ञायते भर्त्ताऽपितरुण्यासोत्कं
ठमालिंग्यते तथाकांताप्रियोभर्ता उभयथाऽपिनितंबस्थानेगुह्यप्रदेशेतिष्ठे
त् तथाचगुरूणांमातृपितृश्वश्रूश्वशुरजनानामग्रेऽपिस्त्रियंकामयते इत्येव
मभिप्रायेणबाह्योऽर्थः आभ्यंतरस्तुपानीयकुंभः सोऽपिकूपसरोवरादौज
लेनभृत्वाशिरस्यारोपणसमयेतरुण्याहस्ताभ्यामालिंग्यते प्राणादपिकांतः
प्रियः कक्षानितंबस्थानेचगृह्यते गुरूणांवृद्धघटानामुपर्युपविश्यकूजति
बडबडायते अतोघटएवायंनिश्चयीकृतः इत्येवमांतरार्थः केनापिनज्ञा
यते एवमर्थस्यद्वैविध्यंदर्शितं

॥ आपांडुपीनकठिनंवर्तुलंसुमनोहरं ॥
॥ करैराकृष्यतेऽत्यर्थंकिंवृद्धैरपिसस्पृहं ॥ ४ ॥
॥ पक्काबिल्वफलं ॥ इत्यार्थीजातिः ॥

॥ यत्श्लोकेनोक्तं तत्किं हेश्रोतस्त्वंब्रूही उ० प्रकटभावेनस्त्रिया: कुचयुगलमितिज्ञायते आंतरार्थस्तुपक्कबिल्वफलमिति इतिबाह्यांतरार्थयो र्भेदेनआर्थीप्रहेलिका

॥ दुर्वारवीर्यसहपित्वयिकाप्रसुप्ता ॥
॥ श्यामासपत्नत्द्दयेसुपयोधराच ॥
॥ तुष्टेपुनः प्रणतशत्रुसरोजसूर्ये ॥
॥ सैवाद्यवर्णरहितावदनामकास्यात् ॥ ५ ॥
॥ शस्त्री ॥

॥ उ० शस्त्री लोहस्यछुरिकाश्यामवर्णालोहमयत्वात् सुष्टुपयोजलंध रतिसा लोहेषुपानीयंदीयते पुनः उ० साएवशस्त्रीआद्यवर्णेनशकारे णरहितासतीस्त्रीइतिांतष्ठति कीदृशीस्त्री श्यामाषोडशवार्षिकी सुप योधरा सुष्टुपयोधरौस्तनौयस्याः साः ईदृशीस्त्रीत्वयितुष्टेसतिशत्रूणांत्द्द योपरिखेलतेशेतेवा इत्येवंशब्दस्यविभंगादक्षरस्यलोपात्द्वावर्थौकृतौ अ तएवशाब्दोप्रहेलिका

॥ सदारिमध्यापिनवैरियुक्ता ॥
॥ नितांतरक्तापिसितैवनित्यं ॥
॥ यथोक्तवादिन्यपिनैवदूतिका ॥
॥ कानामकांतेतिनिवेदयाशु ॥ ६ ॥
॥ सारिका ॥ इतिशाब्दीजातिः ॥

Digitized by Google

पुनरपरप्रकारेणशब्दभाजनांदर्शयति सदारिमध्येति व्याख्या हे कांत हेप्रिय भर्त्तः त्वंआशुशीघ्रं इतिपूर्वोक्तंनिवेदयकथय साकानामस्यात् यासदासर्वदा अरिणांमध्येस्थिताऽपिवैरिभिर्युक्तान शत्रुसंयुक्तानविद्यते नवैरियुक्ताइतिपाठे वैरेणविरोधेनयुक्तानास्ति एवंविरोधाभासः उ० सारिका अत्रैवंविरोधपरिहारेऽर्थोविधेयः शारिकाइतिशब्दमध्येअरिशब्दः वा रिकारोवर्त्तते परं कैश्चित्सार्द्धंवैरंनास्ति पुनश्चयानितांतंअतिशयेनरक्तारक्तवर्णाऽपिनिःयंसिताऽश्वेतैव यारक्तासासिता कथमुच्यते अत्रापिविरोधः अत्रापिविरोधपरिहारेऽयमर्थोविधेयः रकारककारयुक्तःपिसितैवसकारेणइतायुक्तासिता सारिकाइत्यत्रसकाररकारककारवर्णाःसंति कांताइतिश्लोकेकृते कांतोयस्याःसाकांता सारिकाइतिशब्दे अंतेकाइतिवर्णोविद्यते कांताकामनीयामनोहरावाइत्येवंविशेषणत्रयोपेतेतातिसारिकाइतिशब्दः रमवानीसोगटीइतिभाषा घटते कथं अरीणांरमणवतांमध्येस्थिताऽपिकैश्चित्सार्द्धंवैरंनास्ति परंसाउपरिभागेरक्ता अधोभागेश्वेता परं कांतासुंदराइति तथायथोक्तवादिन्यपिदूतीनैवभवति यथाउच्यतेतथावदति परंदूतीसान अत्रापिविरोधः दूतीधर्मस्त्वीदृशए व सारिकातुपापठयमानायथोक्तंपठति परंदूतीनभवति एषासारिकाकथ्यते पोपटी काबरीइतिभाषा इयमपिशाद्धूप्रहेलिका

॥ नीरसउणबहुगुणवंतउभमइनिरंतरनिच्चलहुंतु ॥
तरुगिज्जिणउपलुपत्रुतसुजोपरिजाणइपाविसोजगिजसु ॥ ७

॥ गुणवृक ॥

अथलौकिकभाषयाशाद्धूप्रहेलिकांदर्शयति नीरसइति व्याख्या नीरसकःपुनर्बहुगुणवान्वर्त्तते योनीरसः सःगुणवान् कथमितिविरोधः उ० गुणवृक गुणवृक्षस्तुकूपकः गुणैर्वरकैर्बद्धोवृक्षोगुणवृक्षः प्रसिद्धभाषयावाहाणनोकुवायंभ सःच नीरंजलेशेतेसौनीरशयः वानिर्गतःरसोयस्मात्सःनीरसकः अतिशुष्कत्वात् बहुभिर्गुणैर्वरकैर्बाध्यते अ

तोबहुगुणवान् तथाभमइ निरंतरंनित्यंभ्रमांत परंनिश्चलः सन्तिष्ठति यश्चलन्सःनिश्चलःकथंभवेदितिविरोधः अत्रापिवाहनेनभ्रममाणेनसार्द्धंभ्रमति आत्मनात्वेकत्रैवतिष्ठति तथातरुर्वृक्षइतिगीयतेकथ्यते परं फलपत्रेनस्तःगुणवृक्ष इत्युच्यतेफलंचपत्रंचनभवति जोपरि० योनरोऽस्यार्थस्यपरिक्षांस्वभावंजानाति सःपुमान्बहुयशःप्राप्नोति इत्यक्षरार्थः

॥ घरिघरिचल्लीइसयलपियारीजीवंतविरयरीसाहोनारी ॥
खणिबभ्रइखणिमुच्चिखणिएकछीतहजागसुजहजाइनीपिछी८

॥ पाशासारी ॥ इतिप्रहेलिकाजातिः ॥

घरिघरि० व्याख्या गृहेगृहेव्रजति प्रतिगृहंयाति परं सकलजनप्रीता सानारीजीवतियदा तदावैरकरीविरोधकारिणी भवेदितिशेषं क्षणेनबध्यते क्षणेनमुच्यते तथाजानीथयूयं यथाक्षणेनएकाकिनीप्रेरितासतीनोयाति उ० पासासारि पासकसारिका बंधनदवरकेणयुक्ता वेपटीकाबरीभाषा अथवा रमवानापाशासहितसोगठीइतिभाषा सा चपासासारि गृहेगृहेकाष्ठादौव्रजति यत्रैवयातितत्रैवप्रिया साचयावज्जीवितितावत्क्रीडाकर्तुर्वैरकरीदुःखदायका म्रियमाणासुखायस्यात् क्षणेनबध्यतेचालितुंनशक्नोति क्षणेनमुच्यतेचलति एतद्रीत्याऽर्थद्वयंजातं इतिशाद्वलीलौकिकभाषा

॥ कालसारादिकंत्वद्यमजमारादिगुढकं ॥
॥ विदग्धोदुर्विदग्धानांकुरुतेदर्पशांतये ॥ ९ ॥

कालश्चसारश्चकालसारौ तौआदीयस्यतत्कालसारादिकं त्वदिभवंत्वद्यंनामपृष्टं

॥ अनुनेतुंमानिन्याःदयितश्चरणेसरागचरणायाः ॥
॥ यावत्पतितःसतयातत्क्षणमवतारिताःकस्मात् ॥ १० ॥

Digitized by Google

॥ कालोत्तद्यं ॥

कालोरजस्वलत्वादिदिनंअवगम्यते अस्यायंभावः कालस्यचसारस्यचज्ञानं हृदयेस्थाप्यतेपश्चात्पृच्छ्यते अतएवत्तद्यमितिपंडितैरपिदुःखेनावबुध्यते हृदयाश्लोकोक्तयाऽनयास्त्रियायोदयितोदूरीकृतः सःकस्मात्केनहेतुना हे विद्वन्त्वंब्रूहितिपृष्टं अत्रहेतुर्वक्तुर्हृदयस्थोऽप्यनुक्तेनज्ञायतेधीमद्भिरपि अतएवत्तद्यं अत्रहेतुमाह रजस्वलत्वात्स्त्रीधर्मत्वात् अहमस्पृश्यास्मीतिमां मास्पृशेतिविज्ञायावज्ञातोनिजदयितत्तद्योभावः श्लोकमध्येनभवतिरजस्वला कालोत्तद्यइति

॥ अवलोक्यस्तनौवध्वाःगुंजाफलविभूषणौ ॥
॥ निःश्वस्यरोदितुंलग्नाकुतोव्याधकुटुंबिनी ॥ ११ ॥
॥ सारघत्तद्यं ॥ इतिकालसारजातिः ॥

एतच्चरोदनंतयाकुतःकृतमितिपृष्टव्यं तत्तद्योऽयंभावः गजादिवधेसमर्थोऽयंमुक्ताफलानांहारंपरिधापयेदितिपुत्रस्यगजादिवधेऽसमर्थत्वंविज्ञाय तया कुटुंबिन्यावधूकुचावालोक्यानिःश्वस्यचरुदितं क्षीणबलत्वेननिजपुत्रस्यासमर्थत्वंविचारितं स्तनयोरारक्तत्वेनवध्वाःनवयौवनत्वंचिंतितमित्याकूतं पुत्रस्यअसारतोरोदनहेतुः सतुत्तद्यःप्रष्टुर्हृदयस्थः क्वयनंविनानज्ञायते इति सारत्तद्यं

॥ ददिठ्ठचूयमउलंपिच्छियसहियाहेविरहिणीसहियं ॥
॥ नमिउंकिंकेलितरुचूउंचरणाहदोक्तो ॥ १२ ॥

रागद्वेषत्तद्यं ॥

लौकिकभाषयाअन्यदपित्तद्यमेवदर्शयति ददिठ्ठेति व्याख्या चूतस्याग्रस्यमुकुलंपुष्पोद्गमंईषत्दृष्ट्वा काचित्सखीविरहिणीसतीसख्याः सम्मुखंपश्यति सखींप्रतिदर्शयित्वाकंकेलितरुरशोकवृक्षःशिरसाग्रणतः चूतश्चरणेनाहतः तत्कुतःइतेवोविचारणीयः भावोऽयंगुढः अत्रभावोश्लोकमध्ये

लिखितोनास्ति किंतु त्वदिवर्त्तते सचायं आम्रेमुकुलदर्शनाद्विरहिण्याः विरहोदीपितः ततोदुःखंकृत्वाआम्रस्तयाचरणेनहतः तथाकंकेलितरुरप्रफुल्लित्वात्स्वसदृशःप्रणतोऽयंहेतुर्ज्ञायते अस्याःभाषार्यायाअर्थांतरंलिख्यते ईषत्दृष्ट्वाचूतमुकुलंविरहिणींसखींप्रेक्ष्य सखीभिरशोकवृक्षोनमितः चूतःपादाहतः तत्कस्माद्धेतोः अशोकेपुष्पितेसतिसख्या प्रियःसमेष्यति अतःकारणात्प्रणतः चूतदर्शनेसतिअस्याःस्मरकष्टंजातामितिकारणात्हतः इतिरागद्वेषत्वद्यं

॥ पिच्छंतमणिमिसच्छंपिच्छियवहूयारात्रित्तिभिक्खयरं ॥
॥ दंसियकयाइंसीसेकत्तोदोजाइंसुकुमाइं ॥ १३ ॥

॥ इतिकालसारादित्वद्यजातिः ॥

अन्यच्चत्वद्यंकथयतिलौकिकभाषया पिच्छंतमित्यादिव्याख्या कयाचिद्वधूकया अनिमिषाक्षंनिमेषरहितनेत्रं ईदृशंप्रेक्षंतंविलोकयंतं कंचनभिक्षाचरंभिक्षुकंपिच्छियदृष्ट्वा झटितिशीघ्रं तयाद्वेसंख्येजातीकुसुमेजपापुष्पे तंभिक्षुकंदर्शयित्वा स्वशीर्षेकृतेमस्तकेधृत्वा तस्मैदर्शिते कत्तोतत्वं तः कस्माद्धेतोरित्युच्यतामितिपृष्टव्यम् अत्राप्येवंत्वद्यं भिक्षाचरेणसासुभयासस्नेहंविलोकिता तयातुजातीकुसुमोरुच्चस्थानेधरणेनानिजजातिरेतत्कुसुमवदुज्ज्वला उभयपक्षविशुद्धाऽस्म्यहं त्वद्योग्यानास्मीत्युत्तरंदत्तं अकार्यैनैवकर्तव्यं अयंभावोऽस्ति

॥ रविसुतकृतगोकर्णः श्रुतिविषयगुणांबरोवनात्मधरः ॥
॥ नरकशिराः जगदखिलंचिरमव्यादसमरुक्पाणिः ॥ १४

॥ अजगूढं ॥ इयमेकाजातिः ॥

॥ अजमारादिगूढकं अजश्चमारश्चाजमारौ तौआदीयेषांतेऽजमारादयः पदपादार्थाः तेएवगूढाः गुप्ताः यस्मिन्ततत्अजमारादिगूढक अस्या

यंभावः शंभुः तद्वाचोशब्दोगूढोयस्मिन्ततत्अजगूढं ३ मारः कामः सएवगूढोयस्मिन्ततत्मारगूढं ४ विभक्तिपदं तदेवगूढंयस्मिन्ततत्पदगूढं ५ श्लोकस्यचतुर्थोभागः पादः सएवगूढोयस्मिन्ततत्पादगूढं ६ अर्थः शब्दार्थः सएवगूढोयस्मिन्ततत्अर्थगूढं ७ इतिपंचपृष्टानांउदाहरणानिवक्ष्यंते असमरुक्पाणिः नसमोऽसमोविषमः सचासौरुक्चसमरुक्शूलरोगः त्रिशूलमित्यायुधविशेषः सःपाणौहस्तेयस्यसः शूलपाणिर्महादेवः एवमेतन्नामगुप्तंज्ञापितं त्रिपादोक्तैर्गूढार्थविशेषणैरजोमहादेवोवर्णितः इतिअजगूढं

॥ कुध्रेनसुप्रीनयनाश्रयाशदग्धोन्मदादर्दुरहर्षकाले ॥
॥ स्वजन्मभक्षाप्रियभोजनाशानृत्यंतिभीमानुजगोजभाजः १५

॥ मारगूढं ॥ इयमप्येकाजातिः ॥

अत्रविशेष्यपदंगूढं स्वजन्मभक्षप्रियभोजनाशाः इतिविशेष्यपदंस्यस्माज्जन्मयेषांतानिस्वजन्मानिस्वापत्यानि तानिभक्षयंतितेजन्मभक्षाः सर्पास्तेएवप्रियाः भोजनस्यआशाःयेषांतेईदृशाःमयूराः इतिमयूरनामगोपितं दर्दुरहर्षकाले दर्दुराणांमंडूकानांहर्षकालोवर्षाकालस्तस्मिन् इतिवर्षानामगोपितं किंभूताःमयूराः कुंपृथ्वींधरंतितेकुध्राःपर्वतास्तेषामिनःस्वामीहिमाचलस्तस्यसूः पुत्रोपार्वती तांप्रीणातीतिप्रीर्महादेवस्तस्यनयनस्यआश्रयाशोनेत्रंहिस्तेनदग्धोयःकामस्तेनउन्मदाउन्मत्ताः अत्रमारस्यनामगोपितं इतिमारगूढं ॥

॥ वाताच्छीतिररिध्रोऽरंवोहरतान्महासुरीदयितः ॥
॥ वडिवाडयानौकाःवार्वाहाभोसमस्तानाः ॥ १६ ॥

॥ अथक्षेपकःश्लोकोयं ॥

॥ व्ययवासाः पंचशिराः यरिर्वीनारिभूषणः ॥

Digitized by Google

॥ असिरोमाक्रियादर्वःशंकालायनवीक्षणः ॥ १७ ॥

॥ पदगूढं ॥ इयमेकजातिः ॥

अत्रगूढार्थयोजनावर्तते महासुरीदायेतइत्यस्मात्ईदयितइतिविशेष्यपदगुप्तं धृतमस्ति अत्राक्रियादुर्वइत्यस्माद्वाक्यात्उरीतिविशेष्यपदंगूढं ॥ इतिपदगूढं

॥ दयावान्प्रयतःशुद्धःप्रबुद्धःकमलेक्षणः ॥

॥ पापापहस्त्रिभुवनंबुद्धःपायादपायतः ॥ १८ ॥

अत्रबुद्धःपापात् इतिचतुर्थःपादःपूर्वेषुत्रिषुपादेषुगुप्तोऽस्ति कोऽर्थः च तुर्थपादस्यवर्णाः प्रथमद्वितीयतृतीयपादेष्वंतर्गोपिताः संति सम्यक्विचार्यविलोकितव्याः ॥

॥ नमज्जतिक्वचिद्दोषेप्रीणातिजगतोमनः ॥

॥ यएकःसपरंश्रीमान्चिरंजयतिसज्जनः ॥ १९ ॥

॥ पादगूढं ॥ इयमप्येकाजातिः ॥

अत्रापिचतुर्थोपादः गूढः चिरंजयतिसज्जनइति पाश्चात्यत्रिषुपादेष्वगोपितोस्तीतिविचार्यसद्भिर्दृष्टव्यः ॥ इतिपादगूढं ॥

॥ दृष्टोमयासखिब्रूहिरोदयित्वागतोऽद्यमां ॥

॥ भद्रेकल्याणिनीभूयाःप्राच्चिंपश्यविनिर्मलां ॥ २० ॥

अत्रभावःकः ययेयंप्राचीनिजभर्तुःसूर्यस्यविरहेणरात्रौदुःखितापिअधुनासूर्योदयेविकसिता सशोभाजाता तथात्वमपिभर्तुरागमेविलासंप्राप्स्यसीतिभावःसख्याज्ञापितः ॥

॥ दाहिणपव्वणुव्विग्गासम्मीलइलोयणाइंपहियवहुः ॥

॥ निउणसहीउणतीएकंठेविकरेहिंढक्कोहि ॥ २१ ॥

॥ अर्थगूढं ॥ इतिगूढजातिः ॥

दाहिणइति ॥ व्याख्या काचित्पथिकवधूर्दक्षिणपवनेनोद्विग्नाव्याकुलीकृतासतीलोचनेसंमीलयति आच्छादयति तदाचतस्याःनिपुणसखीप्रवीणवयस्या तस्याःपथिकनार्याःकर्णयोर्विवरेछिद्रेअंगुल्या ढंकयतिमुद्रयतीत्यर्थः तत्सख्याःकर्णाच्छादनंकस्मात्कृतंइत्यर्थोगूढविचारणीयः तच्चैवं तयादक्षिणपवनमसहमानयानेजनेत्रेमुद्रिते सख्याचविरहिणीत्वान्माकदाचित्कर्णमार्गेणास्याःजीवोवजेदित्यतस्तस्याःकर्णौपिहिताविति भावः अथपाठांतरं पथिकवधूर्लोचनानिसंमीलयति किंभूता दक्षिणपवनोद्विग्नानिपुणसखीपुनस्तस्याःकंठमपिहस्तैश्छादयति तत्कथं साकंठागतप्राणा अहमेवंमन्ये अन्यथाऽस्याःकंठात्प्राणाःगमिष्यंति

॥ स्तुतिनिंदातदर्थत्वात्द्व्यर्थमर्थद्वयोदयात् ॥
॥ निन्हवात्कथितस्यापिशब्दव्याजादपन्हुतिः ॥ २२ ॥

॥ स्तुतेश्चनिंदाचस्तुतिर्निंदे तेविद्येतेयस्यांसास्तुतिनिंदाजातिः ॥ द्वौअर्थौयस्मिन्तत्तद्व्यर्थंपृष्टं कार्यतस्यार्थस्यशब्दकपटेनामिथ्याभाषणात् अपन्हुतिरितिनामजातिः एषांत्रयाणामुदाहरणानिमूलग्रंथेसरलानिभवंति

॥ बहुदोषोगुणध्वंसी गोहंताजनपीडकः ॥
॥करोतुविरथोलोक मस्तमाप्तमहोदयं ॥ २३ ॥

॥विष्णोः स्तुतिनिंदे॥

॥ सततमहितजनवत्सलबहुभयपापक्रियापरिभ्रष्टः॥
॥ इहकलिकालेकुपतिर्जगतस्त्वंपरमदुःखकरः ॥ २४ ॥

॥राज्ञःस्तुतिनिंदे ॥ इतिस्तुतिनिंदाजातिः ॥
॥प्रसन्नवदनः श्रीमानयंलब्धमहोदयः ॥
॥करप्रचारसुभगोराजानंदयतिप्रजाः ॥२५॥

Digitized by Google

॥ चंद्रभूपती ॥

॥ विनायकाहितप्रीतिर्देवोगंगांबभारयः ॥
॥ सर्वदोमाधवःसत्वामव्यादव्यर्थविक्रमः ॥ २६ ॥

॥ हरिहरौ ॥ इतिद्व्यर्थजातिः ॥

॥ सीत्कारंशिक्षयतिव्रणयत्यधरंतनोतिरोमांचं ॥
॥ किमुनागरिकोमिलितोनहिनहिसखिहैमनःपवनः ॥२७॥
॥ रुचिरस्वरवर्णपदारसभाववतीजगन्मनोहरति ॥
॥ तत्किंतरुणीनहिनहिवाणीबाणस्यमधुरशीलस्य ॥ २८ ॥

॥ इतिअपन्हुतिजातिः ॥

॥ स्वरेषुबिंदुयुक्तेपुहलानांयदबोधन ॥
॥ तद्बिंदुमदितिप्राहुःकेचिद्बिंदुमतीमति ॥ २९ ॥

बिंदुःअनुस्वारोविद्यतेयस्मिन्नृतत्बिंदुमत्पृष्ठं

॥ मानसीनाभसित्याद्याबुद्ध्यादौन्यासतोहियाः ॥
॥ बाहुल्येनाप्रयोगास्ताःनेहतासांप्रमर्शनं ॥ ३० ॥

॥ ष्ठिठठठठूठाठष्ठंठिष्ठंठिंठोःठुठुष्ठठीठठिठः ॥
॥ ठठठुठठाठिठुठठाठुठठठुठिठठठोठठष्ठंष्ठः ॥
॥ त्रिनयनचूडारत्नंमित्रंसिंधोःकुमुद्वतीदयिततः ॥
॥ अयमुदयतिधुसृणारुणतरुणीवदनोपमश्चंद्रः ॥ ३१ ॥

किमुक्तंभवति बिंदुमज्जातेःप्रथमंश्लोकंविधाय पश्चाद्येश्लोकस्यवर्णाः भवंतितेलुप्यंते तेषांस्थानठेकाराः बिंदवोवाक्रियंते तत्रस्थाःस्वरास्तत्रैव

स्याप्यंतेएवमेषाबिंदुमतीभवति परंहलानामभावान्नकेनापिसश्लोकोवाचयितुंशक्यते अत्रत्रिनयनचूडारत्नमित्यस्यआर्यावृत्तस्यवर्णस्थानेठकाराःलिखिताःसंति उपरिष्टाच्चस्वरादेशाःसंति एतस्यैवश्लोकस्यरीत्याबिंदुमतीलेखनीया

॥ सखिविधुमध्यगतंकिंतववदनमुतगंडदेशखरस्यांकः ॥
॥ एतौविलोकनात्परस्परंविस्मयंकुरुतेदृश्यतेच ॥ ३२ ॥

॥ ठं ठिं ठिं ठुं ठूं ठृं ठॄं ठं ठिं ठं ठं ठ

एतानिअष्टपृष्टानांउदाहरणानिवक्ष्यंतेऽनुक्रमेराजन्नवघनश्यामइत्यत्र ॥ अव
विद्विपोद्यरणेइत्यत्र द्य नितांतमधुरारवैरित्यत्रअधुः

॥ नकरोतिनामरोषंनवदतिपरुषंनहंत्ययंशत्रून् ॥
॥ रंजयतिमहीमखिलांतथापिधीरस्यवीरस्य ॥ ३६ ॥
॥ शरदिंदुकुंदधवलंनगपतिनिलयंमनोहरंदेवं ॥
॥ यैःसुकृतंकृतमनिशंतेषामेवप्रसादयति ॥ ३७ ॥

॥ कर्तृगुप्तं ॥

अत्रधीरस्येतिपदेधीः मनोहरमित्यत्रमनः इतिकर्तृपदंगुप्तं

॥ शीत्करासारसंवाहीसरोजवनमारुतः ॥
॥ प्रक्षोभयतिपांथस्त्रीनिःश्वासैरिवमांसलः ॥ ३८ ॥
॥ सुभगतवाननपंकजदर्शनसंजातनिर्भरप्रीतेः ॥
॥ शमयतिकुर्वन्दिवसःपुण्यवतःकस्यरमणीयः ॥ ३९ ॥

॥ इतिकर्मगुप्तं ॥

सरोजवनमारुतइत्यत्रसरः शमयतीत्यत्रशमिविकर्मपदंभिन्नत्वेन ॥

॥ पूतिपंकमयेऽत्यर्थंकासारेदुःखिताअमी ॥
॥ दुर्वारामानसंहंसाःगमिष्यंतिघनागमे ॥ ४० ॥
॥ अहंमहानसायातःकल्पितोनरकस्तव ॥
॥ मयामांसादिकंभुक्तंभोंमंजानीहिमांबक ॥ ४१ ॥

॥ करणगुप्तं ॥

दुःष्टंवाःजलंदुर्वाः तेनदुर्वाग कलुषितजलेन महच्चतत्भनःशकटंचम
हानःतेनमहानसा

॥ अंभोरुहमयेस्नात्वावापपियासिकामिनी ॥
॥ ददातिभक्तिसंपन्नापुष्पसौभाग्यकाम्यया ॥ ४२ ॥
॥ प्रशस्त्यायुक्तमार्गस्यतवसंमानितांश्रिताः ॥
॥ स्पृहयंतिनकेनामगुणरत्नालयप्रभो ॥ ४३ ॥

॥ संप्रदानगुप्तं ॥

अंभोरुहमयेइत्यत्रअये इःकामस्तस्मैअये चतुर्थी प्रशस्त्यायुक्तमार्गस्ये त्यत्रप्रशस्त्यैकल्याणाय उक्तमार्गस्य

॥ शिलीमुखैस्त्वयावीरदुर्वारैर्निर्जितोरिपुः ॥
॥ बिभेत्यत्यंतमालिनोवनेऽपिकुसुमाकुले ॥ ४४ ॥
॥ सरसीतोऽयमुद्धृत्यजनःकंदर्पकारकं ॥
॥ पिबत्यंभोजसुरभिस्वच्छमेकांतशीतलं ॥ ४५ ॥

॥ अपादानगुप्तं ॥

अलिनोभ्रमरात् सरसीतःसरोवरात्

॥ याकटाक्षच्छटापातैःपवित्रयतिमानवं ॥
॥ एकांतेरोपितप्रीतिरस्तिसाकमलालया ॥ ४६ ॥
॥ विपद्यमानतासिद्धासर्वस्यैवानिरूष्मणः ॥
॥ यथाऽत्रभस्मपभ्यांचनिर्वाणंहंत्ययंजनः ॥ ४७ ॥

॥ अधिकरणगुप्तं ॥ इतिकारकगुप्तजातिः ॥

एकृष्णे कांतेभर्तारि एवंसप्तमीगुप्ता विपद्यमानतेत्यत्राविपदिकष्टे

॥ तूणेवमधुमासेस्मिन्सहकारद्रुमंजरी ॥
॥ इयमुन्निद्रमुकुलैर्भातिन्यस्ताशिलीमुखा ॥ ४८ ॥

Digitized by Google

॥ प्राप्तमदोमधुमासः प्रबलारुक्प्रियतमोपिदूरस्थः ॥
॥ असतीसंन्निहितेयंसंवृतशीलासखीनियतं ॥ ४९ ॥

॥ संबंधगुप्तं ॥ एकाजातिः ॥

उन्निद्रमुकुलाएः इतिभिन्नेपदेक्रियेते इः कामस्तस्यएः षष्ठ्येकवचनं अत्रमासः चंद्रस्य

॥ सर्वज्ञेनत्वयाकिंचिन्नास्त्यविज्ञातमीदृशं ॥
॥ मिथ्यावचस्तथाचत्वमसत्यंवेत्सिनक्वाचित् ॥ ५० ॥
॥ कमलेकमलेनित्यंमधूनिपिबतस्तव ॥
॥ भविष्यतिनसंदेहःकुष्टंदोषाकरोदये ॥ ५१ ॥

॥ आमंत्रितगुप्तं ॥ इयमथैकाजातिः ॥

सर्वंजानातीतिसर्वज्ञस्तस्यइनः स्वामी तत्संबोधनं हेसर्वज्ञेन हेपंडितश्रेष्ठ कमले कं अले इतिपदच्छेदः हेअले हेभ्रमर ॥

॥ विषादीभैक्ष्यमश्नातिसदारोगंनमुंचति ॥
॥ रुष्टेनापित्वयावीरशंभुनारिःसमःकृतः ॥ ५२ ॥
॥ नित्यमाराधितादेवैःकंसस्यद्विषतस्तनुः ॥
॥ मंडलाग्रंगदाशंखंचक्रंजयतिबिभ्रती ॥ ५३ ॥

॥ इतिसमासगुप्तं ॥ इयमेकाजातिः ॥

विषंकालकूटं अत्तिसःविषादी दारैःसहवर्तमानःसदारः उभयत्रद्वितीयादितत्पुरुषःसमासः ॥ नित्यमाराधितादेवैरित्यत्रनित्यमा नित्यंमालक्ष्मीर्यस्यांसाबहुव्रीहिः ॥

॥ नितांतस्वच्छचित्तदयंसखिप्रेयान्समागतः ॥
॥ त्वांचिराद्दर्शनप्रीत्यायःसमालिंग्यरंस्यते ॥ ५४ ॥

Digitized by Google

॥ कलिकाऽलिमियंयावदगस्त्यस्यमुनेरपि ॥
॥ मानसंखंडयत्यत्रशशिखंडानुकारिणी ॥ ५५ ॥
॥ लिंगगुप्तं ॥ इयमथैकाजातिः ॥

नितांतस्वच्छःहृदयमित्यत्र नितांतहृदयं नितांतमतिशयेनस्वच्छंनिर्मलंहृत्हृदयंयस्यसःनितांतेस्वच्छहृत् इतिपुल्लिंग कलिकालप्रियमित्यत्र इयंअगस्त्यस्यपवृक्षस्यकलिका अलंअत्यंतं मुनेः मनःखंडयति कलिकाइति स्त्रीलिंगानिर्देशः

॥ प्रमोदंजनयत्येवंसदाराःगृहमेदिनः ॥
॥ यदिधर्मश्चकामश्चभवेतांसंगताविमौ ॥ ५६ ॥
॥ सुब्वचनगुप्तं ॥ इयमेकाजातिः ॥

सदाराइत्यत्रराः इतिप्रथमैकवचनंसुबंतं गृहमेदिनइतिषष्ठी

॥ कस्मात्त्वंदुर्बलाऽसीतिसख्यस्तांपरिपृच्छति ॥
॥ त्वयिसन्निहितेतासुदद्यात्कथयसोत्तरं ॥ ५७ ॥
॥ तिङ्वचनगुप्तं ॥ इयमथैकाजातिः ॥

अतिशयेनपृच्छंतीतिपरिपृच्छति इतियङ्लुगंतेअंतिपरतोरूपमस्ति इदंम वरूपमेकवचनंज्ञायते नतुबहुवचनेनइत्यःतिङ्वचनगुप्तं

॥ अन्योप्यर्थःस्फुटोयत्रमात्रादिच्युतकेष्वपि ॥
॥ प्रतीयतेविदुस्तज्ज्ञास्तन्मात्राच्युतकादिकं ॥ ५८ ॥
॥ महाशयमतिस्वच्छंनीरंसंतापशांतये ॥
॥ खलवासादतिश्रांताःसमाश्रयतहेजनाः ॥ ५९ ॥

यत्रप्रश्नेमात्राबिंदुविसर्गाणांच्युतकेषुकृत्तेषुसत्सुद्वितीयोऽर्थः प्रकटोज्ञायते तत्मात्रादिच्युतकादिकं च्युतकशब्देनकुत्रचित्स्थानेनाशः कुत्रचित्

विनिमयः सालटोपालोटोइतिभाषा मात्राच्युतकंआदिर्यस्मिन्ततत्मा त्राच्युतकादिकं आदिशब्देन मात्राबिंदुविसर्गाणांच्युतकान्यक्षरस्यच स्थातव्यंजननयोश्चापि इति एकस्मिन्नर्थे नीरंजलं द्वितीयेऽर्थेनीरश द्वस्यईकारस्थानेअकारःक्रियते तदानरंइत्यवशिष्यते

॥ तुषारधवलःस्फूर्जन्महामणिधरोऽनघः ॥
॥ नागराजोजयत्येकःपृथिवीधरणक्षमः ॥ ६० ॥

॥ मात्राच्युतकं ॥ एकाजातिः ॥

नागराजःशेषनागःएकस्मिन्नर्थे द्वितीयेऽर्थेनागराजइत्यस्यआकारस्थाने अकारःक्रियते तदानगराजइतिस्यात् हिमाचलः

॥ सुश्यामाचंदनवतीकांतातिलकभूषिता ॥
॥ कस्येषानंगभूःप्रीतिंभुजंगस्यकरोतिन ॥ ६१ ॥

एकस्मिन्नर्थेअनंगभूःकामस्यस्थानंईदृशीस्त्री द्वितीयेऽर्थेअनुस्वारोलुप्यते तदानगभूःपर्वतस्यमलयाचलस्यभूमिः

॥ यथासत्प्रसवःस्निग्धःसन्मार्गविहितस्थितिः ॥
॥ तथासर्वाश्रयःसत्यमयंमेवकुलद्रुमः ॥ ६२ ॥

॥ बिंदुच्युतकं ॥ इयमथैकाजातिः ॥

एकस्मिन्नर्थेअयंमेमम बकुलद्रुमोअशोकवृक्षः बबयोरैक्यं द्वितीयेऽर्थे अयंमेवकुलद्रुमइत्यत्रायमित्यस्मादनुस्वारस्याऽयः तदाऽयमेवकुलद्रुमइति स्थितं अयंपुमान् कुलेद्रुमइव द्रुमोवृक्षः

॥ महीरुहोविहंगानामेतेद्वयैःकलापिनां ॥
॥ विरुतैःस्वागतानीवनिरवाहयकुर्वते ॥ ६३ ॥

एकस्मिन्नर्थेद्वयैः तृतीयाविभक्तिः मनोहरैर्विरुतैःशब्दैःद्वितीयवारंद्वये

रित्यत्रविसर्गलोपेकृते त्रद्यैकलापिनांइतिजात त्रद्यंसुंदरंएकंअद्वितीयं लपंतिवदंतितेत्रद्यैकलापिनस्तेषां विहंगानां

॥ अगस्त्यस्यमुनेःशापाद्ब्रह्मस्पंदनमास्थितः ॥
॥ महासुःखात्परिभ्रष्टोनहुषःसर्पतांगतः ॥ ६४ ॥
॥ विसर्गच्युतकं इयमेकाजातिः ॥

एकवारं महासुः महांतोऽसवःप्राणाःयस्यसः खात्आकाशात् द्वितीयवारं सुरित्यत्रविसर्गलोपेकृते महासुत् महच्चतत्सुखंचतस्मात् राज्यात्

॥ महानपिसुधीरोऽपिबहुरत्नयुतोऽपिसन् ॥
॥ विरसःकुपरीवारोनदीनःकेनसेव्यते ॥ ६५ ॥

नदीनांइनःस्वामी नदीनःसमुद्रइत्येकस्मिन्नर्थेद्वितीयेऽर्थेनदीनइत्यस्मात्नकारंसस्वरंलुप्यते तदादीनइतितिष्ठति दीनशब्देन कृपणधनपुमान्

॥ सुशीलःस्वर्णगौरांगःपूर्णचंद्रनिभाननः ॥
॥ सुगतःकस्यनप्रीतिंतनोतित्रदिसंस्थितः ॥ ६६ ॥
॥ अक्षरच्युतकं ॥ इयमर्थैकाजातिः ॥

एकस्मिन्नर्थे सुगतोबुद्धःजिनः द्वितीयेऽर्थे सुगतइत्यस्मात्गकारःस्वरोलुप्यते तदासुतइतिस्यात् सुतःपुत्रः

॥ तनोतुतेयस्यफणीगरुत्मान् ॥
॥ पाणौमुरारिर्दयिताचशय्या ॥
॥ नाभौस्फुरन्भद्रमशुभ्रदेहः ॥
॥ पद्मागतिश्चक्रमसौविधाता ॥ ६७ ॥
॥ हरःक्षयीतापकरःसुरेशःशांतोहरिर्गोत्ररिपुर्विवस्वान् ॥

Digitized by Google

॥चंद्रोद्विजिव्हाश्रितइत्युपेक्ष्यलक्ष्म्यावृतःपातुविधिर्जगंति ६८

॥ स्थानच्युतकं ॥ इयमेकाजातिः ॥

कर्तृकर्माक्रियापदानिस्थानांतरेधृतत्वात्अन्वयोदुर्लभोयस्यवृत्तस्य तद्वृत्तं स्थानच्युतकंकथ्यते एवंसर्वत्रापिद्रष्टव्यं एवंयेषांश्लोकानांमध्येअर्थयोजनिकायांकृतायांसत्यांयोजनिकास्थानांतरेधृतास्ति योयस्यशब्दस्यान्वयत्वेनलगतिसशब्दस्तत्पार्श्वेधृतोनास्ति अतएवस्थानच्युतकं

॥ भिक्षवोरुचिराःसर्वेरसाःसर्वजनप्रियाः ॥

॥ क्षमायामभिसंपन्नादृश्यंतेमृगधेपरं ॥ ६९ ॥

एकस्मिन्नर्थेभिक्षवःश्वेतांबराः द्वितीयेऽर्थेभिक्षवइतिपदाद्वकारलोपःक्रियते तदाइक्षवइतिगुडवृक्षाः

॥ सत्यशीलदयोपेतोदाताऽमुचिरमत्सरः ॥

॥ जिनःसर्वात्मनासेव्यःपदमुच्चैरभीप्सता ॥ ७० ॥

॥ व्यंजनच्युतकं ॥ इयमेकाजातिः ॥

एकस्मिन्नर्थेऽजिनोवीतरागः द्वितीयेऽर्थेजिनएतस्माज्जकारोलुप्यते तदाइनइतिस्थितं इनः स्वामीराजावा

॥ स्फोटयित्वाऽक्षरंकिंचित् पुनरन्यस्यदानतः ॥

॥ यत्रापरोभवेदर्थश्च्युतदत्ताक्षरंहितत् ॥ ७१ ॥

च्युतेनाशेषतितस्मिन्नेवस्थानेदत्तंअक्षरमन्यत्यास्मिंस्तत्च्युतदत्ताक्षरंपृष्टं

॥ सदागतिहतोच्छ्रायस्तमसोवश्यतांगतः ॥

॥ अस्तमेष्यतिदीपोयंविधुरेकःशिवेस्थितः ॥ ७२ ॥

॥ पूर्णचंद्रमुखीरम्याकामिनीनिर्मलांबरा ॥

॥ तनोतिकस्यनस्वांतमेकांतमदनातुरं ॥ ७३ ॥

Digitized by Google

॥ च्युतदत्ताक्षरजातिः ॥

एकस्मिन्नर्थेदीपः द्वितीयेऽर्थे दीपइत्यत्रपकारंलुप्त्वातत्स्थानेनकारोदीयते तदादीनइति अयंदीनोविधुश्चंद्रःएकएवशिवेस्थितः एकस्मिन्नर्थेकामिनी द्वितीयेऽर्थेयामिनीरात्रिः

॥ अंबरमंभसिपत्रंचारातिः पीतमहिगणस्यददाह ॥
॥ यस्यवधूस्तनयंगृहमब्जापातुसवोहरलोचनवन्हिः ॥ ७४ ॥

॥ स्थानच्युतकं ॥

॥ कृतिस्तुधर्मदासस्यासौगतस्यतपस्विनः ॥
॥ विदग्धानांमुखांभोजप्रविकाशकरीपरा ॥ ७५ ॥

॥ इतिचतुर्थः परिच्छेदः ॥

॥ इतिश्रीधर्मदासमूरिविरचितंविदग्धमुखमंडनं ॥
॥ काव्यंसटीकंसमाप्तं ॥

6274
12

Digitized by Google

Digitized by Google

नीचे लखेला ग्रंथ मुंबइमां पांजरपोळ पासे कुंभारटुकडामां बीजा नंबरना घरमां झारेत्यांथी अथवा रामबाडीना नाका पा से मि. मनोरदास रूपजीनीदुकानेथी मळशे.

	ग्रंथनां नाम	कीमत रू०आ०
१	गायन शतक भाग पहेलो	० — ६
	„ भाग बीजो	० — ८
२	„ भाग त्रीजो	० — ६
४	नामार्थबोध	० — ८
५	कुमारबोध	० — २
२	कुमारिकाबोध	० — ३
७	अखाभक्तनी वाणी भागपहेलो ग्रंथ आठनो ...	२ — ८
८	काव्यकलाप ३७ काव्यनो अंक १	१ — ४
९	लक्ष्मीसहस्र	१ — ०
१०	विदग्धमुखमंडनसटीक	१ — ०
११	पिंगलादर्श व्रजभाषा तथागुजरातीमां	३ — ८
१२	मानमंजरी अनेकाथ मजरी	० —१२
१३	सुंदरशृंगार तथा हीराशृंगार	१ — ८
१४	योगवासिष्ठ (तयार थायछे)	३० — ०
१५	धातुमंजरी तथा धातुपाठ (तयार थायछे)	२ — ०
१६	पुरुषसूक्त सव्याख्यान	० — ३

ह०ही०

Digitized by Google

This book is a preservation photocopy.
It was produced on Hammermill Laser Print natural white,
a 60 # book weight acid-free archival paper
which meets the requirements of
ANSI/NISO Z39.48-1992 (permanence of paper)

Preservation photocopying and binding
by
Acme Bookbinding
Charlestown, Massachusetts
1996

Digitized by Google